स्थपतिश्च बलिं दद्यात् योजयेदिति शान्तिकम् ॥ ७५ ॥

तदा तस्मिन् पुरे शान्तिरेव सर्वत्रिकाः सुराः ।
पूजयन्ते सततं पौरैस्तस्मात्सर्वास्तथा ॥ ७६ ॥

चतुःप्रकारं स्थापत्यमथवा च विविक्तितम् ।
चतुर्वेदस्य सत्ताङ्गो ज्योतिषं कुम्भलक्षणात् ॥ ७७ ॥

सामान्यलक्षणोदयनिमित्तानि च सर्वतः ।
ब्रह्मा विष्णुश्च रुद्रश्च यज्ञ्यसीति प तत् पुरम् ॥ ७८ ॥

नगरस्य विभागोऽयं यथावत् सम्प्रकीर्तितः ।
खेटं तदर्धविष्कम्भमायामार्धे तदर्धतः ॥ ७९ ॥

योजनेन पुरात् खेटं खेटाद् ग्रामं प्रचक्षते ।
गव्यूतिपरिमाणेन ग्रामाद् ग्रामं प्रचक्षते ॥ ८० ॥

द्विक्रोशाद् विषये सीमा तदर्धेन पुरस्य सा ।
खेटके पुरसीमार्धं ग्रामे खेटार्धतः स्मृता ॥ ८१ ॥

विस्ताराद् द्विगुणो विष्कम्भः पुरे द्विगुणसंमितः स्मृतः ।
विंशतिः खेटके मार्गा ग्रामे दश च वर्णिताः ॥ ८२ ॥

अथ ग्रामसहस्राणि नवति(ता ? ता) प्रचक्षते ।
चतुःषष्टिमपि ग्रामान् ज्यायो राष्ट्रं विदुर्बुधाः ॥ ८३ ॥

तदर्धं च सहस्राणि ग्रामाणां त्रिशती तथा ।
ग्रामाश्चतुरशीतिश्च मध्यमं राष्ट्रमीरितम् ॥ ८४ ॥

सहस्रमेकं ग्रामाणां तद्वच्च शतपञ्चकम् ।
युता च ग्रामपञ्चाशत् कनीयो राष्ट्रमुच्यते ॥ ८५ ॥

अप्यर्धसङ्ख्यमेतेषां ज्येष्ठमध्यकनीयसाम् ।
विधाय मर्यादैकैकं विन्यसेद् विधिवत् सुधीः ॥ ८६ ॥

राष्ट्रेष्वेवं विभक्तेषु यथामार्गं विभागवित् ।
निवेशयेत् पुराण्येषु तत्र तत्र यथागमम् ॥ ८७ ॥

विभागश्च प्रमाणं च लक्षणं चाधिपस्य यत् ।
आनिवर्णविभागश्च यथावत् तदिहोच्यते ॥ ८८ ॥

सुवर्णकारान्वैश्यांश्च तथा बहूपजीविनः ।
निवेशयेत् कर्मकरानन्यानपि विभागवित् ॥ ८९ ॥

वैद्यानामक्षधूर्तानां वणिक्कराणां च दक्षिणे ।
महतां नर्तकानां च गृहाणि विनिवेशयेत् ॥ ९० ॥

निवेशयेत् सौनिकांश्च मे(यी ? मी)नकारान् मृगजीविनः ।
कैवर्तान् नैर्णेजकांश्च चर्मकारविकृन्तांस्तथा ॥ ९१ ॥

रथ्येषु कौशाके वेश्यां वेश्यां स्थापयानुगेषु च ।
वायव्यां दिशि तान् सर्वान् पुरस्य विनिवेशयेत् ॥ ९२ ॥

कर्मकारविकुला ये च ये चान्ये पादकर्मिणः ।
शौण्डिका ये च तान् सर्वान् वायोर्दिशि निवेशयेत् ॥ ९३ ॥

पानीयागारकपालान् शाकमत्स्यार्थं च तथा सभाम् ।
प्रपाश्च पुण्यशालाश्च कुर्याद् दिशि धनेशितुः ॥ ९४ ॥

मूलविक्रयिणो ये च फलविक्रयिणश्च ये ।
निवेशिताः प्रशस्यन्ते पुरस्यैशानदिग्गताः ॥ ९५ ॥

पूर्वभागे बलाध्यक्षान् राज्ञो मुख्यांस्तथा पथे ।
निवेशयेत् तथाग्नेय्यां बलं नानाविधं सुधीः ॥ ९६ ॥

श्रेष्ठिनो दक्षिणाशायां तथा वैश्यान्महत्तरान् ।
याम्यैकद्वारान् कुर्वीत तथा ककुभि निर्ऋतेः ॥ ९७ ॥

कोशपालमहामात्यवैधिकान् कारुकानपि ।
निर्यामकांश्च कुर्वीत सलिलाधिपतेर्दिशि ॥ ९८ ॥

वायोः ककुभि कुर्वीत पण्यशालान् समीपकान् ।
पुरोहितज्योतिषिकानुत्तरस्यां निवेशयेत् ॥ ९९ ॥

विप्राः सौम्ये दिशो भागे क्षत्रियाः शक्रदिग्गताः ।
वैश्यशूद्रास्तु कर्तव्या दक्षिणापरयोः क्रमात् ॥ १०० ॥

निवेश्या वणिजो वैश्या मुख्याश्चापि चतुर्दिशम् ।
चतुर्दिशं विशेषेण स्थापयीत बलानि च ॥ १०१ ॥

नगरस्य बहिः प्राच्यां भिक्षुकान् विनिवेशयेत् ।
श्मशानानि तथा तत्स्थान् याम्यायां स्थपतिः सुधीः ॥ १०२ ॥

सर्वतोदिक्समुद्दिष्टो विन्यासो नगरे यथा ।
तथा ग्रामेषु खेटेषु सेनायाश्च निवेशने ॥ १०३ ॥

नगराभिमुखी कार्या सम्पूर्णाङ्गमहोदयी ।
द्वारे द्वारे सौम्यमुखी लक्ष्मीर्विभवणी शुभा ॥ १०४ ॥

राज्ञं कोष्ठमथ प्राक्च पश्चिमोत्तरं भवेत् ।
तथारोग्यार्थशालिन्यौ पश्चादिजयपश्चिमोत्तरे ॥ १०५ ॥
हेमाम्बरधरैर्लीकाः स्युर्विप्राः सुवर्णिकाः ।
प्रार्थं सौरं पुरं राज्ञः पश्चिमे नैव पाइकाः ॥ १०६ ॥
स्थाप्यन्ते ये यथा देवा नगरे सर्वतोदिशम् ।
वाक्षान्तराश्च सूत्रीषु सूत्रे नागतःपरम् ॥ १०७ ॥
चतुर्दिशं समारभ्य प्राकारपरिखान्तताः ।
बहिः शाले चले सार्धे चतुर्थं द्विसतोऽपि च ॥ १०८ ॥
चतुःशालाभिनीः सूत्रैरभिन्द्यैर्वरणोनिलैः ।
जलमार्गाग्रपुष्पाणि जलानुलग्नपदैः सह ॥ १०९ ॥
निवेशनानि कुर्वीत शिल्पशालां यथाक्रमम् ।
गणराशिमुखं शिल्पजनमाद्रि शुभानि च ॥ ११० ॥
याम्योत्तरायतं वंशं विकल्पपुरमध्यगाम् ।
बहिरन्ताश्च कुर्वीत देवानां विनिवेशनम् ॥ १११ ॥
प्राच्यां प्रत्यङ्मुखान् कुर्यात् प्राङ्मुखांश्चाप्युदग्दिशि ।
याम्योदक्पार्श्वयोस्तत्र मध्यशिल्पेन वेश्मनाम् ॥ ११२ ॥
दक्षिणस्यां न कुर्वीत शिवकाम्यप्युदङ्मुखान् ।
पैत्र्यानिलसमापसमानुमयमप्राभिगताः ॥ ११३ ॥
इत्यमी कथिताः सम्यग् ये यथादिक्स्थिताः सुराः ।
भिन्नं भिन्नं पदैर्ये स्युस्तानिदानीं प्रचक्ष्महे ॥ ११४ ॥
विष्णोर्विनायकस्य सहस्रनयनस्य च ।
धर्मस्य च विधातव्यं दिशि प्राच्यां निवेशनम् ॥ ११५ ॥
सनत्कुमारसावित्र्योर्भर्तुर्माधवस्य च ।
पूर्वदक्षिणदिग्भागे विदधीत निवेशनम् ॥ ११६ ॥

सभीकामासु मूलानां चाम्ये वेणुपतेर्भुवम् ।
अन्नकाल्याः पितृणां स्याद् वेश्म चैत्यं च नैर्ऋते ॥ ११७ ॥
सागरस्य नदीनां च क्षितिपभर्तुः प्रजापतेः ।
निलयं पश्चिमस्यायां पितृव्यानां वरुणस्य च ॥ ११८ ॥
ऋषीणां भवनं कार्यमपरोत्तरदिङ्मतम् ।
समीरणस्य चाप्येवं कात्यायन्याश्च मन्दिरम् ॥ ११९ ॥
विद्याधरमहालोकानां तथा यक्षाधिपस्य च ।
ईशान्यान्तु विधातव्याः मातरः सौम्यदिग्गताः ॥ १२० ॥
जगद्गुरोर्महेशस्य शिवो वाऽथ च मन्दिरम् ।
पूर्वोत्तरस्यां कुर्वीत प्रविशेषे मनोरमम् ॥ १२१ ॥
महीनाथमुनीनां च सप्तर्षीणामनलस्य च ।
कान्तारेष्वपि तु स्थानं सर्वविघ्नप्रशान्तये ॥ १२२ ॥
निवेशयन्ति नाभिक्षयोश्चैव पश्चिमे पुरोत्तमाः ।
सम्यक्सदृढिमालाद्य गिरौ नगरस्य तत्पुरम् ॥ १२३ ॥
नगरस्य विदूरेऽपि कुर्यात् निशिविशालमपि ।
चाण्डालोऽपि विमुक्ता देवाः शास्यन्ते न पराङ्मुखाः ॥ १२४ ॥
स्थिताः पश्चिमे पूर्वमुखे वैषाय न पराङ्मुखाः ।
विविधैस्तु तथा सर्वैरिष्टकैः प्राकारेण च ॥ १२५ ॥
नद्यैवमर्णवपूताकच्छाद्यैरन्वितं पुरम् ।
नदीवेशी सततमवचरं जगतामिष्टसुखं विनिर्दिशेत् ॥ १२६ ॥
वैडूर्यमणिमालाभिः क्षीरवृक्षादिभिर्युतैः ।
उपवनान्यन्यमार्गेषु स्थाप्य देवोऽन्यतरस्थितैः ॥ १२७ ॥
अनीतितोऽप्यपे प्रोक्तो विविधद्विजवर्णितम् ।
वर्णिता सर्वतोभद्रादावादिकमाणः पुराः ॥ १२८ ॥
विधानं यद् यत्र प्रोक्तं पुरणानां पुराद् बहिः ।
तत् तथान्यत्रान्तरेऽपि स्यात् कार्यं जनकीर्तिगामकम् ॥ १२९ ॥

चन्द्रे गुरुतस्य वर्णाधिपे शुभकुलोज्ज्वलनन्वया ।
निषेधनं नवेन्दुस्य लघैव इक्षिकुष्यनयोः ॥ १३० ॥

मातृपक्षमध्यायीयात् त्रिपक्षात् मूलसमुद्भवात् ।
विनापि वेदमितिः कुर्यात् शुभे चान्द्रमासौगतात् ॥ १३१ ॥

राज्ञा धर्माधिकारिकानपथ्यहितोपयोगीदिना ।
लयिकपत्रवतः कार्यान्यासते देवालयेऽप्यथवा नियमम् ॥ १३२ ॥

मासान्ते सति सन्तोष्याधारिलग्नो यथावरम् ।
मासान्तं कारयेत् पूर्वं न तथा पीडयेत् सुधीः ॥ १३३ ॥

प्रतिष्ठेयं प्रतिष्ठायां प्रतिष्ठेयफलं तथा ।
कुर्यात् प्रतिपुरं चापि न प्राक्तानानुजातिभिः ॥ १३४ ॥

पूर्वमासागतो यस्तु सौम्योऽपि वर्णोऽथवा ।
मासान्ते निहितेऽप्यचिरम् भवेत् पीडाभयमत्यन्तम् ॥ १३५ ॥

शुभे चान्द्रमसेऽप्यचिरम् बहुर्वाधिपतेऽपि ।
पुरोधसां भयं विद्यात् शुभे ज्योतिर्विदां तथा ॥ १३६ ॥

धर्माधिकारमध्यायीयमानो यजनस्य वा ।
अभिषेके निहिते चापि भयं विद्यान्महीपतेः ॥ १३७ ॥

सेनापत्याभिषेकेऽप्यचिरं निहिते नवमे वेश्मनि ।
सेनापतेर्भयसन्तं च पीडा सञ्जायते ध्रुवम् ॥ १३८ ॥

प्रजापतेरभिषेके इदं रौद्रं शुभे प्रहम् ।
चतुर्थः कालस्थितिश्च स्यात् कन्यायां च मिनलग्ने ॥ १३९ ॥

गणेशादावनिकायाभिषेकोऽन्यः कृतो यदि ।
प्रासादः स्यात् तदा निश्चयं देवाद्भुतं महद्भयम् ॥ १४० ॥

श्रीनाम्न्यो देवतास्तासां पीडयन्ते यदि वेश्मनि ।
शुभ्यानां पुरवासिनां तथा कुर्यान्नुपाद्रवम् ॥ १४१ ॥

पूर्वास्वेषु सर्वेषु पीडितेष्वमरालये ।
कन्याद्वाहिनां पीडा वैश्यानां वैश्वपीडितैः ॥ १४२ ॥

हीनाधिकप्रमाणेषु पुरनिवेशेषु वास्तुषु ।
कर्तुः कारयितुः पीडा स्वामिनः पूजा नाशश्च च ॥ १५३ ॥

नैवाग्निसंस्थं कुर्यात् स्वल्पमल्पामरालयम् ।
पुरं चानाश्रितं कुर्यात् देवनागाश्रितं न च ॥ १५४ ॥

ज्येष्ठमध्यकनिष्ठानि भवनभूमिपथान्तरे ।
सुरवेश्मानि कुर्वीत शोभायायथवा पुनः ॥ १५५ ॥

कथितोऽयं विधिः सैः सैत्रिकप्राकारं निवेशने ।
बहिर्निवेशनात् स्थेयं विप्रपादमरालयम् ॥ १५६ ॥

नगरेषु सपमेषु ग्रामेषु निखिलेषु च ।
खेटकेषु च सर्वेषु सामान्योऽयं विधिः स्मृतः ॥ १५७ ॥

इत्युक्त एष नगरोपगमः सुराणां
सम्यगभग्नविहितः पथसन्निवेशः ।
भूमौ विभाजनपुरा गृहदेवतानां
सम्यक् शुभाशुभफलमपि विभागयुक्तम् ॥ १५८ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
पुरनिवेशो दशमोऽध्यायः ॥

## अथ वास्तुत्रयविभागो नामैकादशोऽध्यायः ।

चतुरश्रीकृते क्षेत्रे विभक्ते नवधा ततः ।
मध्ये महापुरीत्वेन विधेयो नवभिः पदैः ॥ १ ॥

तस्मादनन्तरं प्राच्यां चतुष्पदः कीर्तितोऽर्यमा ।
आग्नेयकोणे सवितृसावित्रौ पदिकावुभौ ॥ २ ॥

ब्रह्मणोऽनन्तरं याम्ये विवस्वान् चतुष्पदाश्रितः ।
नैर्ऋते पदिकौ कोणे जयेन्द्रौ कल्पितावुभौ ॥ ३ ॥

चतुष्पदः स्याद् ब्रह्मा शिवः कपालार्थी सन्तुरकमलः ।
कर्णेऽपरोत्तरे यस्य काक्ष चक्षिकाकुण्डली ॥ ४ ॥

चतुर्भिः पदैरर्यमा सौम्ये मित्रकः पृथ्वीधरः ।
आपस्तथापवत्सश्च चक्रिणश्चैवाधिपन्नतौ ॥ ५ ॥

पुरुषाद्यासंख्यया देवाः प्रोक्ता भूमौ बहिःस्थिताः ।
क्षेत्रं प्रदक्षिणं तेषां स्थानं पूर्वोत्तरादितः ॥ ६ ॥

अदितिश्चत्तु पर्जन्यो जयन्तश्चेन्द्र एव च ।
रविः सत्यो भृशश्चेति नभस्तस्मात् ततोऽग्निका ॥ ७ ॥

पूषाख्यो वितथाख्यश्च गृहक्षतयमावथ ।
गन्धर्वो भृङ्गराजश्च मृगः पितृगणस्ततः ॥ ८ ॥

दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलेश्वरः ।
असुरः शोषनामा च पापयक्ष्मा ततः परम् ॥ ९ ॥

रोगो नागश्च मुख्यश्च भल्लाटः सोम एव च ।
चरकोऽप्यदितिर्दैत्यमालेति पददेवताः ॥ १० ॥

वह्नेर्वायोः पितॄणां च स्थानेष्वीश क्रमात् बहिः ।
चरकी च विदारी च पूतना पापराक्षसी ॥ ११ ॥

मर्मयोगोऽस्ति नैतासां स्थानमेव हि केवलम् ।
पदयोगमथ भूमौ बहिःस्थानां नमःस्थितम् ॥ १२ ॥

तथाष्टौ दिक्पालोऽथ अथ स्कन्द एव च ।
पिलपो जम्भसुग्रीवगोपत्रमुख्याद्यादिभिः ॥ १३ ॥

एभ्यः शेषा बहिर्ये तु ते स्युः पदबहिः सुराः ।
एकाशीतिपदे प्रोक्तो देवानां पदक्रमः ॥ १४ ॥

चतुरस्त्रीकृते क्षेत्रे यथाभागं प्रतिष्ठिते ।
नवैकाशपदो वास्तुर्भूमोऽस्याप्यमरस्थितिः ॥ १५ ॥

द्विरष्टभूमिकं मध्ये पदमेकं पितामहः ।
षड्‌द्वे कलापदे वास्तौ चतुर्भूमिसमर्पिता ॥ १६ ॥

विश्वकर्मोऽथ विश्वस्य मध्ये पृथिवीधरः ।
भोगंनिष्क्रमन्ति ये तेषामर्पयन्न इव सूरयः ॥ १७ ॥

सविन्द्राद्याश्च सम्प्रोक्ता ये च भोक्तारः सुरोत्तमाः ।
पञ्चकर्णीर्तिके मध्ये तेषां भोगः यथाक्रमम् ॥ १८ ॥

आर्यमनादिभवनका सुराश्च विवस्वतोऽपि च ।
रोगोऽदितिनिलयाद्यर्धपदभाजो बहिः स्थिताः ॥ १९ ॥

चतुर्विंशतिसंख्य ये पर्जन्याद्याः सुरोत्तमाः ।
कर्णिकान्ता द्विपदिकास्ते शेषं बाह्य प्रसादिनम् ॥ २० ॥

चतुरश्रीकृते क्षेत्रे पूर्ववत् प्राविभोऽवधिः ।
चतुःषष्टिपदो वास्तुश्चतुःषष्ट्या पदैर्भवेत् ॥ २१ ॥

कर्णिकाद् पदानि चत्वारि भुञ्जन्त्यन्तः पितामहः ।
अर्यमाद्याः सुरास्तत्र द्वे द्वे भजन्ताः पदे ॥ २२ ॥

मध्येऽष्टौ चाष्टकोणेऽष्टौ ये स्थिताः कर्णेषु वास्तुषु ।
ये देवाः सर्वे प्रपाज ते यथार्धपदाः स्मृताः ॥ २३ ॥

पर्जन्योऽथ भृशः पूषा सुग्रीवादितिकौ तथा ।
रोगमारुतादितिश्चान्त्याः सुरास्त्वर्धपदाः स्मृताः ॥ २४ ॥

अथ मन्दादिषु वास्तुषु वास्तुबन्धेषु कीर्तिता ।
प्रत्येकं भोक्तारमथ सुरेषु द्विपदस्थितिः ॥ २५ ॥

शिरो वह्निपदात्पूर्वं भवेत् पितृपदान्ततः ।
वायव्याग्निगतौ चैव रोगाग्न्याख्यमवाप्नुयात् ॥ २६ ॥

शिवाख्यः प्राप्नुयात् पादौ भुजौ भूतल सुग्रीवमाप्नुयात् ।
ततोऽग्निर्नि तां नयेत् द्विजाभावे प्रवेशयेत् ॥ २७ ॥

क्षीरात् पायसं पर्व नीत्वा पायसं प्रापयेत् ततः ।
नयेत् पर्व तत्र। सौम्यं तत्र वारिदिक्सामयेत् ॥ २८ ॥
भूधरादानीय विन्यस्य सोमादर्यं विन्यसेच्च ।
शोषान्मुख्यं समानीय नयेत् नगात् पुनर्मृगम् ॥ २९ ॥
ये विन्यस्ताः समुदिता यथाक्रमेण तैरिह ।
पञ्चाशत्पदकं वास्तु समस्तं विभजेत् सुधीः ॥ ३० ॥
देवैः सर्वैरप्यमीभिर्विभक्तः
पौरस्त्यार्धादिन्द्रमाद्योपपन्नोऽसौ ।
पूज्यमानैर्योऽप्यथ यज्ञपात्रैः
यच्छत्येनान् स्थापितैर्मेखलेन ॥ ३१ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
वास्तुत्रयविभागो नाम एकादशोऽध्यायः ॥

## अथ नाड्यादिसिराविविकल्पो नाम द्वादशोऽध्यायः ।

नाड्यादिवीथ्यौ प्राहुः पञ्चीयान् योजनान्तरः ।
पदैः योजनानि स स्यात् नाड दैवान् प्रचक्षते ॥ १ ॥
सर्वेषु मध्ये स्थितो ब्रह्मा पदमेकं सुरोत्तमः ।
तस्मात् पदचतुर्भागीमार्यमाद्याश्चतुरासनाः ॥ २ ॥
पदार्धभागभोक्तारस्तथाष्टावन्ये सुरोत्तमाः ।
सार्धैका च विस्ताराश्च विंशत्यन्तर्धरोऽपि च ॥ ३ ॥
एकैकभागभोक्तारस्ताश्चान्या देवताः कोणेषु दैवताः ।
चतुर्भागस्थिताश्चान्ये सुखिनस्तास्तपस्विनः ॥ ४ ॥
चतु(र्थी ? र्थी )सार्धकोणेषु ये स्थिताः कलशाः सुराः ।
तावन्मात्रस्थितोऽसौ त्रिभिर्देविभिः शनैश्चिनिः ॥ ५ ॥
ये चत्वारस्तिर्यक्स्थाः पर्यन्तस्थाः सुरोत्तमाः ।
तेऽपि चतुर्भागस्थानो निःसृताश्चिरकीर्तिताः ॥ ६ ॥

चरकान्ता अयान्ताख्या ये बाह्यस्थितयोऽम्बराः ।
भोगोऽर्धपदिकास्तेषां षोडशानामपि स्मृतः ॥ ७ ॥

चतुरस्रीकृते क्षेत्रे चतुःषष्टिपदाङ्किते ।
बाह्यपङ्क्तिद्विपदं सार्धं चरकाद्यर्धमुत्सृजेत् ॥ ८ ॥

अन्तरे वीथिकामर्धपदिकामुत्सृजेत् ततः ।
मध्ये तु सप्तविंशत्या भोगैर्वास्तु विभाजयेत् ॥ ९ ॥

एकोनत्रिंशता पूर्णं यथाक्रमं चालसलक्ष्म् ।
षड् भवेत् तत्र गर्भं स्याद्ब्रह्मणीतिपदः क्रमात् ॥ १० ॥

अध्यर्धपादभागाद्यै चापमधून्यः पृथक् ।
अर्धभागं चतुःपञ्चभागात्मकं स्यात्क्रमात् ॥ ११ ॥

ईशानपर्जन्यादित्यन्ता बाह्या भवपदाः सुराः ।
ऐशानां सन्निवेशोऽसौ साङ्गो वास्तुरुच्यते ॥ १२ ॥

अथोच्यते पृथग्वास्तुर्द्वात्रिंशत्पदोन्नये ।
षट्सप्तत्युपद्विपञ्चाशा वाचनोऽपरः ॥ १३ ॥

अथवा भाविते वृत्तविष्कम्भे मानिकान्तरात् ।
चतुरः पत्तीन् कुर्यात्समन्वयवृत्तं द्विभागिकम् ॥ १४ ॥

स्याद् बहिर्द्वात्रिंशत्पदद्वात्रिंशतिभागिकम् ।
नवपञ्चत्रिंशत्पदमाद्योत्तरोऽभिन्नं क्रमात् ॥ १५ ॥

एवं कृते भवेन्मध्ये ब्रह्मस्थानं चतुष्पदम् ।
इत्थं चतुःषष्टिपदो वृत्तवास्तुरुदाहृतः ॥ १६ ॥

यथावा भाविते वृत्तविष्कम्भे मानिकान्तराः ।
कार्याः परिधयः पञ्च मध्ये वृत्तं द्विभागिकम् ॥ १७ ॥

बहिर्दिश्यं कल्प्यं तस्य भवेत् षड्विंशता तता ।
शेषं चतुःषष्टिपदस्थिता स्यात्क्रमवास्तुनि ॥ १८ ॥

दैवतान्यथ सप्तानां स्वराणां क्रमशोऽनुक्रमात् ।
एवं कार्यवशात् कार्या भाषणोऽन्येऽपि वीक्षणाः ॥ १९ ॥
ष्यामे पञ्चमे चाद्यमे धैवताख्ये च कृतवान् ।
कृताख्येऽरूपेकान्ते च वाद्यन्ते यथाविभागतम् ॥ २० ॥
एक एव गुणलेषु बहुधा परिकल्पितः ।
सर्वेष्विताशि संस्थाने विभज्य तदर्थेषु तानः ॥ २१ ॥
शारीरं चाद्यगुणोऽस्य गुणदोषा भवन्ति यत् ।
गुणं स्पूर्णं ततः श्रोते रक्तस्योत्तरपाः क्रमात् ॥ २२ ॥
व्याप्तः कम्पः स्थली नामिर्निर्गुणस्थानयो गुणम् ।
नादं प्रयान्तु वाणी स्निग्धवक्त्रं यथागुणम् ॥ २३ ॥
कम्पन्ते देवतेन तु वर्जेत् गुणवानुतिः ।
शिरोगतनामापुर्वकोऽत्र तत्स्वराः तत्कृतस्वराः ॥ २४ ॥
वर्णान्यथ महाशब्दा वक्त्रा वाक्सुधास्तेयमाः ।
शिरः कम्पिताना वा । स्फुटता कण्ठः परिकीर्तिता ॥ २५ ॥
ललस्य धैवतो नामलक्षणानां प्रकीर्तितम् ।
महार्षवी प्राणकाशिनी चानयोश्चिनी च मध्यमी ॥ २६ ॥
प्रथमे पञ्चमे भागः षड्जस्योत्तरं तयोः ।
वैशालोऽन्तिमात् तत्त्वविध देवा याः स्फुर्णेषाम्ना ॥ २७ ॥
चातिस्वरेषागता देवतास्तेषुभेदाः प्रकीर्तिता ।
सन्ताना ये स्फुटस्वैर्यो सर्वं तत् सम्पदाप्यते ॥ २८ ॥
०५००सर्वाणि तान्यादुः षड्जमध्यानि यानि हि ।
मान्योऽप्यमोऽस्य षड्जो गुणदाः धैवतोऽपि च ॥ २९ ॥
वशानो मानसिद्धं स्यात् वैवादीनामनुक्रमात् ।
वैवादनस्य यः सन्धिः स स्वन्धिरिति कीर्तितः ॥ ३० ॥
ये गुणः स्फुटयतुणां धैवतान्ते चानुसन्धयः ।
वाक्यपंक्तुल्यं सन्धीनां प्रमाणं परिचक्षते ॥ ३१ ॥

तदर्धमङ्गुलमन्येषां प्रमाणं त्वङ्गुलीमितम् ।
यथोक्तैतानि सम्यक्च वास्तुविद्याविशारदः ॥ १२ ॥
सूत्राणि प्रयतो नित्यं स्थपतिर्विनिवेशयेत् ।
महावंशस्य मार्गाणि कुर्यात् सूत्रेण वेदवित् ॥ १३ ॥
स्तम्भेषु कुड्यकेन्द्रं मध्यमांशेषु सन्त्यजेत् ।
महावंशसमायामो भवेत् स्वामिवधो ध्रुवम् ॥ १४ ॥
वर्षेण नयनात् नीतिं वंशानां पीडनात् पितुः ।
उपमर्माणि रोगाय मर्माणि कुलहानये ॥ १५ ॥
अङ्गोपाङ्गविनाशाय शिराश्च स्युः प्रकीर्तिताः ।
कलिः स्यात् सन्धिवेधेषु वैकल्यमनुवंशिषु ॥ १६ ॥
नवाक्षेत्राणि सर्वाणि वैविध्यान्नुपकल्पयेत् ।
ज्ञात्वा शिराः सानुशिराश्च मर्मान्वंशानुवंशानपि वास्तुदेहे ।
यत्नेन मर्माणि पदानि चैषां वेधं त्यजेत् वास्तुपतेश्च नाशात् ॥ १७ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
नाडीवंशानुवंशानां शिरानुशिरामर्मानुमर्मवेधविकल्पो नाम द्वादशोऽध्यायः ॥

## अथ मर्मवेधस्त्रयोदशोऽध्यायः ।

एकाशीतिपदो यः स्यात् तथा शतपदश्च यः ।
चतुःषष्टिपदो यश्च वास्तुरेष त्रिधोदितः ॥ १ ॥
यद् येन विन्यसेत् तेषु नाड्यादीनि प्रचक्षते ।
तानि मर्माणि चैतेषां कथ्यन्त इह तान्यपि ॥ २ ॥
वर्जितां शतपदादीनि विधेया राजवेश्मनाम् ।
एकाशीतिपदेनेन्द्रस्थानं च विन्यसेत् सुधीः ॥ ३ ॥
नाडिका विधिवत्सम्यक् विधिविन्न्यासाश्च मर्मवत्ताः ।
तस्य मार्गमेवमानव प्रविभागेन बुद्धिमान् ॥ ४ ॥

यः पुनः स्नायुधमनीशिरसस्तेन विभावयेत् ।
यत्रेन्द्रियाणि सर्वाणि सन्ध्यस्थीनि नगराणि च ॥ ५ ॥
जन्मकालयोगस्य सुरा ह्यर्णवात् आसनस्य वै ।
तेषां स्थानानि मर्माणि शिरा यैश्चापि तेषु तु ॥ ६ ॥
मूले हृदि च नाभौ च मूर्ध्नि च स्तनयोस्तथा ।
मर्माणि यान्युक्तानि सर्वप्राणानि प्रचक्षते ॥ ७ ॥
शंखावुत्क्षेपकस्थपनानि पञ्चदश्यानि यानि च ।
दैवतस्थानानि नाम्नापि यद्योजनमभिषिच्यते ॥ ८ ॥
दैवतस्थानानि सम्पातस्त्वप्यधिकारे पुनः ।
तथैकादशीतिपङ्क्तिके यथान्तरानिर्देशेऽपि च ॥ ९ ॥
चतुर्णामपि विज्ञानेषु शिरा याः स्नायुसुर्विधाम् ।
मर्माणि तानि योऽवगन्ति हृदयस्थानि यानि च ॥ १० ॥
विविधास्थिसन्धिस्थानेन यद्वा सन्धेन यावता ।
सर्वं यत् पीड्यते येन यत्रे नश्योच्यते फलम् ॥ ११ ॥
दूरेषां विविधिस्थानि मर्मणां परिपीडनात् ।
दौर्बल्ये सुहितः प्राहुः कुलकानिष्ठानि वा ॥ १२ ॥
भवेत् कायिकायः स्तम्भस्तुल्याभिः प्रतिपत्तिकायः ।
स्नायवो धमन्योऽस्थिसन्धयश्च सन्धयः ॥ १३ ॥
मर्मस्थानगतैः कार्यैर्वैद्यैः कार्यो विधीयते ।
सम्बद्धिसेवनिबन्धनानि सन्धिपातेऽत्र नाडिषु ॥ १४ ॥
मांसपार्श्वेनोच्छेदो कालवलीः सुखकारयः ।
कविधातेन मर्मस्थे प्रत्याख्याय प्रत्याख्यायेत् ॥ १५ ॥
वङ्क्षणकक्षप्रभृतिस्तनबाहुलोमानि च ।
मर्मप्रयोगगाम्भीर्यात्प्रत्याख्येयानि यत्नतः ॥ १६ ॥
हृदयस्थ्यङ्गुलस्तनकण्ठगण्डनाभिकैः ।
हृदयस्थानिनि रोगकृत्पीडाकम्पया(? द्)॥ १७ ॥

वंशवर्णक्षयं पत्युः पीडनं च प्रजायते ।
द्वारमध्येषु चद्वारमध्येष्वपि च सूरयः ॥ १८ ॥
कर्णाद्यम्भादिभिर्विद्धेष्वेतदेव फलं विदुः ।
सभ्यानुवंशाभिहिता वृद्धिर्या कुलमालिनी ॥ १९ ॥
अथावह्ना नागदन्ता भर्तुः सभ्याविनाशगाः ।
वातायनैरथ स्तम्भैर्वे विद्धा नागदन्तकाः ॥ २० ॥
ते कायमीलिता भर्तुर्वेद्धा वीरमयप्रदाः ।
द्रव्यधान्यविनाशाय शोकाय कलहाय च ॥ २१ ॥
पद्मसम्पातगं द्वारं भवेत् स्त्रीदूषणाय च ।
मध्येनान्यतरेणापि महासर्वं सिरीविलम् ॥ २२ ॥
भवेत् सर्वजनत्राय पृष्ठिनो मरणाय च ।
अंशुकास्थो पर्पत्याश सुभिक्षाः सेनुकोलक्षणाः ॥ २३ ॥
पुरमासानयोद्वारा वेधेऽप्येते न दोषदाः ॥
इत्थं सुरशिल्पिकर्मसूत्राभिजितोऽयं
भेदाः पदेष्वभिहितमर्मगतो व्यधश्च ।
उक्ताः पुराणपथमानुगमेव फलं च सम्यग्
भूयोऽथ वास्तुपुरुषाङ्गविभागमत्र ॥ २४ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
मर्मवेधो नाम त्रयोदशोऽध्यायः ॥

## अथ पुरुषाङ्गदेवतानिघण्ट्वादिविनिर्णयश्चतुर्दशोऽध्यायः ।

देवतानां यथोद्दिष्टं संविभक्तैः पृथग्विधैः ।
स्थपतिः प्रयतः कुर्याद् वास्तुमिमं पुमाकृतिम् ॥ १ ॥

गीरसत्वाभिवदिते दक्षिणेऽस्य मुखाश्रिणी ।
अयनस्थानादिभिस्तस्य कर्णौ वायुर्मुखे स्थितः ॥ २ ॥

अर्धः स्यात् दक्षिणे वामे शुक्रे सोमः प्रतिष्ठितः ।
महेन्द्रकरशे सावधानस्योरसि स्थिती ॥ ३ ॥

स्तनोऽस्यैषा दक्षिणे स्यात् वामे च वृश्चिकोदरः ।
पद्मश्च रोमाञ्च कासस्य शुक्रयो मञ्जूषा इत्यसौ ॥ ४ ॥

दक्षिणेतरयोस्तस्य पादे देवाः समाश्रिताः ।
सत्यो भृङ्गो नभो वायुः पूषा चैत्रास्य दक्षिणम् ॥ ५ ॥

पश्चादि वायुमेतस्य संस्थिताग्निर्विभीषणः ।
साधिकलभितारी च महूकामितवस्तथा ॥ ६ ॥

चत्वारोऽस्मी क( वामि ? कोणि )स्थाः वरुणोऽर्हंपि च स्वयम् ।
शिलपीठः करी पार्श्वे दक्षिणेऽस्य व्यवस्थिती ॥ ७ ॥

वामे ध्रुवः स्थितस्तस्य देवी योगानुरागिणी ।
मित्राश्रितो मित्रस्थाने हृद्भ्यसुरमालिनी ॥ ८ ॥

मेरुमध्यस्थितास्तस्य सुरामिन्द्रसहायिनी ।
यमश्च चक्रमग्रोऽर्थौ क्रमात् दक्षिणवामयो ॥ ९ ॥

गन्धर्वश्चैव सम्पाती जङ्घौ राज्यामयेतरात् ।
हृत्स्था गुर्विन्दुपाकस्थाः संस्थिताः पितरोऽङ्घ्रिणाः ॥ १० ॥

एकाशीतिपदस्यैवादितिः मानायितं शिरः ।
माहेन्द्रीसंस्थितं विद्याद्धुरवक्षिणवस्य तु ॥ ११ ॥

एकाशीतिपदन्यासो वस्तुः सत्यपदाश्रितः ।
यः चोत्तरपदः स स्याद्विमुखविमुखोऽङ्घ्रयः ॥ १२ ॥

मध्ये च एव देवानां स्थितो ब्रह्मा महात्मनः ।
स सद्धानमोऽभिन्नाभिमतो यज्ञानां प्रभुः ॥ १३ ॥

योऽयं वह्निरितीरितः स सर्वज्ञानदो हरः ।
पर्जन्यनामा यस्यार्थं वृष्टिमानम्बुधाधिपः ॥ १४ ॥

अयमानस्तु द्विजमाख्यः कश्यपो भगवानृषिः ।
महेन्द्रस्तु सुराधीशो दनुजानां विमर्दनः ॥ १५ ॥

आदित्यं पुनरिच्छन्ति विवस्वन्तमहस्करम् ।
सत्यो भूतहितो धर्मो वृषः कामोऽथ मन्मथः ॥ १६ ॥

योऽन्तरिक्षः स्मृतो देवतात्मकः समुदाहृतम् ।
मारुतो वायुरादिष्टः एष मातृगणः स्मृतः ॥ १७ ॥

अथर्वो पितराख्यः स्यात् कौबेरमणिमः सुतः ।
षडाननः पुनर्योनिः स चन्द्रतनयो बुधः ॥ १८ ॥

सेनापतिर्भवः श्रीमान् यमो दैवतकश्च सः ।
गन्धर्वो भगवान् देवो नारदः परिकीर्तितः ॥ १९ ॥

भूतराजमिहेच्छन्ति राक्षसं निर्ऋतेः सुतम् ।
यो मूलोऽखिलजगन्ता स स्वयंभूर्यम इत्यपि ॥ २० ॥

आर्षिः प्रजापतिः ब्रह्मा मनुः सुधीश ईरितः ।
पुष्पदन्तस्तु विमलात्मकः स्याम्ब्रह्मावचः ॥ २१ ॥

वरुणः पाशभृन्नाम्ना लोकपालः स कीर्तितः ।
अङ्गुरो राहुरर्केन्दुमर्दनः सिंहिकात्मजः ॥ २२ ॥

कोणस्तु भगवानेव सूर्यसुतः शनैश्चरः ।
पापयक्ष्मा क्षयः प्रोक्तो रोगास्तु कथितो ज्वरः ॥ २३ ॥

भुजङ्गमानामधिपः श्रीमान् नागस्तु वासुकिः ।
त्वष्टा स्यान्मुख्यसंज्ञोऽसौ विश्वकर्माभिधश्च सः ॥ २४ ॥

धनदो यक्षराज इत्युक्तः कुबेरः सोमसेविता ।
वरुणो व्यवसायाख्यः श्रीरित्यादिनिर्दिष्टिका ॥ २५ ॥

त्रिविधोऽप्युच्यते पार्श्वः सूक्ष्मस्तु पृथगव्ययः ।
हिमवानाय हस्तस्तु आपवत्सः उमा स्मृता ॥ २६ ॥
आदित्यस्तस्य पर्वता देवमाला सावित्रा उच्यते ।
देवी गन्धार्थ विज्ञेया सवित्रेति प्रकीर्तिता ॥ २७ ॥
जानुः पार्श्वस्तानसौ विवस्वानिति स स्मृतः ।
जघनाग्निस्तु पक्षीति स्यादिन्द्रो बलवान् हरिः ॥ २८ ॥
मित्रो हस्तपादो माली चक्षुष्को महेश्वरः ।
राजयक्ष्मा गुह्यः प्रोक्ता त्रिशिरोऽप्यन्य उच्यते ॥ २९ ॥
चरकी च विदारी च पूतना पापराक्षसी ।
रक्षोयोनिजाः प्रोक्ता देवानामुपरि स्थिताः ॥ ३० ॥
इत्येष वास्तुदेवानां निघण्टुः परिकीर्तितः ।
यो मूर्ध्नि यो द्वयोर्मध्ये यो भाले चिबुके तु यः ॥ ३१ ॥
यः कण्ठे हृदये यः स्यात्तत्कालो नाभिदेशगः ।
ऐन्द्रो बली पक्षस्तु मेढ्रे यः (गुल्फ ? मुष्क) योर्मुनी ॥ ३२ ॥
मकार कर्णयो वायु मकारः त्रिचित्कालितः ।
(म ? क) कारो गुल्फयोरन्ते पकारोऽङ्गुलिकयोः स्मृतः ॥ ३३ ॥
उक्तानि वास्तुपुरुषस्य यथावदित्थमङ्गानि वास्तुपददैवतनामभेदाः ।
वर्णाश्च वास्तुपदयोरिह योजनीया सूत्रोऽस्य देवपदयोन पुरे निवेशात् ॥ ३४ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
पुरुषाङ्गदेवतानिघण्टुसङ्ग्रहनिर्णयो नाम चतुर्दशोऽध्यायः ।

---

## अथ राजनिवेशो नाम पञ्चदशोऽध्यायः ।

पुरे पुरनिवेशोऽयं चातुर्वर्ण्यसमाश्रये ।
त्रिपुरुषपरीवारसालगोपुराट्टालकेऽपि च ॥ १ ॥

विमलकरध्ये परितः प्रतिवाक्षिलमन्तरे ।
कमाद्भ्रमर्शैङ्गिः कङ्कसेचनगायनमस्थिती ॥ २ ॥
नागुदकमकमे देवे भ्रामद्वारामुखोऽथवा ।
यद्वा:श्रीविवापामाषि मैत्रं पदमधिष्ठितम् ॥ ३ ॥
पञ्चाशकैकमावालं चतुरश्रं सर्म मृदम् ।
पुरमध्यादवरतोऽपिवस्थं कुर्यान्नृपालयम् ॥ ४ ॥
दुर्गेषु नृपवासान् कार्यं यद्वा विन्नपरेष्वपि ।
निवसन् नृपरार्पेक्षा कार्यमन्यलमे पदे ॥ ५ ॥
निवत्वारिंशता पुरेऽत्र ज्येष्ठं स्यात् द्वे चतुष्पदे ।
मध्यं चार्थं तु द्वात्रिंशः चार्णं साङ्कमन्निलमम् ॥ ६ ॥
ज्येष्ठे पुरे विधातव्यं ज्येष्ठं राजनिवेशनम् ।
मध्यमे मध्यमं कार्यं कनिष्ठे च कनीयसि ॥ ७ ॥
प्राकारपरिखायुक्तं चापकानि समन्ततः ।
नगरद्वारनिर्युक्तस्तुरहालककाभिधानम् ॥ ८ ॥
एकाशीत्या पदैर्मध्ये विचेयं नृपमन्दिरम् ।
राजमार्गं समाश्रित्य वास्तुद्वारमनवृत्तकम् ॥ ९ ॥
पुष्पवानथैव कर्तव्यमन्यादिक्कोणमपेऽपि च ।
भल्लाटपदपर्यन्तं गोपुरद्वारमिष्यते ॥ १० ॥
तत्पुरद्वारविस्तारोच्छ्रायसम्मितमपिच्छवम् ।
महेन्द्रं द्वारमिच्छन्ति निषिद्धस्य महीपते ॥ ११ ॥
दैवस्ते पुष्पदन्तमर्पयेत्सिन च गृहक्षतम् ।
कल्पयेच्चैवामथवनः पश्चिमपदेष्वथ ॥ १२ ॥
अन्यान्यपि स्यात् दिक्षु द्वाराण्येवं प्रकल्पयेत् ।
शालिमुख्ये च सर्वेषां वाचन्तो गोपुराणि च ॥ १३ ॥
नदीपवनरद्वाराद् विंशत्पंक्तोऽत्तिनाति वा ।
पक्षद्वाराणि सुषीने कल्पन्ते सुख्यनावि च ॥ १४ ॥

जिनवेश्म समासाद्य विदधीत प्रदक्षिणाम् ।
वारुणी विनयके कुर्यात् बहुलेऽम्बरमध्यमैः ॥ १५ ॥
तत्र मैत्रपदस्थाने विधेयावासनीपतिः ।
प्रासादः प्राङ्मुखः कार्यो यथावत् पृथिवीभुजा ॥ १६ ॥
श्रीगृहं सर्वतोभद्रं कुम्भकर्णे ममचापरम् ।
पश्चिमोन्मुखपतिः कुर्यान्प्रासादं शुभलक्षणम् ॥ १७ ॥
शालापरिक्रमोपेतमहर्मादिरपि वाञ्छितम् ।
तत्र प्राच्यां भवेद् गेहमादित्यपदसंस्थितम् ॥ १८ ॥
धर्माधिकरणं सभ्ये व्यवहारेक्षणाय च ।
सूर्ये च कोष्ठागारं स्यादन्तरे धनपक्षिणाम् ॥ १९ ॥
अग्नेः ककुभमाश्रित्य कार्यं पाकोर्विशालकम् ।
समाजमालयं पूर्णं विदध्याद् भोजनालयम् ॥ २० ॥
याम्ये चापशाला स्यात् सचिवस्त्वाश्रय पश्चिमः ।
चर्मापि शिल्पे कुर्यात् तथोऽस्याम्पाशुशालि च ॥ २१ ॥
सर्वकल्याणधर्मालयम् विदधीत प्रकृष्टते ।
याम्ये पश्चिमतो भूमिं कोष्ठागारं च कल्पयेत् ॥ २२ ॥
प्रेक्षागारनिकायानि स्युर्गन्धर्वं वासवेश्म च ।
कार्या चैत्यमतेः शाला स्थाना यन्त्रिणां तथा ॥ २३ ॥
पश्चिमोत्तरभागस्थां वापीमपि च कल्पयेत् ।
वा( पी ? पु )ष्करिणीपयसोर्गन्धर्वस्य च यत्नतः ॥ २४ ॥
कुर्यांश्चलसुरस्थानं सप्तप्रत्येकपालनम् ।
कुर्यात् तत्रोऽसुरालयसुप्तमालयं सम्पालिये ॥ २५ ॥
कार्यः स्वपनिका चैव वासावासपराङ्मुखः ।
क्रीडादोलादयाद् भूमौ कुमारीभवनं तथा ॥ २६ ॥
दन्तारभ्यसुरभिवाणि क्रमो विन्ध्ये स्थापयेत्सितम् ।
लक्ष्मीपादपदयानमदस्विन्नपदे विदुः ॥ २७ ॥

सुग्रीवपत्रसंसक्तमरिष्टारम्भितद्यम् ।
ह्रस्वसुग्रीवचि( च्छे ? च्छं )दापत्राङ्गुलो मनोहरः ॥ २८ ॥

चिबेषाशोककलिका जातिचारोगृहाणि च ।
लतामयपत्रसंयुक्ताः स्युरेव लतागृहाः ॥ २९ ॥

दारुशीलाश्च चान्यत्र पुष्पवीथ्यः सुकल्पिताः ।
पुष्पगृहे भवेद् य( त ? त्र )कामिन्यः पुष्पवेश्म च ॥ ३० ॥

मध्यमस्य पदे कुर्यात् वापीपानगृहाणि च ।
स्यात् कोष्ठागारमत्युरे कोष्ठे स्यात्पुष्पमन्दिरम् ॥ ३१ ॥

आपणागारं तु रैशान्ये निवध्यात् स्थपतिः स्थिये ।
प्रसूतलशिलायन्त्रमयर्कं चापपत्रकाणि ॥ ३२ ॥

नागकर्मान्तमप्याहुः भेयसी राजवल्लभि ।
स्यादौषधेरविज्ञानं रोगे दिशि मञ्जलनः ॥ ३३ ॥

मामाग्नी काय्यते स्थानं पदे नागस्य सूरिभिः ।
भवन्ति शुक्ले व्यायामस्नानविधगृहाणि च ॥ ३४ ॥

गर्भो स्थानं तथा कीर्त्याद्य भल्लाटनामनि ।
उपक्रमशेषो सौम्यस्य पुरोधःस्थानमिष्यते ॥ ३५ ॥

राज्ञोऽभिषेचनं चात्र धामाध्ययनशालाय। ।
चामरच्छत्रपात्र स्यात्मन्त्रवेश्म च भूधरे ॥ ३६ ॥

कार्दिग्नां चात्र कार्याणि स्थितः चतुर्वेदरक्षिप। ।
मिलेषा मन्दुराश्वाशाङ्कुत्वं चार्गलामितल ॥ ३७ ॥

महीधरस्थश्चैव चमाचतु रक्षिणाङ्गुली ।
कार्यां सर्वस्व चरमाणां चारसी राज्ञो यथायुधम् ॥ ३८ ॥

विहारो पश्चिमेन स्यात् वामेन च विधाभिलम् ।
वेश्मानि राजपुत्राणां निवध्यादरकाभिये ॥ ३९ ॥

तत्रैव विघ्नविगमकालामीनां निवेशयेत् ।
नृपस्य मातुरदितिस्थाने कुर्यान्निवेशनम् ॥ ४० ॥

पूषण्येव शिबिकायाप्यासनगृहं विदुः ।
नृपद्विपानां शाला स्याद्वायौ सदनकल्पना ॥ ४१ ॥

अभिषेचनकं स्थानमिष्टैव स्याद् विवाणिजाम् ।
आपवत्सपदे हंसक्रौञ्चसारसनादिताः ॥ ४२ ॥

स्युः फुल्लाब्जवनाः स्वच्छसलिलाः सलिलाशयाः ।
पितृव्यमातुलादीनां कार्यं वितथे गृहम् ॥ ४३ ॥

अन्येषामपि चात्रैव सामन्तानां महीपतेः ।
गेहान्यार्यमणस्थाने कोष्ठिकूलस्कन्धवेदिकम् ॥ ४४ ॥

कार्यं देवकुलं चात्र सुश्लिष्टमणिकुट्टिमम् ।
पर्जन्यस्य पदे होराज्योतिर्विद्गृहमिष्यते ॥ ४५ ॥

जये सेनापतेर्वेश्म विधेयं विजयप्रदम् ।
द्वारं प्राकारमाश्रित्य पदेऽर्यम्णः प्रशस्यते ॥ ४६ ॥

प्राग्दक्षिणाश्रितं पाककर्मान्तं पाकशाला च ।
विमृशेत् ब्रह्मणः स्थानमिन्द्रध्वजपुरं नृपाणाम् ॥ ४७ ॥

नवाङ्कुशानि वेश्मानि निवेश्यान्यसुराश्रयाः ।
गजाश्वशकटक्रौञ्चिभ्यो विधेयान्यानुपूर्व्यतः ॥ ४८ ॥

सभा यथादिक्स्थमथा नृपवेश्माभिमुख्यये ।
सर्वत्र नृपतेः सौधात् नृपसौधस्य सम्मुखाः ॥ ४९ ॥

यथाङ्गशोभिता यद्वा शाला कार्या विचारशिनाम् ।
इत्यास्पद सुरपद्मास्यपद्मल्पमार्ग-
मेतद् यथावदनुतिष्ठति यः सदैव ।
स क्ष्माभिमां भुजबलार्जितामरिपक्षः
ससागराम्बुराशिवसनां नृपतिः प्रशास्ति ॥ ५० ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे राजनिवेशो नाम पञ्चदशोऽध्यायः ॥

## अथ वनप्रवेशो नाम षोडशोऽध्यायः ।

प्रशस्तेऽहन्यपि गेहार्थं द्रव्यं विधिवदाहरेत् ।
गन्तव्यमेव विन्ध्येषु ऋतुष्वितरेषु च ॥ १ ॥

उपवास्यं च तेनैव पक्षेऽन्तं सेव्यं च वल्कलैः ।
प्रवेशार्थे स्थिरैः कार्यमारम्भः शास्त्रगैः परैः ॥ २ ॥

गत्वा शुभे शुचौ देशे निवेशं कारयेत् ततः ।
सन्निवेश्य कर्मान्तमन्नपानेन तर्पयेत् ॥ ३ ॥

शुक्लशुक्लपरीधानः क्षपायां समुपोषितः ।
शङ्कुयोरर्थं परीक्षेत स्वप्नलाभशुभाशुभम् ॥ ४ ॥

सुरश्मशानमार्गाम्बुकूपचैत्याश्रमोद्भवान् ।
देवौकश्चत्वरसीमान्तविषमस्थलनिम्नजान् ॥ ५ ॥

कटुकाम्लतिक्तलवणकषायेषु नखोद्गतान् ।
भग्नाद्भुतान् शिरोर्ध्वेषु सकण्टकांश्च त्यजेद् द्रुमान् ॥ ६ ॥

तस्मात् संलक्ष्य वृक्षाणां वर्णोक्तं लक्षणादिकम् ।
विकल्पीयाद् वयस्तेषां पत्राग्राद् वृक्षांश्च सन्त्यजेत् ॥ ७ ॥

शतानि त्रीणि वर्षाणां सारद्रुमवयः स्मृतम् ।
गृह्णीयात् षोडशादूर्ध्वं सार्धवर्षशतावधेः ॥ ८ ॥

वयसः परिणामेन निर्वीर्यत्वं यथा नृणाम् ।
प्रोक्तं तद्वद् द्रुमाणां च स्यात् तथा छिद्रपक्वता ॥ ९ ॥

भङ्गुराः सुषिरास्ते स्युः सकोटराः सरन्ध्रकाः ।
तस्माद्विर्मांसलत्वेषु शुष्कत्वचो वयोऽर्ध्वशोषिताः ॥ १० ॥

बालान् श्मशानचत्वरस्थान् दुःस्थितानपि च द्रुमान् ।
वर्जयेद् भग्नशाखांश्च शीर्णशाखाग्निनाशितान् ॥ ११ ॥

क्रव्यैरधिष्ठितान् पितृवनवालसंस्थितान् ।
वल्लिभिर्दुष्टबद्धांश्च वज्राहिकुलाश्रयान् ॥ १२ ॥

संशुष्कानेकशो भग्नान् मधुभिर्मक्षिभिर्वृतान् ।
मांसाशैर्व्याप्तानैलाद्रुन् भूमिजानपि पक्षिभिः ॥ १३ ॥

कुणालनन्द्यागुलान् बन्धसन्धोच्छ्रितान् गजक्षतान् ।
दुमनोऽपि वृक्षस्कन्धांश्छिन्नशूलांस्त्याज्यमानः ॥ १४ ॥

अकाले पुष्पफलिनो रोगैरपि च पीडितान् ।
बालभूतान् ह्रस्वकानां स्कन्धवन्ध्यानपीडितान् ॥ १५ ॥

खदिरो बीजकः सालो मधूकः शाकशिंशपा (पी? पे) ।
सर्जार्जुनाञ्जनाशोकाः कदरो रोहिणीतिलकः ॥ १६ ॥

बिल्वतुन्नो देवदारुः श्रीपर्णीपादपस्तथा ।
कुटुम्बिनामसी प्रोक्ताः पुष्टिदा जीवदास्तथा ॥ १७ ॥

वृक्षाणां लक्ष्यते येषां भारवारिसहिष्णुता ।
ते यथायोग्यमन्येऽपि चाल्यन्ते गृहकर्मणि ॥ १८ ॥

कर्णिकारवटप्लक्षकपित्थविभीतकद्रुमाः ।
शिरीषोदुम्बराम्रातश्लेष्मान्तकमोचचम्पकाः ॥ १९ ॥

निम्बाम्रकोविदाराश्च व्याधिघातश्च गर्हिताः ।
गृहकर्मणि येऽन्ये ते यत्नतोऽनिष्टदायिनः ॥ २० ॥

ये च कण्टकिनः कटुफलाः क्षीरद्रुमाश्च ये ।
सुगन्धयश्च ये तद्वत् शुभं तेषु पराङ्मुखः ॥ २१ ॥

स्वप्रमाणप्रकोपा तु नियतं दृश्यते यदा ।
द्रुमच्छाया तदा ग्राह्या नत्ययात्वात्तु स द्रुमः ॥ २२ ॥

मध्याह्ने लक्षयेत् वृक्षे सर्वस्यां दिशि तत्त्वतः ।
स्यात्तु यस्याधिकतरं पश्य तत्र कालं समादिशेत् ॥ २३ ॥

शोभनं न स्यादितो वृक्षं ज्ञात्वा लक्षणमेव च ।
अथाग्निकोटरं छिन्द्यात्तु सारसमन्वितम् ॥ २४ ॥
पीतरक्तं हरितवर्णं वृक्षं श्यामवर्णं पावकम् ।
द्विजान् सन्तर्प्य च स्वस्ति वाच्यं च स्थपतिस्ततः ॥ २५ ॥
पक्वापक्वामिषैर्मद्यैः मूलकैः सुरासवैः ।
गन्धैश्च धूपमाल्यैश्च बलिं दद्याद्विकालके ॥ २६ ॥
अपक्रामन्तु भूतानि यानि वृक्षाश्रितानि हि ।
कल्पनं वर्तयिष्यामि क्रियतां वासपर्ययः ॥ २७ ॥
मन्त्रः शिवः पुष्टिकरः प्रजावृद्धिकरो भव ।
स्वस्ति ( ते ? च )न्द्राग्नियमाः सूर्येन्द्रानलास्तथा ॥ २८ ॥
दिशो मध्यस्तथा पीताः पान्तु त्वामृषिभिः सह ।
अल्पेद् यो मानुषगिरा कल्पते चाभिमन्त्रितः ॥ २९ ॥
स साध्यः स्यात् तथा स्थानप्रवालकुसुमश्च यः ।
ततो भास्करमालोक्य वृक्षं कृत्वा प्रदक्षिणम् ॥ ३० ॥
सलिलाक्तेन विप्राग्रो छेत्ता स्थित्वोत्तरामुखः ।
प्राङ्मुखो वा ततं छिन्द्याच्छस्त्रैः तीक्ष्णैर्वितानकैः ॥ ३१ ॥
शाखिनश्छिद्यमानस्य जायते पयसश्च्युतिः ।
कम्पनं वा चलितोऽपि मृत्युः स्याद् गृहिणस्तथा ॥ ३२ ॥
यद्वा दधिमधुक्षीरघृतानि स्रवति द्रुमः ।
छिद्यमानस्तथा विद्याद् धन्यस्याभिमत् कुटुम्बिनः ॥ ३३ ॥
छलीव यस्य स्रवति श्यामः सोऽशान्तिको रसः ।
सुगन्धिः स्वल्पमधुरः कषायः स प्रशस्यते ॥ ३४ ॥
प्राच्यां शुभकरोः याम्यां उदीच्यां कार्यसाधकः ।
पात्यप्रकम्पनिपाते तु वारिणि कृत्वा शुभं व्रजेत् ॥ ३५ ॥
शान्तिः स्यात् तथा भीतिर्येऽध्यायं वर्षयेत् पतन् ।
वृद्धं स्रवति यो वृ( लं ? के ) छिन्नो वा धरणीरुहः ॥ ३६ ॥

सूक्ष्मस्तीव बाहुश्च स्थूलः सोऽत्र शुभप्रदः ।
कपोलयोः शृगालानां दर्शने भुजगस्य वा ॥ ४७ ॥
छेदे स्यात् कर्मविघ्नाय निगडैर्बन्धनाय वा ।
एलकाकवलाहकाद्यश्वकच्छपमादिदर्शनम् ॥ ४८ ॥
श्रीवृक्षवर्धमानादिदर्शनं वा शुभप्रदम् ।
उत्क्षिप्यते यदि श्वोरात् लवर्द्धिः स्यात् कुटुम्बिनः ॥ ४९ ॥
स्पर्शनः पादहानिः स्यात्विष्कम्भमाक्षिप्यते यदि ।
एकहस्ते पयोविकलशस्तोत्क्षेपदर्शने ॥ ५० ॥
दोषान् दोषविनिर्मुक्तान् पादपस्तु पलायते ।
वीरस्तं कल्पयेत् सम्यगनुलोमार्जवं नरम् ॥ ५१ ॥
छिन्द्याच्च शुभमर्थं शतभागाधिकं खनम् ।
तुष्टीसायकमध्यस्थ सम्यग्भौ चरणीकृतः ॥ ५२ ॥
शेषाणि मण्डलाभ्यस्य त( स्वर्णोच्छ्रे ? स्वर्णे ते )स्तनेऽपि च ।
मक्षिकाभे पितुर्मेदं कपिलाभे च मूषकम् ॥ ५३ ॥
पीतमासि तथा गोधां सर्पं दीर्घसितान्वये ।
शुक्लच्छाये मधु भवेत् कृष्णकालसमप्रभे ॥ ५४ ॥
गृहगोधा कपोताभे गैरेयो धूम्रवर्णभे ।
रक्तार्कनाभे पाण्डुरे कमलोत्पलभासि च ॥ ५५ ॥
वीणासिपक्षिवर्णे च मण्डके जलमादिशेत् ।
आकारो यस्य सर्पस्य वर्णो वा संप्रदृश्यते ॥ ५६ ॥
तं सर्पगर्भितं दूरमादिशेदविचारयन् ।
तस्करेभ्यो भयं कीटे सलिले सलिलाद् भयम् ॥ ५७ ॥
विद्यात् तर्ये विषाद् भीतिं पाषाणे भयमासितः ।
कलापिनोभद्रिपुच्छकृकलासभादिविषीनिलम् ॥ ५८ ॥
गोधावीचरमण्डूककुलसेया गर्भिते ।
सूचके पुनरिच्छन्ति मरणं वास्तुवेदिनः ॥ ५९ ॥

अमुनैव पथाऽन्यस्मै गृह्णीयाद्यमीप्सितः ।
क्षेमेण यद्यभिमतः स्यात्तस्मिन्नागमो यदि ॥ ५० ॥

पथान्तरे यथा क्षेमं सुभिक्षं च समादिशेत्
अर्घ्यदानविधिना विधानविद् पुष्पमालनिवहार्चयेद् गृही ।
मत्स्यपैतृककृसरायुपवर्जं पुष्पमुष्कलफलानि वर्णितैः ॥ ५१ ॥

इति महाराजाधिराजश्रीमदनपालविरचिते ... गमनवेधो नाम षोडशोऽध्यायः ।

---

## अथ इन्द्रध्वजनिरूपणं नाम सप्तदशोऽध्यायः ।

सुराणामर्थसिद्ध्यर्थं वधाय च सुरद्विषाम् ।
यथा शक्रध्वजोत्थानं प्रवृत्तं तथोच्यते ॥ १ ॥

भगवन्तमथाम्भोजसम्भवं चक्रसंपतिः ।
प्रोवाच कथमिन्द्रेण जेतव्या विबुधाहिताः ॥ २ ॥

सोऽब्रवीत् सर्वदेवानां ध्वजं कुरुत सत्वराः ।
तं चाभिवार्य दैत्यैर्न्यैः क्षुद्रकृत्योऽभिमतिनिनाशम् ॥ ३ ॥

स्थितं चोपरि यन्त्रस्य सम्यक् पश्चिमलान्वितम् ।
जयन्तो देवसैन्यस्य भयन्तो दैत्यस्य द्विषः ॥ ४ ॥

सहस्रधारमत्युग्रमन्यं रिपुकुलान्तकम् ।
विष्णुरूपमयं साक्षाद् ध्वजमिन्द्राय दुर्धरम् ॥ ५ ॥

वीर्यं प्रवर्धते चेदिरैलवर्षं विधीयते ।
कर्णगानेन निर्देशात् यान्तः पाशूल् अपोहिति ॥ ६ ॥

चरैधी नमश्च क्षिप्रमक्षकचेनसा ध्वजम् ।
यन्त्रस्थितं स देवानामपोद्धृतवान् हरिः ॥ ७ ॥

जातिङ्गा बस्यो वहा विनोदैवात्यामिनी ।
जलजकुसुमालोक्य सहजश्च विभूषणैः ॥ ८ ॥

तेजो वीर्यं वपुश्चोक्तं बलमप्येव पक्ष्मणाम् ।
आहरच्चाकुलिश्यानां तेजस्वी नरतां ध्वजः ॥ ९ ॥
तमभ्यर्च्य सुराधीशः शत्रून् बलवतोऽप्यसौ ।
निःशेषानाशयद् युद्धे कुलिशेन बलाद् बली ॥ १० ॥
ततः श्रीमत्समृद्धेऽस्मिन् दैत्याघे हृतको रिपौ ।
त्रैलोक्यराज्यं प्राप्याप्यबिभ्रद् बलनिषूदनः ॥ ११ ॥
स सर्वलोकमभ्यर्च्य सर्वलोकाभिपूजितः ।
ध्वजमभ्यर्च्य तुष्टाव वाक्यैश्चाभिपूजयन् ॥ १२ ॥
ततस्तमभितो वीक्ष्य ध्वजं प्रोवाच वासवः ।
इमं त्वदाज्ञया लोकाः करिष्यन्ति तवार्चनम् ॥ १३ ॥
पीड्यमाना निमित्तानि भूमिपालाश्च पार्थिवाः ।
ततः प्रभुरसौ लोके सर्वलक्षणसंयुतः ॥ १४ ॥
परचक्राभिभूतस्य नृपैः राज्यध्वजोऽर्प्यते ।
दुर्गमायतनं वह्निचरणं वेदिकाः कृताः ॥ १५ ॥
विविधाः स्थालिकापाका भक्ष्यपानानि यानि च ।
एतान्यापन्नतास्ताड् सुवर्णपात्राणि प्रकल्पयेत् ॥ १६ ॥
विजेतुं यदि वाञ्छन्ति दुर्जयान् द्वेषिणो रणे ।
तेजो बलं यथाशास्त्रं नरेन्द्रः कारयेद् ध्वजम् ॥ १७ ॥
सेनायां वा पुरे वापि प्रतिष्ठाप्य पुरन्दरम् ।
विजयार्थं महीपालैरभिषेकमवाप्य च ॥ १८ ॥
यथा वा कल्पयोगेनाभिधानं जगतीभुजः ।
करिष्यन्ति तथा सम्यक् कार्त्स्न्येन प्रतिपाद्यते ॥ १९ ॥
वनादुपाहृतं वृक्षमथ प्राग्विधिना सुधीः ।
पाद्यार्घ्यादिभिरभ्यर्च्य गन्धैर्माल्यैरलङ्कृतम् ॥ २० ॥
द्विजान् संपूज्य च शुचौ देशे सम्यक्समाहितः ।
पूर्वामुत्तरतो वा यष्टिमप्याधिकारयेत् ॥ २१ ॥

षाड्गुण्यं वा चतुर्वाथ सप्तभिः कर्णिकादपि ।
कारयेत् सर्वरम्याणि ध्वजपूर्वाणि शिल्पिभिः ॥ २२ ॥

वेधं द्वात्रिंशता हस्तैर्वितस्त्या कुलपाश्रिता ।
दार्वं स्याच्चतुरस्रं तच्च चतुरस्रायतायतम् ॥ २३ ॥

मूलविस्तृतिरायामाद्द्वात्रिंशं करे करे ।
विष्कम्भोऽग्रे च मूलार्धात् तदर्धेनाथ चतुर्थेऽप्यपि ॥ २४ ॥

ध्वजमूलादधःपीठं विस्तारात् कुम्भमिष्यते ।
विस्तारार्धेन च स्थूले स्थूलत्वात्रिगुणायतम् ॥ २५ ॥

ध्वजविस्तारबहुलं साष्टभिर्वाङ्गुलविस्तृतम् ।
कमपीठं विधातव्यं सार्धांशार्धं शुभावहम् ॥ २६ ॥

दण्डिनो ध्वजकुम्भेन वेधः स्यात् कमपीठगः ।
कुम्भकोणविनाहूतात्पदी कोटिक्षुपावनी ॥ २७ ॥

कार्याविस्तृती चमसभूती चापविस्तृतिविस्तृती ।
नपुंसिवेषे नाचेत( चि ? दि )स्तलोर्ध्वगुणोच्छ्रिती ॥ २८ ॥

ध्वजायतिचतुर्भागात् पीठमत्र प्रकल्पयेत् ।
सशुभप्रतिष्ठितं मध्ये प्राक्तयोः स्तम्भधारितम् ॥ २९ ॥

तत्पीठस्तम्भयोरन्यां द्वाराभ्यामभितः दृढम् ।
पार्श्वोत्तरपतिकोणं प्राक्सूत्रं सुद्वारार्गलम् ॥ ३० ॥

केतुव्यासार्धविस्तारं तद्दैर्घ्यार्धार्धकोणविस्तृतम् ।
विस्तारसप्तभागायामं मध्ये स्यात् पक्षिणो दृढम् ॥ ३१ ॥

सङ्कुल पीठिकास्थूली च बाहू स्तम्भविनिर्गती ।
पाककाला कुम्भार्धेन ध्वजविस्तृतिविस्तृताः ॥ ३२ ॥

शिखरभागात्र सर्वेषां स्वविस्तृतिचतुर्गुणाः ।
कार्या वा पञ्चगुणिताः सप्त ( का ? वा ) मूलच्छेदा( दे ? नः ) ॥ ३३ ॥

कन्यानामुत्तमः प्रोक्तो यः च( यो ? )ङ्गाङ्गिलसंयुतः ।
एकहमाना तु सर्वाभ्यः स्यात् तदर्धांशालोऽधिकम् ॥ ३४ ॥

वेधः सविस्तरैः क्षत्रमाने स्यात् कन्यकोत्तमात् ।
निर्वेधमातुरश्मः स्यात्सूर्केदस्य समाश्रितः ॥ ३५ ॥

निर्वेधावस्य चोर्ध्वाधः ससीमाम्बरवर्तिनी ।
कार्यौ सूचीद्वयधावन्यौ सूचीमानप्रमाणतः ॥ ३६ ॥

कन्धराभ्यासविभागेन सूची विस्तारतो भवेत् ।
पादोनाङ्गुला चाङ्गुलका दृढसंहिता ॥ ३७ ॥

कुमारीव्याससंयुक्ता द्विगुणा तत्सदायतिः ।
स्तनपृष्ठान्तरं ज्ञात्वा मध्ये संयोजयेत् ततः ॥ ३८ ॥

तयोरधस्तदर्धेन सुगतल्पौ सुचिविस्तृतौ ।
सेनस्य वेधितं कार्यं सव्यमध्ये सूचिकान्ययोः ॥ ३९ ॥

सार्धाङ्गुलेनतमूलार्धं लक्कटे विस्तृतायती ।
आधारण्यां योजयेत् सम्यक् द्वे बाहुकवेधयोः ॥ ४० ॥

पञ्चाङ्गामपि तुल्यैव कन्यानां स्यात् प्रकल्पना ।
कृत्स्नानुपूर्व्या यन्त्राणि स्थापयेदखिलान्यपि ॥ ४१ ॥

आश्विने मासि पक्षे च धवले प्रतिपत्तिथौ ।
स्थिरोदयैर्ग्रहैः सौम्यैर्वीक्षिते स्याच्छुभेऽपि च ॥ ४२ ॥

पौरजानपदैः सर्वैश्चापि द्विजभ्यर्चितेन च ।
यन्त्राण्युत्क्षिप्य वर्णि च कर्मस्थापकवेदिकम् ॥ ४३ ॥

चित्रधविलस्राकीर्णां यष्टिं तत्रावलम्बिताम् ।
चूर्णैः सर्वौषधीमिश्रैः स्थपतिः स्नापयेत् स्वयम् ॥ ४४ ॥

जलाशयात् समुद्धार्य पूर्णां कलशसम्पदैः ।
प्रगल्भां स्थापयेत् चारुहस्तिभ्यां प्राप्तसद्गुणाम् ॥ ४५ ॥

अङ्कोलपिप्पलपालाशैर्विल्वाश्वत्थकषायकैः त्रिभिः ।
विभिद्य च वर्तिं विद्धु द्विजातीन् स्वस्ति वाचयेत् ॥ ४६ ॥
विन्यस्य सुचिरं तत्र सर्वमङ्गलनिस्वनैः ।
पञ्चाङ्गं वासयेद् वर्तिं शुभां वायवरैर्निशि ॥ ४७ ॥
नक्षिकेयाद्रि पत्राणि सर्वाण्यपि च पंक्तिवत् ।
[illegible] प्रवेशयेत् ॥ ४८ ॥
सुस्निग्धेऽस्य ध्वजस्थाने पञ्चरत्नादिभिर्जलैः ।
नवार्घविस्तृते दिव्यगर्भे समे प्रागायते शुभे ॥ ४९ ॥
विमलेऽत्र विभागान्नेकाशीत्या ततः क्रमात् ।
विन्यस्यासनं सर्वासु देवतासु यथाक्रमम् ॥ ५० ॥
प्राक्षि मध्ये पैतृपदे गन्धपुष्पाक्षतो विधिः ।
मध्ये विष्कम्भमानेन पाषाणौ विनिवेशयेत् ॥ ५१ ॥
सूक्ष्मसुवर्णपद्मकुल्माषतपोक्त्रांशुकोनयोः ।
न्यस्येत् स्वकर्मैः तयोः पीठं मध्ये च विनिवेशयेत् ॥ ५२ ॥
पीठिका निर्गता बाहुयुग्मात् तन्मध्ययोगतः ।
स्तम्भिकन्यौ रोपयेद् मार्गं पक्षचतुर्गं स्थिते ॥ ५३ ॥
पतितोऽभ्यभिदु द्वौ द्वौ बाहुद्विगुणमात्रितौ ।
बाहुभ्यः मानपञ्चोर्मैकयोर्विनिवेशयेत् ॥ ५४ ॥
मध्यतो मङ्गलायतौ ज्ञात्वा चक्रस्योर्ध्वं कर्णे क्रमात् ।
योजयेद् यमलयोर्यानी युग्मपादाग्रयष्टिरी ॥ ५५ ॥
मङ्गलात् पश्चिमदिग्भागे चक्रस्याभिमतं पदम् ।
भद्रां निवेशयेत्तिसमानमा लक्ष्मानवम् ॥ ५६ ॥
स्युः पर्वस्थानानि शस्तानि (हस्ता ? हस्त )र्ध पञ्चाशिनाः ।
कण्ठान्तरोपमन्याकिपवपाकिपविकल्पाभिधाः ॥ ५७ ॥

चिन्त्यमानास्वथ सर्वासु कुमारीषु विचक्षणः ।
सुपक्वायः प्रतिष्ठोऽसा योज्या शास्त्रीय चाक्षतः ॥ ५८ ॥
निखिलपक्वतिलं कृत्स्नं भावयेत् पञ्चवेदनः ।
प्राप्नोति नचिराकन्यां नवु कृत्स्ने कृतां च तद्गताम् ॥ ५९ ॥
पीठीहस्तसमं कन्याचार्यांश्चपोकनयोरपि ।
कुर्याद्वृत्तसमुन्नं कीलकैर्वृत्तमायतैः ॥ ६० ॥
संमितामुच्छ्रितामुन्नां पीठीं चोपरि सम्भृताम् ।
कारीयात् कीलकैर्दीर्घैर्न्यस्तभित्तिपतलाङ्कले ॥ ६१ ॥
यन्त्रकर्मणि निर्वृत्ते इति शास्त्रविधानतः ।
प्रवेशयीत स्वस्थाने चित्रशालाविधिक्रमे ॥ ६२ ॥
स्नानस्य विधिवत् पञ्चगव्यप्रलेपितस्य च ।
श्रीखण्डाद्यैः सुरभिभिः कुसुमैरर्चितस्य च ॥ ६३ ॥
रोहिण्यादिषु ऋक्षेषु क्षिप्रमैत्रेऽथ वक्षितः ।
प्रवेशनमभिनन्दन्ति करणेष्वर्चितेषु च ॥ ६४ ॥
स्वपतिर्वा पुरोधा वा शुचिः स्नातः समाहितः ।
गन्धमाल्यार्चिताद् विप्रास्तर्पयेद् दक्षिणादिभिः ॥ ६५ ॥
ततो मङ्गलघोषेण वादित्रनिनदेन च ।
पुण्याहजयशब्दैश्च स्तुतिप्रेषैः समाहिताः ॥ ६६ ॥
अलङ्कारधुनः पौराः प्रहृष्टमनसोऽभितः ।
नीयन्तो पक्षिणः पात्काः मङ्गलविमनाश्च ये ॥ ६७ ॥
स्तुवीरन् पुण्यमनसः स्तुतिभिः सूतमागधाः ।
नन्देरन् बन्दिनश्चैव सेवेरन् गणिका अपि ॥ ६८ ॥
प्रविशत्स्वं निजं स्थानमनुगम्योत्सवादिभिः ।
सुराधिपं बलाभावर्षां रक्तायमयामान्वितः ॥ ६९ ॥

सोऽन्त्यजलकलशहस्ताराचसुरवराः शुक्वा यदि ।
उत्क्षिपेयुः प्रहृष्टा वा कौतुकी सुरभिगन्धम् ॥ ७० ॥

तथा भवति भूपालो जयी नन्दन्ति च प्रजाः ।
राष्ट्रे सुखं पुरे हर्षो सर्वसस्यवती मेदिनी ॥ ७१ ॥

ध्वजस्तूत्थापितः कृच्छ्राद् यदि चाप्यार्द्रः स गौरवात् ।
तथा नृपतिरस्थैर्ये महतीं विमनस्कताम् ॥ ७२ ॥

स्खलन्तो दुःखिता दीना निःश्वसन्तः पदे पदे ।
वैक्लव्यभाजो गच्छेयुर्यैर्वाहृतमलिनया ध्रुवम् ॥ ७३ ॥

भूमौ यदैकदेशेन कुलिनः पतन्ति ध्वजाः ।
न सुभिक्षं न च क्षेमो न राज्ञो विजयस्तथा ॥ ७४ ॥

शीर्णे भग्नेऽथ पतिते कृत्स्ने चापि समुद्धृते ।
स्यान्नृपस्यावनिक्षेपः सुतभ्रंशोऽथवा मृतिः ॥ ७५ ॥

यष्ट्यालङ्कृतिमाल्यानां हरणात् पतनादपि ।
नाडिकाद्यपरिभ्रंशैः पौराणां भवति ध्रुवम् ॥ ७६ ॥

पुरं भवति निःशब्दं निध्यानं वा प्रवेशने ।
समुच्छ्रये वा जनस्य तदा नरपतिर्भ्रंशमेति ॥ ७७ ॥

पार्श्वे नवस्थानमनालीनं शीर्षे कुलमविरक्षतः ।
प्राग्वत् प्रदक्षिणं स्थापयेत् प्राग्वत् सायके विशे ॥ ७८ ॥

कुर्यात् तत्रैव सम्भो हस्तपात्रस्थानमरेणिषुः ।
ग्रामे कुम्भे च संयोगं यथा भागविकल्पितम् ॥ ७९ ॥

कुम्भे संयोज्यमाने च ध्वजो निपतति क्षितौ ।
तदा नरपतेः स्थानभ्रंशो भवति निश्चितः ॥ ८० ॥

कुम्भयोगे यदा यान्तो मानवाः पतिष्यन्ति ।
तदा स्यात् स्थपतेर्मृत्युर्भवेद् भङ्गश्च पक्षिणे ॥ ८१ ॥

अथैवं प्रतिपत्त्येन न्यासविधिं कुण्डगः ।
प्रमादात्तिलकाया रात्रौ जायते व्यसनं महत् ॥ ८२ ॥
शिखाकुण्डे योजितः चामुण्डो विफले यदि ।
विधिकर्माणि तथा सन्धिः सामन्तैः सह भूपतेः ॥ ८३ ॥
स्फुटेत् मध्येन वा कुण्डे योज्यमानोऽथ सर्वतः ।
तथा मध्ये स्वपक्षादिः स्फुटनात्कुलनाशनः ॥ ८४ ॥
अविदीर्णमपर्यन्तमव्यक्तमविलक्षितम् ।
यथावन्न्यासमाप्नोति योगं येषु वासवध्वजः ॥ ८५ ॥
धनपुत्राङ्गनापत्यैः सामन्तैश्चान्वितोऽनुगैः ।
निरातङ्को बलाढ्यश्च वृद्धिमेति तथा नृपः ॥ ८६ ॥
आत्मनो रक्षणार्थस्य शान्त्यास्त्वर्थं च वज्रिणः ।
तत्राङ्गान्यखिलान्येव कुण्डान्यापीति योजयेत् ॥ ८७ ॥
ऐन्द्रं बलाकं यमौर्वं सर्वमायं त्रिमाक्रमम् ।
मयूरं चेन्द्रजीवं च चित्रकाञ्चनकाभिधः ॥ ८८ ॥
क्रमयमाणेन कर्तव्यं रूपसरूपसमन्वितम् ।
तदाकर्षाकारान्तरेष्वेषां सन्धयो वज्रनिर्मिताः ॥ ८९ ॥
मूलादग्रमध्यपर्याप्तैः सर्वाभिर्विकलैर्वृतैः ।
गुणैश्च वेष्टयेदेनं पीतैः सितपीतैर्ध्वजम् ॥ ९० ॥
साङ्कुमिका व्यजनाद्येन सर्वतोभद्र विस्तृतिः ।
विधेया वाकचित्रकृत्येष्वप्यस्तु तदर्धतः ॥ ९१ ॥
अष्टिमात्री दिशः कृत्वा वेदाङ्गुलयहिते ततः ।
न्यसेत् त्रिगीर्वाश्चतुरस्रस्योपरि यथाविधम् ॥ ९२ ॥
पञ्चांशेयागते कुर्यात् वज्रिणः पिठके कृते ।
शेषाणम्यजमायोन्मथितम् न्यसेद् यथाक्रमम् ॥ ९३ ॥

बलाकशरीति चित्रलुता चकोराणि चोत्पिञ्जी ।
कर्कोटकानि वृन्ताकि रामठीकलकानि च ॥ ९४ ॥

मधुपालचित्रपर्णा ( स्रोतस )सिद्धयः पिचकोद्भवाः ।
पीताशिषूलकंसज्जनंगंमैकैकालय मसारुणिताः ॥ ९५ ॥

सुखान्तानामारण्यचिन्तानां चलस्य चतलोऽपि च ।
बहुमत्स्याश्च मार्गाः च चपले राहु( मोष )स्य च ॥ ९६ ॥

केतुश्च श्मशानविस्तारा रक्तोऽश्वी सुवर्लिनाः ।
विशेषाः स्वर्णकाञ्चनास्मविद्युत्कान्तयो रत्नाः ॥ ९७ ॥

छाविलं च( चित्रि )भिः सूर्ये कुस्तीसहितं शुभम् ।
चकोरालकविन्यसे चित्रपाकसदंषम् ॥ ९८ ॥

शर्केन्दुमधुनारात्रे वेणुपुत्रेन्द्रवीर्यकम् ।
साष्टकष्टगुणं वण्डसूत्रावर्तीम्बितं शुभम् ॥ ९९ ॥

सहस्रपत्रलङ्कपार्थं शुभचक्रमलङ्कृतम् ।
हेममिश्रितमहाभिः सन्नतानि मिश्र रज्जुभिः ॥ १०० ॥

व्यवपदं विचरपाय चित्रे सुरचितं तथा ।
निमित्तार्थं च लोकानां चोमाहेनोर्ध्वजस्य च ॥ १०१ ॥

सचलमपुरागमगर्भचित्रताशुरम् ।
मिश्रितं जगत्ताकेन्द्रमसिकाद्रिमाकुलम् ॥ १०२ ॥

चक्रवाले रविर्निर्मदं ( साधु )बिम्बलं च चलके ।
बिम्बकेतु नमस्मस्तृकमयोमालासमाविनम् ॥ १०३ ॥

मधोच्चगीतवादित्रमङ्गलैश्च संयुतः ।
नद्ये जागरः कार्यः समसलोय तां चित्रताम् ॥ १०४ ॥

पुरोहितस्ततो भास्करपूजिते प्रयतेऽद्विजः ।
अग्नेः परिसरे कुर्यान्मूलस्य प्रशुद्धविधिः ॥ १०५ ॥

कुम्भोपवेशनं तस्मिन्पुरोक्तान्युपलक्षणम् ।
संस्कृत्यास्तीर्य दर्भांश्च ध्यात्वैवं तत्र पावकम् ॥ १०६ ॥
समाज्यपात्रमाज्यार्थं च गन्धांश्च कुसुमानि च ।
धूपमाला चामरीयाणि समिधश्च यथाक्रमात् ॥ १०७ ॥
सौवर्णीं कुण्डकुण्डाग्निं सदर्भं च ततोऽपि च ।
इत्येतत्सर्वमाहृत्य जुहुयात् पावके ततः ॥ १०८ ॥
शुभस्नानयतस्यसैन्ययुक्तस्य भूपतेः ।
विजयायाभिषेकार्थं शान्तिविधायिभिः ॥ १०९ ॥
सुस्नातः सुमहार्घेश्च विभवैर्युक्तोऽपि च स्वयम् ।
शान्तिमाल्य सुरभिर्निर्मलं होमार्थं स्थास्यतेऽनलः ॥ ११० ॥
नानाभूषणसंयुक्तो लाक्षारसः किंशुकच्छविः ।
सुवर्णविद्रुमाशोकसुरगोपसमद्युतिः ॥ १११ ॥
छत्रध्वजकुम्भपद्मचक्रस्वस्तिकाकारतोरणैः ।
सहस्रार्चिः प्रशान्तोऽर्चिर्माल्यैरपरैस्तथा ॥ ११२ ॥
स्निग्धः प्रदक्षिणशिखो विधूमो विपुलोऽनलः ।
कुम्भितस्तोयदः मोक्षो दीप्यमानमिदं तथा ॥ ११३ ॥
रूक्षो विवर्णः पवनः पीतो वा नीलकोऽथवा ।
चिटचिटाको भैरवरावो वामावर्तशिखोऽल्पकः ॥ ११४ ॥
गन्धार्चिर्दुर्गन्धिकुष्ठोऽसुखदुःखाश्च स्फुलिङ्गवान् ।
धूमाकुलः सफेनश्च कुलिङ्गं न जयावहः ॥ ११५ ॥
कर्मणां संभवं वह्निर्दीप्यमानापराणि वा ।
धूपमानो वहति वेदनाविसर्जनैर्विनिर्दिशेत् ॥ ११६ ॥
होमे योऽस्मर्पयेत् पीठे धूपमाणो यथाविधि ।
शुभोऽभीष्टफलदः स्यात्कृतः स्यादुपकर्षणात् ॥ ११७ ॥
सर्वतो वाञ्छितायो यः स वर्धयति पार्थिवान् ।
यो विधिं शान्तिं च व्याकालस्यो विजयमादिशेत् ॥ ११८ ॥

दुर्वर्णान्यपि दुर्गन्धि मलिनमशुचिकश्मलम् ।
काष्ठं शल्यप्रकारं प्राङ्मुखे यत्र भवन्ति ॥ ११९ ॥
हीनाधिकप्रमाणानि विकृतानि कुशमलिनाः ।
कालकर्कशुमोल्पानि समिधोऽर्धकृतानि ॥ १२० ॥
स्वर्णाणि सशुष्काणि विभिन्नानि समस्तुनानिकृताः ।
कुर्वन्त्युपद्रवं सर्वा दुष्यकृष्णाश्च ये तथा ॥ १२१ ॥
दुष्टानि पांसुकीर्णानि कीटजग्धनिलानि च ।
शीर्णानि शीर्णनाशाय स्फुटस्फुटानि यानि च ॥ १२२ ॥
माल्यं किमपि म्लाने न जीर्णं न छिन्नं च यत् ।
कीटैः कपिलपीतैश्च न जपाय न पूजये ॥ १२३ ॥
शिलाशीर्ण्युत्सुनास्युपयुक्तपितास्फुटितानि च ।
दुर्भिक्षरोगकारीणि प्राहुः पात्राणि सर्पिषः ॥ १२४ ॥
मधुघी पलितो च स्वाम्यक्षिकाकीटदूषिते ।
घली च खलमेके च कुम्भारः पैषाधास्तित च ॥ १२५ ॥
यथोक्तान्यरूपाणि सर्पिरादीन्यनुक्रमात् ।
भवन्ति राष्ट्रस्योपैधाय निखिलान्यपि ॥ १२६ ॥
विलीर्य गन्धमाल्यादीन् देवतास्यो यथाविधम् ।
पुरोधा शयनीयांश पीतवित्ता क्षिपेद् वहिम् ॥ १२७ ॥
पञ्चभिर्वेकलभिन्नमा द्विजः कुम्भानुपदिशान् ।
पीतमुत्तपुराणम् भूरिगन्धमाल्यैः कलशकुम्भाम् ॥ १२८ ॥
द्रुतान् वस्त्रकर्मिरतान् सुहृदो वेदपारगान् ।
सदाःप्रियान् पूर्णकामान् समर्पान् सर्वतः शुचीन् ॥ १२९ ॥
छत्रादित्यान् धर्मशीलान् शीलवृत्तान् ब्रह्मनिष्ठान् ।
अनुग्रहकृदृत्विजश्चाहूय (१) दीक्षितान् व्याधिनाकृतान् ॥ १३० ॥
यथोक्तं दक्षिणाभिस्तान् संपोष्य पञ्चकालेन वा ।
सहस्रैर्वा प्रीतमनसः कुर्वन्तु स्वस्ति वाच्येत् ॥ १३१ ॥

साकं गीतैर्वाद्यैश्च नृत्यैः सुवीणादिविभूतिभिः ।
स्वर्णिभैरपिविधैर्मुकुटे चाभूषणसम्पदैः ॥ १३२ ॥

स्तुतिभिर्जयशब्दैश्च स्तुतिभिश्च द्विजोत्तमैः ।
शान्त्यम्भोऽप्युपयोगैरालभ्य च महीपतिः ॥ १३३ ॥

कुर्वीत सर्वसत्त्वानां मोक्षं हिंसां समुत्सृजेत् ।
घोषणां जनपदस्यापि यथार्हं दिवसेन वै ॥ १३४ ॥

शुभारम्भे भूमिपतिः स्नातः सदाचारप्रयत्नवान् ।
स्वयोग्यकार्यं शुचिर्नृपः सबलः प्रतिपालयेत् ॥ १३५ ॥

सोपवासः शुचिः स्नातः प्रयतो विशिष्टैर्नृपः ।
कृताञ्जलिपुटश्चैनं मन्त्रं स्मरन्निरूपयेत् ॥ १३६ ॥

ओं नमो भगवति वाग्देवि सर्वसिद्धिप्रदायिनि स्वाहा ।
सुरासुराणां सद्भावे प्रसूते हर्षं पयोनिधिः ।
तथा नृपस्य देवेन्द्र अप्यायोजित ऋषिभिः ॥ १३७ ॥

स्तुत्वेति स्नपनीयस्य कृत्वा चाद्युपचितम् ।
कारयेत् देवराजस्य स्नानपञ्चकसत्कुम्भकम् ॥ १३८ ॥

स्थलपूर्णैः सितसच्चन्दनपानकपूरविलेपनैः ।
चीरैर्जातिपत्रैस्ताम्बूलं क्रमशः परिचारकैः ॥ १३९ ॥

सालिकुसुमदीपधूपगन्धादिविविधमनोज्ञकैः ।
पुष्टैरन्यैश्च वादित्रैर्जयमङ्गलस्वनैः ॥ १४० ॥

नायकैश्च नर्तकैश्च गायनैर्वैतालिकैः ।
कुब्जोत्कुब्जोत्तमस्थानैर्विविधजनवादिभिः ॥ १४१ ॥

नैश्च वादित्रनिनदैश्चैव पुष्पाञ्जलिस्वनैः ।
एवमब्धिभिराहूते सम्यक् स्नानकुम्भकैस्तु ॥ १४२ ॥

पञ्चामृतस्नानमानस्य तत्तोयपूजयामास्य च ।
नृपशिबाहनादीनां निमित्तान्यवलोकयेत् ॥ १४३ ॥

कुट्टनीमिश्रितामोदं चलाकार्पणोज्ज्वलम् ।
चित्रपटकृताटोपमखण्डकुसुमभूषणम् ॥ १४४ ॥
नववस्त्रमाल्यालङ्कारसंकीर्णध्वजपताककम् ।
मकरध्वजसंकीर्णाङ्कमधिष्ठितं सुरेश्वरम् ॥ १४५ ॥
समभूम्यां समाविष्टपवनचलनसङ्कुलम् ।
अविलम्बितनिर्घातनिम्नकुमार्गसङ्कुलम् ॥ १४६ ॥
इत्थं शक्रध्वजोत्थानं कुर्वन् राज्ञो जयावहम् ।
पौरजानपदानां च क्षेमारोग्यसुभिक्षकृत् ॥ १४७ ॥
यदा शक्रध्वजः प्राचीमुच्छ्रितः प्रतिपद्यते ।
तदाग्निगणनक्षत्रपथप्राप्त्यासिसुभिक्षदः ॥ १४८ ॥
आग्नेयीं ककुभं याते वर्धन्ते वह्निजीविनः ।
प्रारब्धकार्यनिष्पत्तिरयत्नादुपजायते ॥ १४९ ॥
दक्षिणां दिशमायाते केतौ मनुजविद्विषः ।
तदा स्युर्वैश्यलोकस्य पुत्रायाभ्युदयर्द्धयः ॥ १५० ॥
सर्वाशासंश्रयः क्षेमा जायन्ते नैर्ऋताश्रिते ।
न स्याद् गर्भो वृथा तद्वद् भयबन्धनभयं न च ॥ १५१ ॥
श्रिते प्राचेतसीमाशामभितम् शत्रुजयो भवेत् ।
क्षुत्तृष्णादिभयं न स्याद् वृष्टिरिष्टा च जायते ॥ १५२ ॥
कुसुमसस्यफलर्द्धिः स्यात् केतौ वायोः श्रिते दिशम् ।
चतुष्पदविवृद्धिश्च रोगोच्छित्तिश्च जायते ॥ १५३ ॥
चतुर्णामपि वर्णानां सम्पत् स्यात् सौम्यदिग्गते ।
विशेषात् सा द्विजेन्द्राणां तथा सिध्यन्ति चाध्वराः ॥ १५४ ॥
ऐशीमाशां श्रिते धर्मपरो भवति पार्थिवः ।
वृद्धिर्धर्मपथस्य स्यात् तथा यायजिनामपि ॥ १५५ ॥
यदि किञ्चिद् भजेत् पूर्वं स्वकाष्ठातः पतद्ध्वजः ।
विजिगीषोर्नरेन्द्रस्य तदा यात्रा प्रसिध्यति ॥ १५६ ॥

मणिकर्णं लभते भूमौ श्लथं विनश्य यदि ध्वजः ।
सशैलकाननामुर्वीं तदा जयति पार्थिवः ॥ १८७ ॥

द्विजस्वर्णेषु फलं पौरजानपदस्य वणिजः ।
विपरीतं तदेवोक्तं ध्वजस्य निहितं पुनः ॥ १८८ ॥

यदि स्वस्थलच्युतः पूर्वं प्रोत्थाप्यमानः शतक्रतुः ।
उत्क्षिप्तो रज्जुयन्त्रेण स्तोकमर्धे स्थितोऽपि वा ॥ १८९ ॥

शय्यायां यदि वा भूमावुत्सङ्गे वा पतत्यसौ ।
तदा सर्वं राजदारान् कुमारं वा विनाशयेत् ॥ १९० ॥

उत्थितोऽर्धोत्थितो वापि यदि कुम्भानि कम्पते ।
स्थानान्तरं व्रजेद् वापि सञ्चरेद् वा कथंचन ॥ १९१ ॥

वियद्भागे तदा भूपो व्रजति स्थानतोऽपि वा ।
कथाज्ञानयो वास्य चलत्येव न संशयः ॥ १९२ ॥

अकस्माद्वा यथाकालं छिद्यन्ते वापि रज्जवः ।
अमात्यमरणं तत् स्यादेकैकार्धेन निश्चितम् ॥ १९३ ॥

मूलमध्याग्रभागे वा प्रोच्छूनो यदि भज्यते ।
पौरसेनापतिनृपान् क्रमशो हन्त्यसौ तथा ॥ १९४ ॥

छत्रार्धचन्द्रगुल्मेन्द्रवर्णिकण्ठपुष्पा यदि ।
यातस्मिन् भुजाविष्टो वा तदा हन्ति महीपतिम् ॥ १९५ ॥

वृषो धनमवाप्नोति निर्मितैः पतितैर्भुवि ।
अश्वैर्विभिन्नैरेतैः क्षयं व्रजति साधनम् ॥ १९६ ॥

क्रमशो हन्युराचार्यमित्रपत्नीस्तुतात्मजाः ।
पतनस्थो हन्त्यमुनाथपुरोधःशीर्षहीपतेः ॥ १९७ ॥

तालैर्विभूषणैर्वर्णैः हाहाकारककारावैः ।
यस्मिन् वेणुध्वनिरेते राज्यस्यान्येव संक्षयम् ॥ १९८ ॥

चीर्यन्ते वाकनिरक्षं कुड्येभ्यः काकवेश्म वा ।
यस्यां ककुभि तन्नाशुर्वाणि पूर्वं विपश्चितः ॥ १६९ ॥

गेहे मृगशीलकटाक्षसर्गैतामनुक्रमात् ।
पीडा सञ्जायते वैश्याद्यपतीनेदिरक्षिणाम् ॥ १७० ॥

भवा प्रमादाद्यपदैर्वा मञ्जुमातृकुमारिकाः ।
राज्ञ इन्दुर्भवैर्नृत्य पिपासामातृश्लानात् क्रमात् ॥ १७१ ॥

निपतीतोऽग्निजितन्त्रिका वा ध्वजे यदि पतेत् तथा ।
अनावृष्टिभयं राज्ञः पराजयमथादिशेत् ॥ १७२ ॥

कुर्वन्ति मक्षिकाः शाके मधुच्छत्रं समुच्छ्रिते ।
यस्मिंस्तत्र द्विपक्षोर्ध्वं षण्मासाद्यादिशेत् पुरे ॥ १७३ ॥

मक्षिका वा लता वा चेद् जनेषुः पार्श्वतो हरेः ।
मध्यक्षिणा यदि स्थानमासाद्याहुस्तथा स्मृतिम् ॥ १७४ ॥

गृध्रश्येनकपोताद्येर्लीयन्ते काकवृन्दानि ।
तदा कुर्वन्ति दुर्भिक्षविषवह्निरिपुक्षयान् ॥ १७५ ॥

यदि केतौ निलीयन्ते कुररोलूकवायसाः ।
राज्ञः क्रमात् तदा इन्दुर्भक्ष्मिद्रुमपुरोपसः ॥ १७६ ॥

मयूरो यदि वा हंसः समायमपरी वासवम् ।
समन्तलक्षणोपेतस्तदा स्यान्नृपतेः सुखः ॥ १७७ ॥

वाकी बलाका हंसी वा यदि केतौ निलीयते ।
तदा मरणनिर्माणमथाप्नोत्यभिमुखवर्धीम् ॥ १७८ ॥

शुभैः सुवृष्टिर्बलभैः सुभिक्षं स्यात् फलाशिभिः ।
पिशाचाशिभिश्च दुर्भिक्षं भीतिः स्यात् पिपीलिकाशिभिः ॥ १७९ ॥

यदि चित्रपटस्पृष्टाः सूरवक्तोरगोत्तमाः ।
विचित्राकृतिनिर्मुक्ता भाइवायुषसम्भवाः ॥ १८० ॥

काकी च ककुभो भूर्णाः मद्गुलावाम्बरोगणाः ।
समग्रहंसनादाढ्या मेघाः स्त्रीणां नवालवाक्यवः ॥ १८१ ॥

वाप्यः पद्मोत्पलच्छन्ना हंसवन्ति सरांसि च ।
फलपुष्पाढ्यवनसानि वनान्युपवनानि च ॥ १८२ ॥

देवतायतना(न्यायान्यद्द)गोपुराणि पुराणि च ।
भवनान्यतिशुभ्राणि वायमासनवन्ति च ॥ १८३ ॥

मद्गुकाः पार्थिवा भूत्या चलवाहनशालिनः ।
धीरा जानपदा लोकाः कीडाभाजः कुमारकाः ॥ १८४ ॥

चत्वारो मुदिता वर्णा नटनर्तकशिल्पिनः ।
सगोमहिषजन्यादुस्मद्गुलौचविभूतो मगाः ॥ १८५ ॥

धान्यफलिशाखाः शाला महालम्भविलासिनि च ।
विचित्रापानसुधाः फलमक्षाद्य पक्षिणः ॥ १८६ ॥

यथानियेषां घोरमन्ते तथा दैवो पुरेऽपि च ।
हेमपारोपवनमितानि वर्षं राज्ञश्च निर्दिशेत् ॥ १८७ ॥

एतेषां कुशले चाले केऽप्य नाशेऽन्यथा धुवी ।
क्षेमे चाप्यस्तुर्त्वं चार्थं यथापोति यथादिशम् ॥ १८८ ॥

स्थिते वा पतिते वापि विभ्रमे सुखसाने ।
कम्पद्रो नरेन्द्रस्य चकेअनपदस्य च ॥ १८९ ॥

राजने पथखङ्गराः सपक्षौ पायुसल्लवम् ।
जनतोऽपिच्छुलबोर्णी तथा कुब्जा कर्पेन्द्रयः ॥ १९० ॥

नटनर्तकलोकेषु मद्गुवाल्गु पतन्तु च ।
स्तुषे क्षुतं समालेपथिकारविकशोभनम् ॥ १९१ ॥

ये वर्णाः सम्प्रदृश्यन्ति मनुष्या गजवाजिनः ।
तुषेचचेखलब्धरसः क्षुमं तेभ्याद्विवोऽग्नुभम् ॥ १९२ ॥

जयकृत्तैर्विशो ये स्युर्विद्युता दीप्तकेतवः ।
युक्ता योऽभिनो चापि निर्दिशेत् तेषु वैशसम् ॥ १९३ ॥
प्रभिन्नकुहरा भाभा कृकलासोपमा इव ।
अष्टौमाश्च स्थलत्स्थाश्च भूपतेर्विजयावहाः ॥ १९४ ॥
आलिङ्गनाः भूरि: क्रोष्टी यष्टिभिर्दृश्यतेऽन्तरा ।
ईप्समाणा इयामापि धावन्ति नृपतेर्भयम् ॥ १९५ ॥
सप्तविंशतिर्नैताक्षभोया दृष्टिर्भेद्यायते तदा ।
महीपतेर्भयं विद्यात् सुभिक्षं क्षेममेव च ॥ १९६ ॥
आषाढंराजे सत्याने रोहिण्यां च कालेऽपि ।
वाक्यस्य पतनमिच्छन्ति मुनयः प्रतिवत्सरम् ॥ १९७ ॥
ततः समाजे निर्वृत्ते शक्रकेतौ प्रतिष्ठिते ।
गन्धमाल्यैश्च धूपैश्च विचित्रैस्तामनुसेवयम् ॥ १९८ ॥
अनेकैर्वर्णकर्माणैर्वा नानावेशादिभिर्वृतैः ।
यथा क्रीडन्ति मनुजा दुर्भिक्षं जायते तदा ॥ १९९ ॥
विषाः पादवर्णं विल(म्भोऽत्र)पुः फलतो वासवव्यजम् ।
सुभिक्षं क्षेममारोग्यमन्यथा स्यात् विपर्ययः ॥ २०० ॥
जलाच्छोत्थो ध्वजाद्धो यो निष्टोप सोऽत्र कथ्यते ।
पुरे प्रवमपुरात् प्राच्यामिन्द्रध्वजं निधीयते ॥ २०१ ॥
साक्षाद्धयेन हस्तेन प्रमाणं तस्य कीर्तितम् ।
चतुःषष्टिसमायामं चतुरस्रं समन्ततः ॥ २०२ ॥
पञ्चाशीतिपदैर्नैव भजेत् क्षेत्रं विचक्षणः ।
क्षेत्रस्यार्धेन कुर्वीत ध्वजायामं प्रयत्नतः ॥ २०३ ॥
ततो वृद्धिर्विधातव्या हस्ते हस्तेऽङ्गुलं बुधैः
अर्धाङ्गुलं वा वृद्धिः स्यात् ध्वजस्यैतस्य कुञ्चितम् ॥ २०४ ॥

तावद् वृद्धिर्विधातव्या यावत् षोडशसमोऽङ्गुलैः ।
ततः समाप्तमार्गं यत् तत् सुधीर्विनियोजयेत् ॥ २०५ ॥
समाप्यमङ्गुलैः केतोः स्यादष्टचत्वारिंशता मितम् ।
नित्यं संवत्सरे वृद्धिः कर्तव्या द्व्यङ्गुलैर्बुधैः ॥ २०६ ॥
प्रथमस्थाने च कुर्वीत प्रथमावर्तं विचक्षणः ।
प्रथमोऽनन्तरं प्राप्तो भवेद् दैवतमर्पणा ॥ २०७ ॥
तत्र यन्त्रस्य प्राची स्यात् सप्तकूर्मायेण वद्द्व(मोदी) ।
तस्यैव पश्चिमे भागे मित्रो भवति देवता ॥ २०८ ॥
ततः प्रभृति यन्त्रस्य( भाग ? ) वेधो मतो भवेत् ।
पूर्वापरं च मित्रं स्यादेव यन्त्रविधिः स्थूलः ॥ २०९ ॥
यन्त्रस्य पश्चिमे भागे वरुणो दैवतं भवेत् ।
वरुणस्य प्रान्ते च वंशस्ये द्वे कुमारिके ॥ २१० ॥
स्वामिके चतुरो हस्तान् दशाङ्गुलोच्छ्रिते च ते ।
रुद्रस्थाने च कर्तव्या कुमारी सुप्रतिष्ठिता ॥ २११ ॥
सोमयोगे चतुर्थी स्यात् प्राप्तभागे च पञ्चमी ।
षष्ठी च सवितुर्भागे यमभागे च सप्तमी ॥ २१२ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
इन्द्रध्वजनिरूपणं नाम सप्तदशोऽध्यायः ॥

## अथ नगरादिसंज्ञा नामाष्टादशोऽध्यायः ।

नगरं मन्दिरं दुर्गं पुष्करं साकपराचिकम् ।
निवासा नावर्मं सप्त ख्याताः शिविरपत्तना ॥ १ ॥

नगरादिसंज्ञा नामाष्टादशोऽध्यायः ।

यत्रास्ते नगरे राजा राजधानी तु सा स्मृता ।
शाखानगरसंज्ञानि ततोऽन्यानि प्रचक्षते ॥ २ ॥

शाखानगरमेवाहुः कर्वटं नगरोपमम् ।
खर्वं कर्वटमेवेह गुणैर्निम्नम् उच्यते ॥ ३ ॥

ग्रामः स्यात्किन्नगरतो ग्रामकल्पो गृहस्थली ।
गोकुलावासमिच्छन्ति गोष्ठमल्पं तु गोष्ठकम् ॥ ४ ॥

उपस्थाने भवेद् राज्ञां यत्र तत् पत्तनं विदुः ।
चतुष्कोणसमायुक्तं लघुकं पुटभेदनम् ॥ ५ ॥

निर्माय कुटिका यत्र पत्रशालातृणोपलैः ।
मुनीन्द्राः कुर्वते वासं पल्ली स्वल्पा तु पल्लिका ॥ ६ ॥

नगरं वर्जयित्वान्यत् सर्वं जनपदः स्मृतः ।
नगरैश्च समं कृत्स्नं राष्ट्रं देशोऽथ मण्डलम् ॥ ७ ॥

आवासः सदनं सद्म निकेतो मन्दिरं भवनम् ।
संस्थानं निलयं धिष्ण्यं भवनं वसतिः क्षयः ॥ ८ ॥

अगारं सौधपो धीर्णं गेहं शरणमालयः ।
निलयो लयनं वेश्म गृहमोकः प्रतिश्रयः ॥ ९ ॥

गृहस्योपरिभूमिर्या हर्म्यं तत् परिकीर्तितम् ।
तस्यारोहणमार्गो यः सोपानं तत् प्रचक्षते ॥ १० ॥

काष्ठैर्येन रचितं स्तम्भयोरधिरोहणम् ।
सा निःश्रेणिरिति प्रोक्ता सोपानैर्नियुक्ता यदि ॥ ११ ॥

स्थूणः काष्ठविनिर्मितोऽसौ यत् काष्ठैः संपूर्णं पदम् ।
सुधाविलसिते हर्म्ये सौधं स्यात् कुट्टिमं च तत् ॥ १२ ॥

पर्यङ्कस्येव या शय्या तालपत्रकदलादिभिः ।
स्तम्भाग्रशिरसुन्नता सर्वोपरि गृहस्य सा ॥ १३ ॥

वातायनं तु विज्ञेयमवलोकनमुच्यते ।
लघुर्वातायनो यः स्यादवलोकनकं हि तत् ॥ १४ ॥
हर्म्यस्य मध्ये यच्छिद्रं स तु लोक इति स्मृतः ।
हर्म्यमाकारकः स स्यात् कण्ठा हर्म्यतलस्य या ॥ १५ ॥
वितर्दिकासमाला स्यात् सर्वतश्चक्रमूलगा ।
मत्तलम्बेषु चूला ये तु ते स्युर्वेदिकाचूला इति ॥ १६ ॥
निर्यूहो हर्म्यदेशाद् यः काष्ठानामुपनिर्गमः ।
वलीकमिति निर्दिष्टं कपाटं केदाद् विनिर्मितम् ॥ १७ ॥
स्तम्भैश्चतुर्भिः पार्श्वैर्यत् तदलिन्दकमुच्यते ।
त्रिभित्तिकशालं यत् प्राग्गृहान्तर्गतं तत् स्याद् द्विशालकम् ॥ १८ ॥
एकशालकमेतेन प्रकारेण गृहमुच्यते ।
गृहमेकं तु पक्षाणां सर्वं व्याप्नोति सा स्मृता ॥ १९ ॥
शालानां यत्तु मध्ये वापी पुष्करिणी च सा ।
संख्या ( या ? सा )पि यस्य स्यात् तद् गर्भगृहमुच्यते ॥ २० ॥
गृहे महाजनस्थानं विद्धद्रव्यं यत्तु प्रकल्पितम् ।
उपस्थानं तदाहुः स्यादोपस्थानकं ततः ॥ २१ ॥
भित्त्याश्रयस्तु स एव स्यादल्पा प्रासादिकेति स्मृता ।
दीर्घप्रासादिका याली वलभीत्यभिधीयते ॥ २२ ॥
शालाग्रे वलभी या स्याद्वलिन्देति कथ्यते तत् ।
शालां विना तु वलभी वलयेति निगद्यते ॥ २३ ॥
अल्पस्तम्भास्तु चतुष्कका ये तेऽप्यपरका मताः ।
गृहे चाभ्यन्तरस्थानं शुद्धान्त इति कीर्त्यते ॥ २४ ॥
प्रतोलीं तां विदुर्लोकाः पुरद्वारमिव यां वसेत् ।
सा कथ्यते तु विना नर्कीर्णचकस्थानकं गृहे ॥ २५ ॥

पशुस्थानकं मध्ये वै पावकदक्षिणस्तथा ।
ते कोष्ठका या तु कण्ठा कुड्यं भित्तिरित्यपरा सा ॥ २६ ॥

मण्डपशाला भवेद् या तु तन्मध्यानसमुच्यते ।
यत्कक्षे द्वारदेशे तु तमाहुर्द्वारकोष्ठकम् ॥ २७ ॥

प्रवेशनमिति प्राहुर्द्वारनिर्गमनं तथा ।
अलिन्दनिर्गमस्यार्थं निष्क्रेपमुपकल्पनम् ॥ २८ ॥

भवनस्यावृतं यत्तु तदाहुर्भवनाजिरम् ।
वनाजिरं वनमही स्यात्समाजिरमालये ॥ २९ ॥

उत्तरोदुम्बरस्याधः शिलायां मध्ये च कुम्भयोः ।
तज्ज्ञास्तां देहलीमाहुः कपाटावरणमेव च ॥ ३० ॥

कवाटं द्वारपक्षः स्यात् कपाटयुग्मेव च ।
पक्षः पिधानकरणो द्वारसंवरणं तथा ॥ ३१ ॥

कवाटं संपुटस्ते द्वे कपाटयुगलं च तत् ।
कर्णिका द्वारपश्चार्धा या स्यात् तामर्गलां विदुः ॥ ३२ ॥

सा स्यादर्गलसूचीति यदि दीर्घा प्रमाणतः ।
पुराणां सा तु परिघः कथितो नगरद्वारम् ॥ ३३ ॥

छिद्रैर्गवाक्षसंधिभिश्छिन्नं सर्वतस्तु यत् ।
फलकं तद् गवाक्षः स्याज्जालकमिति कथ्यते ॥ ३४ ॥

हर्म्यद्वारे पक्षद्वारे तथा हर्म्यावलोकने ।
प्राकारान्तरद्वारे तु या च प्रासादिका भवेत् ॥ ३५ ॥

पार्श्वयोरुभयोरेषां कल्पद्वयसमुच्छ्रितम् ।
उपर्युपरि संक्षिप्तमर्धचन्द्रप्रयाकृति ॥ ३६ ॥

सालये द्वे यथा चारिमत् क्षितिरुपैर्महावरैः ।
तयोरुपरि लम्बी च तारकाकृति मण्डपम् ॥ ३७ ॥

तत् तोरणमिति प्रोक्तं यच्च तेन परिष्कृतम् ।
सुवर्णतोरणं च स्याद्रत्नतोरणमेव च ॥ ३८ ॥
पुष्पतोरणमप्येतत् क्रियते पुष्पकादिभिः ।
तोरणाग्रे ठक्कुरो यः सिंहकर्णः स उच्यते ॥ ३९ ॥
भाषा संयमनानीति गृहसञ्चरभूमयः ।
गृहस्य पार्श्वे यच्चास्मिंस्तत् तत्संयमनं विदुः ॥ ४० ॥
भित्तेर्बहिश्च दारूणां तरङ्गाग्रप्रतानतम् ।
मरालपाली सा कुर्या( त् ) प्रणाली निर्गमोऽम्भसः ॥ ४१ ॥
स च मात्तार इत्युक्तः कण्ठः स्याद्वारणस्य यः ।
द्वारस्य तु समीपे यत् प्रद्वारं तदिहोच्यते ॥ ४२ ॥
पदिकाकल्पितं मूले द्वारस्य भवति स्थलम् ।
दीर्घं वा ह्रस्वमथवा तदास्थलकमिष्यते ॥ ४३ ॥
भूमभूमिरभेद्येति वर्णकोऽन्यस्करस्तथा ।
गृहाणां भित्तिकामध्यं बाह्यं परिसरो मतः ॥ ४४ ॥
विस्तीर्णकुक्षिपूर्णं यत् स्याद् वेश्म सोऽट्ट उदाहृतः ।
संक्षिप्तमेलकेकोणकं नन्दीरहालकाख्यया ॥ ४५ ॥
लघ्वावालमसंक्षिप्तमट्टालीति निगद्यते ।
अट्टाली या तु नाम्नुक्ता नामथाट्टालिकां विदुः ॥ ४६ ॥
फलकाग्रीनानिकीलैः काष्ठजातैः परिक्षितम् ।
यच्च काष्ठपणालीति कथ्यतेऽत्र पावनि ॥ ४७ ॥
स्तम्भदीर्घफलकानि काष्ठमूलाञ्चितानि च ।
सुषिराणि प्रयत्नेन काष्ठमालीकुलाम्बरैः ॥ ४८ ॥
रूपाणामथ तेषां तु स्तम्भकादालुकादिभिः ।
नानारूपावसितानो च कृत्वा नरसंकुलाम् ॥ ४९ ॥

कृतसङ्ख्यान्तरस्थितैः प्रवर्तन्ते समन्ततः ।
तद् धारागृहमित्युक्तं धारागारविलासकृत् ॥ ५० ॥
कांस्यैर्लोहैस्तथा पीतैर्निर्युक्तदर्पणनिर्मितैः ।
भित्तिका यस्य भित्तिः स्यात् तद् दर्पणगृहं विदुः ॥ ५१ ॥
पक्षद्वारं तदाख्यातुर्यन्महद्द्वारं ततोऽपरम् ।
यत् प्राकारान्विते द्वारं पुरे तद् गोपुरं विदुः ॥ ५२ ॥
निर्गताश्चोच्छ्रिताश्चैव प्राकारस्यान्तरान्तरा ।
उपकार्या( स्या ? र्या ) इति प्रोक्ताः क्षेमाख्याट्टालका मताः ॥ ५३ ॥
चयप्रकारशालाः स्युः पुरीसंचरणाश्रिताः ।
प्राकाराश्रयभागास्तु प्राकार उपनिष्क्रमाः ॥ ५४ ॥
क्रीडागृहं यदारामे तदुद्यानं प्रचक्षते ।
तीरेऽम्भसो जलोद्याने जलवेश्माम्बुमध्यगम् ॥ ५५ ॥
क्रीडागृहं यदन्योक्तं क्रीडागारं तदुच्यते ।
विहारभूमिरन्तःस्थभूमिविरचितेष्यते ॥ ५६ ॥
देवधिष्ण्यं सुरस्थानं चैत्यमर्चागृहं च तत् ।
देवतायतनं प्राहुर्विबुधागारमित्यपि ॥ ५७ ॥
एवं यदीदं यत्तु महाजनस्य स्थानं सभा सा कथिता च शाला ।
गर्वा पुरर्भीतिरमत्र गोक्षमापाक्षने वास्तुविवेकविज्ञाः ॥ ५८ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
नगरवर्णप्रमाणपुरनिवेशनसंज्ञको नामाष्टादशोऽध्यायः ।

## अथ चतुःशालविधानं नामैकोनविंशोऽध्यायः ॥

कृत्वो वास्तुसूत्रायवर्णितो यथायथम् ।
यथालाभ्यप्रमाणानि कुर्यात्सर्वाणि यथाक्रमम् ॥ १ ॥

वेश्मनामेकशालानां मानमष्टाधिकं स्मृतम् ।
द्वापञ्चाशद् द्विशालानां त्रिशालानां द्विसप्ततिः ॥ २ ॥
चतुःशालानि वेश्मानि यानि तेषां शतद्वयम् ।
पञ्चाशच्चाधिकं चतुर्भिर्विंशतिकं मनीषिभिः ॥ ३ ॥
साहस्रं पञ्चशालानां स्यात् तथा पञ्चविंशतिः ।
षट्शालानां चत्वारिः स्यात् सहस्रचतुष्टयम् ॥ ४ ॥
ध्रुवाद्ये त्वेकशालस्य भेदाः षोडशादीरिताः ।
द्विशालानां तु सर्वेषां प्रभेदाः षट्पञ्चकम् ॥ ५ ॥
शतं शतं च प्रत्येकं त्रिशालानामनुक्रमम् ।
त्रिचत्वारिंशदधिकं चतुःशालशतात्मकम् ॥ ६ ॥
त्रिसप्तत्युत्तरत्वेवं मानानि दश सप्त च ।
षोडशैव सहस्राणि षोडशोना चतुःशती ॥ ७ ॥
वेश्मानि सार्वकालानि भवन्ति परिसङ्ख्यया ।
पञ्चत्रिंशत्सहस्राणि तथा पञ्चशतानि च ॥ ८ ॥
षट्शालामुख्यशालानां षड्भिंशाच्छतं भवेत् ।
तावद्रूपं सहस्राणि द्विपदैः शतमेव च ॥ ९ ॥
षट्शतानां सप्तशालानां चत्वारिंशाच्चतुर्गुणा ।
षट्सप्ततिसहस्राणि चत्वारिंशत् तथाष्ट च ॥ १० ॥
मानानि षट्शालानां च अष्टसप्ततिस्तथा ।
षट्त्रिंशत्पर्यायेण संयुक्तान्यानि विंशतिः ॥ ११ ॥
षट्त्रिंशपर्ययेण द्वाविंशत्यधिक वेश्मनाम् ।
दशायत शतान्यानि भवन्ति दशकान्यपि ॥ १२ ॥
गृहमालाश संसूचे षट्पञ्चाशद्भेदात्मकम् ।
कन्नीकं मिश्रकं च मिश्रितं प्रविभाजितम् ॥ १३ ॥

अन्यानि चाङ्गभेदानि भवन्त्युक्तक्रमार्पितानाम् ।
लक्षणं नाम संस्थानं चैतेषां प्रतिपाद्यते ॥ १४ ॥

वर्णिनां स्याच्चतुःशालं मिश्रं तुर्यविशाला करैः ।
सेनापतेश्चतुःशालिकमद्वेव पुरोक्तता ॥ १५ ॥

षोडशप्रस्थानं राज्ञामेतानि तु यथाक्रमम्
चतुःषडष्टान्ता स्युः पञ्चमं च पृथक् पृथक् ॥ १६ ॥

विधारोऽथपेत् कर्णीयोर्मिश्रस्थमानि यथाक्रमम् ।
नरेन्द्रपुत्रयाणां स्युर्वैश्यानामेतानि शूद्रये ॥ १७ ॥

गृहाणि योजयेत् प्राग्वत्कथ्यानामप्यपि च मध्यमैः ।
पञ्चन्त्येतानि भूपानां रत्निकोशायनिश्रयाः ॥ १८ ॥

द्वादशांशयुक्तौ विस्तारायामौ विमर्षेश्मनाम् ।
अन्यवच्चतुरंशाढ्यः प्रजाद्विजन्मवेश्मनाम् ॥ १९ ॥

यो विस्तारः स एव स्यादायामोऽधिकम् यथाक्रमम् ।
विद्वद्रूपोः स्यादाधिक्यं मध्ये ज्येष्ठे च सप्तमि ॥ २० ॥

कर्णसूत्रात् बहिः स्तम्भान् स्थापयेत् सर्वान् प्रयत्नतः ।
भागं षोडशहस्तानां पञ्चानां चतुरन्तरा ॥ २१ ॥

वृद्धिः शालास्तु तेषां स्युश्चतुरंशेन विस्तृताः ।
शालाभ्यामभार्गेनोऽलिन्दः सर्वेषामपि वेश्मनाम् ॥ २२ ॥

नरूपाः षोडशहस्ते स्यात् पञ्चमांशाधिकेन वा ।
सप्तमांशाक्षयेण स्यात् द्वयोरपरवेश्मनोः ॥ २३ ॥

अन्त्ययोर्हस्तयोः स्याच्चतुर्भिर्मध्यमाकैः ।
पञ्चभिः षड्भिरेभिश्च सार्धैः सार्द्धभिन्नैः करैः ॥ २४ ॥

दैर्घ्यं स्यात् सप्तभिः सार्धैः शालायाः षोडशादिषु ।
निवेशायामांशो यः स पुनः सप्तभिः करैः ॥ २५ ॥

शालाया विस्तरः प्रोक्तः षोडशांशमितिर्वेश्मनाम् ।
अलिन्दमानं प्रत्येकं प्रोक्तं निखिलवेश्मनाम् ॥ २६ ॥

पक्षशालालिन्दयोः शेषं भवेद् गर्भगृहं हि तत् ।
भूतावधिकमितिश्चक्रमिति शालावैपुल्यं विपश्चितः ॥ २७ ॥

शालाभित्तिसममाणा स्यात् सर्वेषामपकोसिका ।
विस्तारं भवने शाला भित्तिकाकर्णसामयः ॥ २८ ॥

कर्णशाला ( नाम ) या प्रोक्ता सा च ज्ञेयापकोसिका ।
अलिन्दशालयोर्मध्ये या स्यान्मूषेति सा स्मृता ॥ २९ ॥

स्यूताङ्कुरं निष्कम्पाद्यावधिमूषा मसूरका ।
मूषा भद्रा इति प्राहुस्तत्संज्ञामवधारयेत् ॥ ३० ॥

यावन्मूषे भवेद् वेश्म तावद् भद्रं तदुच्यते ।
भद्राग्रे शक्रदिक्संस्थे सौम्यासौम्ये यथाश्रिते ॥ ३१ ॥

याम्यावान्त्ये मरीचीस्थे सौम्यदिक्स्थे शिवाश्रिते ।
अलिन्दा इति केऽप्याहुर्मूषा इत्यपरे विदुः ॥ ३२ ॥

भद्रा इति जगुः केचिदन्ये परिसरा इति ।
एकद्वित्रिचतुःपञ्चषट्समा( सीमा )क्रमेण याः ॥ ३३ ॥

भूपालाद्याः प्रपञ्चसंज्ञाः स्युर्वेश्मनामिह ।
तासामाद्याः प्रशस्ताः स्युर्मध्यमास्तास्ततः पराः ॥ ३४ ॥

भ्रमतो गुणनावेव शुभाशुभफलोदयात् ।
ब्रह्मचारी गृहस्थं न्यस्येत् तलमात्रपुरोरयः ॥ ३५ ॥

तद्धे न्यस्येत् ततः शेषान् विधिवत्त यथोचितं ।
गृहकैः पूरयेदार्द्रे यावत् स्युर्लक्षयोऽखिलाः ॥ ३६ ॥

*आपगवत्यौ शुक्लसीतो लाङ्गलिके यथाक्रमम् ।
क्रमाः परं तु द्विगुणाः प्रतिपद्यन्ति आकल्पमी ॥ ३७ ॥

शुकपिशाङ्गुलाल्के बहुभाराक्रलतुयम् ।
अकिन्चनीनीमसीवनिर्भूक्षमाननतके: ॥ ३८ ॥

नमश्रूचद्रुमिन्यासरवजाभिरलेकृया ।
अपरस्यात्संभाभाव संद्भूर्निर्भिर्निरपि ॥ ३९ ॥

शाङ्मेदाः प्रसूयन्ते येषां संख्या न विद्यते ।
यत्संख्याननुपसातमनुकाक्रिन्यकं हि तत् ॥ ४० ॥

एकमात्रदिशेषार्षां भूमौ भामस्यन्तः परम् ।
यान्येकलशुलकानि प्रस्तारे नानि तद्विदः ॥ ४१ ॥

कथयन्त्येकमात्राणि क्रमसंख्याविभागतः ।
सगापतौ प्रतिपत्तं स्यर्थ संघमनपियम् ॥ ४२ ॥

प्रतीचर्यं प्रासरिन्यासं सुभद्रं कलहोलरम् ।
कहौ मान्येकमात्राणि द्विमात्राण्यभिवध्महे ॥ ४३ ॥

पूर्वोत्तरोत्तरं पूर्वाद् मात्रायिद् विधानतः ।
स्यातां प्रत्येकमात्रात् पूर्वाग्या दक्षिणा परे ॥ ४४ ॥

इदं तृतीयमाख्येयं द्वीपमाप्यं सुखप्रदम् ।
सर्वधैर्यं स्यात्कोषो नैर्षतं पूर्वमं विलयम् ॥ ४५ ॥

काम्यं पिपासमानीरं काम्यं सौम्यं विपश्चिमम् ।
तदर्यं सीयहे विहे गम्यी चीयमयोगमम् ॥ ४६ ॥

वर्णे चाडं चाडं आम्लविकाहार्दिकाक्षे मध्यः ।
द्विमहत्वर्णा समासव्यालम्बिमहाण्यामनः परम् ॥ ४७ ॥
पेन्ड् बिलोमसमायामं चक्षमेघश्यामनिलयम् ।
मकारो पैकसायरूनं मधु मार्णं मसायकम् ॥ ४८ ॥
हसनं विमानमायाने कान्तं विन्नं द्विमन्दिरम् ।
सुखशिखं चर्ण शिरकं प्रमोदं व्यायामं विप्लत् ॥ ४९ ॥
कान्तं सुमानं नागेन्द्रमौलिनं कोमलं चलम् ।
चालोत्तरं कर्क कर्णं कुण्डं कान्तं कमागतम् ॥ ५० ॥
द्विहास्यं द्विमयं मोर्क चकं सत्यमयायनम् ।
चर्म भारं सुगाराधिपमागारं चीरमेव च ॥ ५१ ॥
व्यापायमापुर्न तद्वत् व्याहूनं च ततः परम् ।
दुर्गमं क्षोधसंके च कृमिनं ओषधी तथा ॥ ५२ ॥
चाकव्यापारिकाणं च कुण्डं कण्ठमिति क्रमात् ।
तद्भवायात् भिन्नयाणि चतुर्भेदाद्यतः परम् ॥ ५३ ॥
कृतमर्थयितं पीव्यहत्त्वार्थं विज्ञकुलमुखम् ।
भिन्नं विघनमाहुलं कण्ठं चर्णनं पृथु ॥ ५४ ॥
*कलाई प्रतमापात्यं विमार्गं कालिलकं दिव्यम् ॥ ५५ ॥
पालकं द्विगुणं मान्ये विन्नं चाम्लं विचारणाम् ।
सापराणं कर्णं व्यवहार्यं दोर्णं विशोधनार्थं ॥ ५६ ॥
प्रतीपयं विसमं स्वैरं सुमतीकं नले व्ययम् ।
व्यासमानीहवं व्यर्दमीहान्नं सुखमध्यमम् ॥ ५७ ॥
मणके क्रियमाणस्वर्णकोकं द्विगुणं विश्वम् ।
पर्क विलोकनुपण्डं सुमण्डं मानुष्यमाणिक्यं ॥ ५८ ॥

कार्यं त्रिवारकशुभाख्यं त्रिविशालं प्रसन्नं रुचम् ।
शुभदं(क्ष)कं सदा(दे)वलं वामे वर्धनं वारुणं सहम् ॥ ५९ ॥
चन्द्रं सैन्यं कलं तीर्थं चतुर्मुखानि सप्ततिः ।
षण्मुखान्यथोऽन्यन्तो वदृध्याकारचतुःक्रमात् ॥ ६० ॥
कामदं लोलुपं सिंहं मंगलं लालितं विलम्बम् ।
सुभद्रं विभ्रमं वामं वरं ख्यातं अर्थ लघुम् ॥ ६१ ॥
कर्म परं चरं वैरं ? त्रिविशालं सुप्रभं प्रभम् ।
मनोज्ञं कामिणं सुभं श्यामलं चैत्रं विनोदनम् ॥ ६२ ॥
सम्भोगं विभवोद् च विद्युतं सततं ततम् ।
व्याकुलं सौमनस्वं विचित्रं सत्कारं वरम् ॥ ६३ ॥
घोषवरं विद्युतं वैरं व्याप्तकं संघर्षं पथम् ।
निर्भीतं चतुरं मानं सुस्थितं दुःस्थितं स्थिरम् ॥ ६४ ॥
चण्डं चण्डं रूपं सार्थं संपर्कं मूलमण्यथम् ।
अष्टाविंशतिरन्यानि चतुर्मुखानि निबोधत ॥ ६५ ॥
विजयं कौस्तुभं रूप्यं धार्मिकं निषधं चतु ।
सात्त्विकं चामरं गौरमविरं कामिनं लक्षम् ॥ ६६ ॥
विजयं वासितं वीरं त्रिपुरं सन्मितं भवम् ।
जयोदकं भास्वरं चौर्यं लालरूपं सुलभं मण्डम् ॥ ६७ ॥
वारि नेत्रं सूक्ष्मं घोषं सप्तमाङ्गव्यानः परम् ।
भास्वीरं च चैतई प्रत्यं मलानं वासुकं चन्दम् ॥ ६८ ॥
सम्भोगार्थे शुभग्व्याल्यमकर्वैनरामि नामतः ।
अन्यच्च सर्वतोभद्रमेकं भद्राभिरुक्तिभिः ॥ ६९ ॥
संप्रकल्प्य चतुःशालं द्वन्द्वीर्णा शुभाशुभम् ।
प्रदक्षिणा शुभा भूपा विपरीता विपर्यये ॥ ७० ॥

समभागे यथा सूत्रो जालीयात् साम्बतास्तु च ।
तथाऽस्यैकमङ्गानि सप्तमङ्गानि च क्रमात् ॥ ७१ ॥
द्विमङ्गान्यङ्गनिर्मुक्ता चतुरङ्गाणि च विचारितः ।
चतुर्भागाधात् त्रिमङ्गानि पञ्चमङ्गाणि योजयेत् ॥ ७२ ॥
सप्ततिथ चतुर्मङ्गाण्येकं भङ्गानिमङ्गभिः ।
एवं सप्तमूर्यं पिण्डः चतुर्भागात्मा वेश्मनाम् ॥ ७३ ॥
ततः पूर्वविभागेन चतुःशालादिष्वपि तु ।
सूत्रा स्यात् कुड्यमैत्रेषु चतुःशालेषु वेश्मसु ॥ ७४ ॥
चतुर्वेदाग्निसे सूत्रे स्वस्तिके स्तःपराङ्मुखे ।
सुखापती च पुरतो द्वे स्यातामग्नकोणसिरे ॥ ७५ ॥
गोवद्भूतः स कर्तव्यः कार्यो प्राग्जीवसंयुताः ।
वर्धमाने तथा कार्यौ(यौ) यथा प्राग्जीवसंयुतः ॥ ७६ ॥
वर्धमाने तथा कार्ये द्वारसूत्रे सुखापते ।
सूत्रान्ता दक्षिणे स्यातां दीर्घकोणकोणसिरे ॥ ७७ ॥
नन्द्यावर्तेषु सर्वा नन्द्यावर्ता यथामिता ।
द्वे स्वर्गा(गू)मे वामके स्यातामपाने त्र्यककोणसिरे ॥ ७८ ॥
सर्वतोभद्रका सूत्राः सर्वतोभद्रवेश्मनि ।
जातिसूत्रा भवेद्देका एवं मतावानं हि तत् ॥ ७९ ॥
द्वितीयया प्राग्विभजनेकया तथानन्तरम् ।
प्रदक्षिणेन वेश्मानि यथाहीन्येकयैकया ॥ ८० ॥
सूत्रया स्युः कनाद्येव कण्ठपत्नी लक्ष्मणान्वयं ।
धनसर्वविभागाच्च अपवीथकमुखं तथा ॥ ८१ ॥
प्रीतिकोणकरूयामकलहात्मान्यपुरुसमात् ।
पञ्च पूर्वं उभे सूत्रे तथीरं परिकीर्तितम् ॥ ८२ ॥
पञ्च पूर्वं तृतीया च तत् सुनीलं पदं विदुः ।
जातेषु द्विपलीये ततो द्वीपे चाप्यचतुर्थिके ॥ ८३ ॥

द्विचतुर्थ्यौ तथा चान्ध्रे त्रिचतुर्थ्यौ सुसंगमे ।
आर्षभ्यां त्वाद्यपञ्चम्यौ द्वितीयैवं सुपञ्चमी ॥ ८४ ॥
ष्वाकोदी च त्रिपञ्चम्यौ षैकोले द्वितरामिधे ।
वृषभे प्रथमापञ्चम्यौ द्विपञ्चमी च तथा त्रिके ॥ ८५ ॥
कल्पे तृतीया षष्ठी च त्रिपासेऽम्बिरसाभिधे ।
गान्धारे पञ्चमीषष्ठ्यौ साद्या कान्ते च सप्तमी ॥ ८६ ॥
सौले द्वितीयासप्तम्यौ त्रिसप्तम्यौ त्रिपञ्चिके ।
गन्धर्वे सप्तमीतुर्ये श्रीपठे पञ्चसप्तमी ॥ ८७ ॥
सपाठी सप्तमी त्रिके गमे पूर्णकृती तथा ।
गोमेऽष्टमी द्वितीया च ष्वष्टम्यौ चान्यथोगमे ॥ ८८ ॥
वर्णे चतुर्थ्यष्टमी च पञ्चमी चाष्टमी चके ।
षष्ठ्यष्टम्यौ पाठे कान्ते सप्तमी चाष्टमीति च ॥ ८९ ॥
इत्यष्टविंशतिः प्रोक्ता द्विमात्राणामिहोक्तसाम् ।
अथ त्रूमस्त्रिमात्राणि लक्ष्मन्तं बुद्धिवर्धनम् ॥ ९० ॥
स्यात् चारुपञ्चिकमङ्गुरमात्मप्रकाशमयान्वितम् ।
आद्या द्वितीया तुर्या च पञ्च ह्रार्य त्रिपञ्चिमम् ॥ ९१ ॥
त्रिलोकं नाम नत् पैठम चत्वाणां बुद्धिवर्धनम् ।
आद्या तृतीया तुर्या स्यादापञ्चमी सर्वतोऽन्तुके ॥ ९२ ॥
चये द्वित्रिचतुर्थ्यः स्युर्हर्ष च स्यात्तु वर्णिते ।
पञ्च तात्ये त्रिचतुष्पञ्चकादी तदु धाहतम् ॥ ९३ ॥
सात्ये पञ्च द्विपञ्चम्यौ तत् प्रोक्तं गुहमनिन्दकम् ।
पञ्च स्युर्द्वित्रिपञ्चम्यः प्रकाशं सर्वबुद्धिकृत् ॥ ९४ ॥
पूर्णं चतुर्थीपञ्चम्यौ पञ्च तत् पैतगुप्यते ।
पञ्चमी द्विचतुर्थ्यौ च यथापतं नतीरितम् ॥ ९५ ॥
त्रिचतुःपञ्चमीपूर्वं चाहमात्रुर्मनीषिभिः ।
आद्या द्वितीया षष्ठी च पञ्च तत् मान्यसम्मितम् ॥ ९६ ॥

आद्या तृतीया षष्ठी च स्यात् प्रशान्तकवेश्मनि ।
तद् भवेत् सर्वतोभद्रं तथा सर्वार्थसाधकम् ॥ ९७ ॥
द्वितीया च तृतीया च षष्ठी च शमनामनि ।
तस्य पश्चिमदिशि द्वारं शूद्रवर्गस्य वेश्मनः ॥ ९८ ॥
षष्ठी चतुर्थी चाद्या च स्युर्विशालाख्यवेश्मनि ।
षष्ठी द्वितुर्ये यस्मिंस्तच्चापाख्यं दक्षिणामुखम् ॥ ९९ ॥
षट्चतुस्त्रिपूर्वे कार्यं तत् स्यात् सर्वार्थसाधकम् ।
षट्पञ्चाद्याभिरेवं चित्रं तच्च स्याद् याम्यदिङ्मुखम् ॥ १०० ॥
द्वितीयापञ्चमीषष्ठ्यो यस्मिन् स्युस्तद् द्विमन्दिरम् ।
यत्र त्रिपञ्चमीषष्ठ्यस्तद् वदन्ति सुदक्षिणम् ॥ १०१ ॥
चतुर्थीपञ्चमीषष्ठ्यो भवे स्युस्तच्च वृद्धिकृत् ।
पूर्वाद्वितीयासप्तम्यो यत्र तन्निकुलसंज्ञितम् ॥ १०२ ॥
याम्यावस्थितनिष्क्रान्ति शुभं सर्वार्थदं नृणाम् ।
साथ तृतीयासप्तम्यौ यस्मिन्नेते परिकीर्तिते ॥ १०३ ॥
यत्र स्युर्द्वित्रिसप्तम्यस्तद् वेश्म स्याद्धनं स्थलम् ।
पञ्चाद्या च चतुर्थी च सप्तम्यपि च तद् विपत् ॥ १०४ ॥
द्विचतुःसप्तमीभूषणाख्यं स्याद् दक्षिणामुखम् ।
त्रिचतुःसप्तमीभिस्तु सुनाभं वेश्म कीर्त्यते ॥ १०५ ॥
तच्च पाश्चात्यपरस्थं धनधान्यसुखप्रदम् ।
सप्तमी पञ्चमी पूर्वा भूषा नागेन्द्रसंज्ञिते ॥ १०६ ॥
भूषा द्विपञ्चसप्तम्यो याम्ये च कुलमीरिते ।
त्रिपञ्चसप्तमीभूषाश्रेष्ठिनं सौम्यगं भवेत् ॥ १०७ ॥
चतुर्थी पञ्चमी यत्र सप्तम्यपि च तद् धनम् ।
पूर्वा षष्ठी सप्तमी च स्थूला पाश्चोत्तरे गृहे ॥ १०८ ॥
द्वितीयासप्तमीषष्ठ्यो यस्मिंस्तत् कलसंज्ञितम् ।
द्वारं पश्चिमेतस्य हितं च स्याद् द्विजन्मनाम् ॥ १०९ ॥

कर्णं स्यात् पश्चिमद्वारं त्रिचतुःसप्तमीयुतम् ।
चतुर्थीसप्तमीमध्ये मूषाः स्युः कुक्कुटसंज्ञिते ॥ ११० ॥
सप्तमीपञ्चमीषष्ठीयुक्तं कान्तं यथाक्रमम् ।
आद्याष्टमी द्वितीया च मूषा प्रोक्ता कमलाख्ये ॥ १११ ॥
आद्याष्टमी तृतीया च द्विशाले भवने स्मृताः ।
पञ्चाष्टमी त्रिद्वितीये द्विभये तद्युताद्युतम् ॥ ११२ ॥
आद्याष्टमी चतुर्थी च यत्र तक्षकसंज्ञिते ।
तुर्याष्टमी द्वितीया च यत्र तत्कल्पं विदुः ॥ ११३ ॥
तुर्याष्टमी तृतीया च यत्र तत् शोकदायकम् ।
आद्याष्टमी पञ्चमी च स्याद् यस्मिंस्तद् धनं स्मृतम् ॥ ११४ ॥
द्वितीया पञ्चमी मूषा यत्र स्यादष्टमी तथा ।
तद् मारकमशुभफलकं शुभं मित्रकमन्यथा ॥ ११५ ॥
त्रिपञ्चकाष्टमीभिस्तु सुगारं परिकीर्तितम् ।
पञ्चाष्टमी नवागारे चतुर्थी पञ्चमी तथा ॥ ११६ ॥
पञ्चिकाद्याष्टमीमध्ये वीरं तदिह कीर्तितम् ।
षष्ठाष्टमी द्वितीया च गृहे व्यायामनामनि ॥ ११७ ॥
षष्ठ्यष्टमीतृतीयाभिर्मूषाभिः शोकमाकुलम् ।
षष्ठ्यष्टमीचतुर्थ्यः स्युर्यत्र तद् व्याकुलं विदुः ॥ ११८ ॥
षष्ठ्यष्टमीपञ्चमीभिर्दुर्गन्धं व्याधिकृन्मतम् ।
आद्याष्टमीसप्तमीभिः संयुक्तं क्रौञ्चमुच्यते ॥ ११९ ॥
द्विसप्तम्यष्टमीयुक्तं गृहं कृमिसंज्ञितम् ।
त्रिसप्तम्यष्टमीभिस्तु मूषाभिः क्रोधनं भवेत् ॥ १२० ॥
चाक्रव्यं चतुःसप्तम्यष्टमीभिः समन्वितम् ।
सप्तपञ्चम्यष्टमीभिर्युक्तं ध्रुवमिति स्मृतम् ॥ १२१ ॥
षट्सप्तम्यष्टमीयुक्तं कर्णं सर्वार्थसिद्धिदम् ।
इत्युक्तानि त्रिभद्राणि वास्तान्येतेषु यानि च ॥ १२२ ॥

तानि मिश्रं प्रयोक्ष्यामि वर्णाभ्यां च यथाविधिः।
आद्याशालको ध्रुवाः स्युर्येन तत् कुलसंज्ञितम् ॥ १८३ ॥
सर्वसिद्धिप्रदं तत् पूर्वशालमुखं तथान्यथा।
आद्यालिन्दः पञ्चमी च पश्चिमर्चापनं हि तत् ॥ १८४ ॥
तत् भवेत् पश्चिमद्वारं गृहं सर्वगुणान्वितम्।
पश्चिमाद्या द्वितीया च चतुर्थी पञ्चमी तथा ॥ १८५ ॥
तत् पौष्णं दक्षिणद्वारं सर्वसिद्धिकरं स्मृतम्।
चार्( द्या )द्यालिन्दकलमाद्या च यस्मिंस्तत् गुरुसुखप्रदम् ॥ १८६ ॥
द्वारेण पश्चिमेनैतच्चकस्तौ दक्षिणेन वा।
द्वयाद्याशालको यत्र स्युस्तन्नित्यं प्रीतिवर्धनम् ॥ १८७ ॥
प्रशस्तं क्षत्रियादीनामस्य द्वा प्राच्यपाचि वा।
आद्यालिन्दकलया षष्ठी यस्मिन् भूयाल्लघुस्वकम् ॥ १८८ ॥
तच्छस्तं पश्चिमद्वारं विप्रादीनां जयावहम्।
आद्या द्वितीया तुर्या च भूया षष्ठी च यत्र तत् ॥ १८९ ॥
प्राच्यापरमुखं वास्तु मिश्रं नाम कुलर्द्धिदम्।
आद्या तृतीया तुर्या च यस्मिन् षष्ठी च तच्छुभम् ॥ १९० ॥
विपक्षं नाम वास्तु स्यात् द्वारमस्य च पश्चिमम्।
आद्यालिन्दो गृहे यस्मिन् भूया षष्ठी च तच्छुभम् ॥ १९१ ॥
स्यात् प्राच्यपश्चिमद्वारमाकुलं नाम तद् गृहम्।
आद्याद्वितीयापञ्चम्यो यत्र षष्ठी च तद् भवेत् ॥ १९२ ॥
कलकं नाम याम्यसौम्यद्वारं सर्वकामदम्।
एकादिपञ्चपञ्चभ्यः स्युर्येन तद्विस्मानकम् ॥ १९३ ॥
प्राक्पश्चिमोत्तरद्वारं चातुर्वर्ण्यस्य वृद्धिदम्।
यत्र स्युर्द्वितीयपञ्चम्यो भूया षष्ठी च तद् गृहम् ॥ १९४ ॥
स्यात् पूर्वदक्षिणद्वारं प्रक्षिप्तं शुभसंपदा।
पश्चिमाद्याचतुःपञ्चमस्तात् कलशं विदुः ॥ १९५ ॥

शुभैकयोगं सकलैकवन्द्वारं निवेशनम् ।
द्विचतुःपञ्चमीषष्ठ्यो यस्मिंस्तच्छकलमुच्यते ॥ १३६ ॥
दक्षिणं मुखमेतस्य पश्चिमं वा प्रशस्यते ।
चतस्रस्त्वाद्यायो यस्मिन्नायाद्यं लघुशीतिकम् ॥ १३७ ॥
अग्रशालं चतुर्थ्यैतत् तद्विशो यमनायकम् ।
आद्यास्तिस्रः सप्तमी च मूलाः स्युर्यत्र तत् शुभम् ॥ १३८ ॥
निगमप्रमुखद्वारं शालं सर्वगुणान्वितम् ।
आद्या द्वितुर्यसप्तम्यो यत्र तत् स्वस्तिकं स्मृतम् ॥ १३९ ॥
प्राक्पश्चिमोत्तरद्वारं चातुर्वर्ण्येऽपि शस्यते ।
आद्याश्चतुर्थीसप्तम्यौ मूलाः स्युर्यत्र वेश्मनि ॥ १४० ॥
तद्दिक् स्थिरमित्युक्तं द्वारं चैतस्य दक्षिणम् ।
आद्यास्तिस्रः सप्तमी च यत्र तत् सरलं विदुः ॥ १४१ ॥
तत् भवेत् पश्चिमद्वारं सर्वदोषोज्झितं परम् ।
पञ्चाद्या च द्वितीया च पञ्चमी सप्तमी तथा ॥ १४२ ॥
त्रिगुणं नाम तत् वेश्म द्वारं चास्य यथेप्सितम् ।
आद्यातृतीयापञ्चम्यः सप्तम्यपि च यत्र तत् ॥ १४३ ॥
कार्यं नामासिताशीताख्यं    प्रशस्तं सर्वदेहिनाम् ।
द्वितीया च तृतीया च पञ्चमी सप्तमी गृहे ॥ १४४ ॥
यत्र तन्निजनामैकद्वारं निजगुणैर्युतम् ।
आद्याचतुर्थीपञ्चम्यो यत्र स्युः सप्तमी तथा ॥ १४५ ॥
तत् कान्तं नाम पूर्वोत्तरद्वारं भवनमुच्चितम् ।
यत्र द्वितीया तुर्या च पञ्चमी  सप्तमी तथा ॥ १४६ ॥
विचारणं पदं तत् स्यात् सर्वकामविवर्धनम् ।
तृतीया यत्र तुर्या च पञ्चमी सप्तमी तथा ॥ १४७ ॥
तत् साधारणमित्याहुः सर्वद्वारं सुखावहम् ।
आद्या द्वितीया षष्ठी च सप्तमी यत्र तत्समम् ॥ १४८ ॥

आद्या द्वितीया षष्ठी च त्र्यंशे स्यात् सप्तमी तथा ।
द्वितीया च तृतीया च कार्ये षष्ठी च सप्तमी ॥ १४९ ॥
आद्या तुर्या च षष्ठी च रोगे स्यात् सप्तमी तथा ।
यत्र द्वितीया तुर्या च स्यात् षष्ठी सप्तमी च तत् ॥ १५० ॥
विपक्षेषणं नाम गृहं दक्षिणोत्तरदिङ्मुखम् ।
तृतीया यत्र तुर्या च स्यात् षष्ठी सप्तमी गृहे ॥ १५१ ॥
प्रतीच्यमीप्सितद्वारं तद् गृहं सर्वकामदम् ।
यत्राद्यापञ्चमीषष्ठीसप्तम्यभिहतं हि तत् ॥ १५२ ॥
प्रत्यूनद्विषं वेश्म समस्तैरन्वितं गुणैः ।
द्वितीयापञ्चमीषष्ठीसप्तम्यो यत्र वेश्मनि ॥ १५३ ॥
तदिदं सौरमित्याहुर्धनधान्यसुखावहम् ।
तृतीयापञ्चमीषष्ठीसप्तम्यो द्वारमुत्तरम् ॥ १५४ ॥
पश्चिमं वा भवेद् यत्र सुपक्षकं च दक्षिणम् ।
तुर्यापञ्चमिकाभ्यां निर्मलमुत्तरदिङ्मुखम् ॥ १५५ ॥
आद्याद्विपञ्चमीभिः स्यात् सर्वकामीति लक्षणम् ।
व्यस्ते पूर्वा द्वितीया च स्याच्चतुर्थी तथाष्टमी ॥ १५६ ॥
आद्यातृतीयातुर्याः स्युराक्रीडे तथाष्टमी ।
आद्यास्तिस्रः क्रमाद् व्यर्थे मताः स्यादष्टमी तथा ॥ १५७ ॥
ईशानाख्ये स्युराद्याद्वित्रिपञ्चम्योऽष्टमी तथा ।
पूर्वाष्टमीत्रिपञ्चम्यो यस्मिंस्तत् सुखसंज्ञितम् ॥ १५८ ॥
तत् पूर्वोत्तरमुखे सुखदं जायते ह्यन्यथाऽन्यथा ।
यत्र स्युरष्टमीद्वित्रिपञ्चम्यस्तद्विहाक्षयम् ॥ १५९ ॥
द्वारं पश्चिमेनास्य वास्तुविद्याविदो जगुः ।
यस्मिन् पूर्वाष्टमीतुर्यापञ्चम्यो क्षयं हि तत् ॥ १६० ॥
प्राङ्मुखपश्चिमद्वारमिदं शंसन्ति सूरयः ।
यत्र द्वितुर्यापञ्चम्यो मताः स्युस्तद्वदष्टमी ॥ १६१ ॥

तत् श्रियं नाम सुखकृत् यथेष्टं द्वारमिष्यते ।
त्रिपञ्चकपङ्क्तितुर्यां आगस्ये पश्चिमामुखे ॥ १६२ ॥
द्वितीयाद्याष्टमीपङ्क्त्यौ पञ्चैकोनं तदुच्यते ।
तृतीयाद्याष्टमीपङ्क्त्यौ यत्र तत् द्विगतं गृहम् ॥ १६३ ॥
द्वित्रिपङ्क्त्योऽष्टमी चापि यस्मिंस्तद्धिद्युच्यते ।
आद्यातुर्याष्टमीपङ्क्त्यौ यत्र तत् पर्केमुच्यते ॥ १६४ ॥
पञ्चपङ्क्तीद्वितुर्याभिः स्याद् विलोमत्रियं गृहम् ।
पञ्चषष्ठीद्वितुर्याभिरश्वकमिति कीर्तितम् ॥ १६५ ॥
यस्मिन्नाद्याष्टमीषष्ठीपञ्चकपौ सुभद्रमेव तत् ।
द्विपञ्चम्यष्टमीपङ्क्त्यौ मृषा मातङ्गलोहिते ॥ १६६ ॥
त्रिपञ्चम्यष्टमीपङ्क्त्यौ [illegible] ।
तत् सर्वनाम तुर्याद्यास्तिस्रो यस्मिंस्तथाष्टमी ॥ १६७ ॥
आद्याद्वितीयासप्तम्यः पिनाके स्युस्तथाष्टमी ।
त्रिसप्तम्यष्टमीद्वयों यशोयन्तं तदुच्यते ॥ १६८ ॥
अष्टमीद्वित्रिपङ्क्त्यौ यस्मिंस्तत् त्रिविधं गृहम् ।
आद्या चतुर्थीसप्तम्यः [illegible] स्युस्तथाष्टमी ॥ १६९ ॥
रजे द्वितुर्यासप्तम्यो मृषाः स्युस्तथाष्टमी ।
त्रिसप्तकपष्ठमीतुर्यां यत्र तत् [illegible] विदुः ॥ १७० ॥
[illegible] ।
सप्तम्याद्याष्टमी मृषा पञ्चम्यपि च [illegible] ॥ १७१ ॥
[illegible] द्विपञ्चसप्तम्यो मृषा [illegible] ।
त्रिपञ्चसप्तम्यष्टम्यो यस्मिंस्तत् वर्धमानकम् ॥ १७२ ॥
विलोमतो [illegible] इति तद्विदः ।
चतुःपञ्चसप्तम्यो यस्मिंस्तत् [illegible] भवेत् ॥ १७३ ॥
सप्तम्याद्याष्टमीपङ्क्त्यौ यत्र तत् [illegible] ।
द्विसप्तकषष्ठमीभिर्[illegible] भवेत् ॥ १७४ ॥

पञ्चषष्ठीद्विसप्तकयो यस्मिंस्तत् सेव्यमीरितम् ।
पञ्च तुर्याष्टमी षष्ठी सप्तमी चेति तत् फलम् ॥ १७५ ॥
तीर्थे षष्ठपञ्चमीपञ्चसप्तकयः सर्वकामदे ।
पञ्चाद्याः पञ्च तत् प्रोक्तं कामले सर्वकामदम् ॥ १७६ ॥
एकद्वित्रिचतुःपञ्चो यत्र तल्लोऽपुर्व स्थलम् ।
आद्यास्तिस्रः पञ्चषष्ठ्यौ यस्मिंस्तत्त्रिशमुच्यते ॥ १७७ ॥
मणाङ्के पञ्चमीषष्ठीतुर्यापूर्वाद्वितीयकाः ।
त्रितुर्यापञ्चमीषष्ठ्यः साधाः स्युः साक्रियाभिधे ॥ १७८ ॥
यत्र द्वित्रिचतुःपञ्चषष्ठसप्तास्त्रिशमुच्यते ।
एकद्वित्रिचतुर्थ्यः स्युः सुजये सप्तमीयुताः ॥ १७९ ॥
पञ्चमीसप्तमीद्वित्रिपूर्वाः स्युर्विजयाभिधे ।
यत्रैकद्विचतुःपञ्चसप्तकयो यामनाम तत् ॥ १८० ॥
यत्रैकत्रिचतुःपञ्चसप्तम्यस्तकस्तकार्णं विदुः ।
भूता द्वित्रिचतुःपञ्चसप्तकयो (आ?ड्रा)मसंज्ञिते ॥ १८१ ॥
आद्यास्तिस्रस्तथा षष्ठीसप्तम्यौ यत्र तत्क्षयम् ।
आद्याद्वितुर्यापष्ठीभिः सप्तम्या च तथं विदुः ॥ १८२ ॥
षष्ठीत्रितुर्यासप्तम्यो जये?(ऽ)पूर्वान्विता मताः ।
द्वित्रितुर्यास्तथा षष्ठीसप्तम्यौ वरसंज्ञिते ॥ १८३ ॥
षरं तद् यत्र पूर्वे द्वे पञ्चषट्सप्तमीयुते ।
*वैस्ये स्यात् सप्तमी षष्ठी पञ्चम्याद्या तृतीयका ॥ १८४ ॥
विविधाख्ये द्वित्रिपञ्चम्यः स्यात् षष्ठी सप्तमी तथा ।
चतुर्थी पञ्चमी षष्ठी सप्तकाद्या च सुपथे ॥ १८५ ॥
प्रभावके द्विचतुःपञ्चषष्ठ्यः स्युः सप्तमी तथा ।
त्रिचतुःपञ्चसप्तम्यः षष्ठी च स्यात् मतीश्वके ॥ १८६ ॥
आद्यास्तस्रो यत्र स्युः सार्धम्या सप्तमी हि तत् ।
सप्त?पूर्वा द्वित्रिपञ्चकयो पुरुतनाद्धि तथाष्टमी ॥ १८७ ॥

शान्ते द्वितुर्यपञ्चम्यः पूर्णं स्यात्सप्तमी तथा ।
पूर्वोक्तितुर्यपञ्चम्यौ साधारण्यौडुवितत्वे ॥ १८८ ॥

मिश्रोऽपि द्वित्रिपञ्चम्यश्चतुर्थी चाष्टमी तथा ।
सन्धौ च त्र्यष्टमीपञ्चम्यौ मिश्रः पूर्वाद्विकासतथा ॥ १८९ ॥

आद्याद्वितुर्यपञ्चमीभिरष्टम्या विप्रयोगकम् ।
षष्ठ्यष्टमीत्रितुर्याभ्यां पर्यासनं त्रितुर्ये त्रिषु ॥ १९० ॥

द्वित्रितुर्याष्टमीषष्ठ्यो यत्र तत् सततं मतम् ।
आद्याद्विपञ्चमीषष्ठ्यस्ततनानाति तथाष्टमी ॥ १९१ ॥

आद्यात्रिपञ्चमीषष्ठ्यो व्याकृते स्युस्तथाष्टमी ।
द्वित्रिपञ्चचतुष्षष्ठ्यो विज्ञेया तीव्रसंज्ञके ॥ १९२ ॥

तुर्याद्यापञ्चमीषष्ठ्य आलीने स्युस्तथाष्टमी ।
द्वितुर्यपञ्चमीषष्ठ्यो विविक्ते तदष्टमी ॥ १९३ ॥

आद्याष्टानन्यो मुख्याः स्युः साधारण्यो सम्यगाकुले ।
आद्यादित्रयोऽष्टमी नादृत् सप्तम्यपि भवेत् करे ॥ १९४ ॥

दोलरे सप्तमीतुर्यौद्वितीयाद्यास्तथाष्टमी ।
मिश्रके त्र्यष्टमी तुर्या तृतीयश्चाद्य सप्तमी ॥ १९५ ॥

वैणाख्ये ह्यष्टमीतुर्यासप्तम्यः सततीयकाः ।
आद्याद्विपञ्चसप्तम्यो व्याप्तपद्माख्ये तथाष्टमी ॥ १९६ ॥

आद्यात्रिपञ्चसप्तम्यः साधारण्यः सकम्पताख्ये ।
षष्ठ द्विस्याष्टमीपञ्चसप्तमस्वरतम् वर्त्रे त्रिषु ॥ १९७ ॥

तुर्याद्याषष्ठमी[ षष्ठी ]सप्तम्यपि किंचिदे तथा ।
द्विपञ्चष्टमीतुर्यासप्तम्यश्चतुराख्ये ॥ १९८ ॥

त्रिसप्तमस्थष्टमीतुर्यापञ्चम्यः सम्यकसकति ।
आद्याद्वितीयासप्तम्यः षष्ठाष्टम्यौ च कुहिते ॥ १९९ ॥

कुरिपिते पञ्च षष्ठाद्याश्चतुर्थी सप्तमी तथा ।
द्वितीऽष्टमीद्विसप्तम्यस्त्रिपञ्चषष्ठ्यपि च स्मृते ॥ २०० ॥

चके पञ्चाष्टमीद्रुपौ सप्तम्यन्त्यात् प्लुतीर्लिताः ।
चके द्विलीवालप्लवदी पञ्चमाष्टदी चतुर्दशिका ॥ २०१ ॥
तवेऽष्टमीत्रिसप्तकपस्तुर्यौ पञ्चमी च कीर्तिते ।
पञ्चमीसप्तमीपञ्चमो ग्रामे पूर्वाष्टमी तथा ॥ २०२ ॥
द्विपञ्चसप्तमपञ्चमः षष्ठी सर्पक्षेसंज्ञिते ।
त्रिपञ्चषष्ठीसप्तकपौ मूलगादि तथाष्टमी ॥ २०३ ॥
स्युरष्टसप्तदशपञ्चचतुर्दशसप्तपाभिधे ।
पूर्वाद्या पञ्च चप्लुताः किशरं नाम तद् यदम् ॥ २०४ ॥
पञ्चाद्यापञ्चसप्तकपौ सह तत् कौस्तुभं विदुः ।
पूर्वौ द्वित्रिचतुःषष्ठीसप्तकपौ हंसवसंज्ञिते ॥ २०५ ॥
सप्तमी पञ्चमी षष्ठी द्वित्रिपूर्वौ च चर्चिके ।
त्रिपदे द्विचतुःपञ्चषष्ठ्याद्याः सप्तमी तथा ॥ २०६ ॥
त्रिचतुःपञ्चषड्सप्तकपाद्याः स्युर्यत्र तद् वसु ।
सालीके त्रिचतुःपञ्चाद्विकप्लुताः स्युस्तथाष्टमी ॥ २०७ ॥
पञ्चाद्यापञ्चसप्तकपौ वामनं नाम तद् विदुः ।
आद्याद्वित्रिचतुःषष्ठ्यः साष्टम्यो गौरनामनि ॥ २०८ ॥
आद्याद्विपञ्चमीषष्ठ्यः पञ्चमी चाभिधाभिधे ।
कमिले त्रिचतुःपञ्चपूर्वाः षष्ठ्याष्टमी तथा ॥ २०९ ॥
चके पूर्वाष्टमीषष्ठीत्रिर्पूर्वाः पञ्चमीयुता ।
त्रिचरे त्रिचतुःपञ्चद्विपञ्चः सुस्तथाष्टमी ॥ २१० ॥
आद्याद्वित्रिचतुःसप्तम्यष्टम्यो चालिकाभिधे ।
पूर्वाष्टमीद्वित्रिसप्तपञ्चम्यो धीमनामनि ॥ २११ ॥
त्रिपुटे द्विचतुःपञ्चसप्तम्याद्यास्तथाष्टमी ।
मन्दिरे त्रिचतुःपञ्चसप्तम्याद्यास्तथाष्टमी ॥ २१२ ॥
मध्ये द्वित्रिचतुःपञ्चाष्टम्यः सप्तमी तथा ।
अशोके द्वित्रिषट्सप्तपञ्चाष्टम्यः पूर्वया सह ॥ २१३ ॥

मात्राख्ये द्विचतुःषट्कः सप्तकस्याष्टमीयुता ।
नियतान्यष्टमीषष्ठीतुर्यावासीत्यसंज्ञिते ॥ २१४ ॥
द्विचितुर्यष्टमिषष्ठ्यो लाक्षणे सप्तमी तथा ।
द्विसप्तान्यष्टमीषष्ठीपञ्चकस्याष्टम सुदर्शने ॥ २१५ ॥
नियतान्यष्टमीषष्ठीसप्तकस्याष्टमाष्टमा तथा ।
द्विभिन्नसप्ताष्टमीषष्ठीपञ्चम्यो चाभिसंज्ञिते ॥ २१६ ॥
नैव पूर्वचितुःपञ्चद्वसप्तम्योऽष्टमी तथा ।
वले स्युर्द्विचतुःपञ्चद्वसप्तम्योऽष्टमी तथा ॥ २१७ ॥
योधे च त्रिचतुःपञ्चद्वसप्तम्योऽष्टमी तथा ।
एकद्वित्रिचतुःपञ्चषद्सप्तम्यो भवन्ति चेत् ॥ २१८ ॥
सूचात्सप्तमी आचार्यैरिति प्राहुर्विचेतनम् ।
एकद्वित्रिचतुःपञ्चषष्ठ्यो यत्र तथाष्टमी ॥ २१९ ॥
नद् वैतत्तमिति प्राहुर्वास्तुविचारविदो बहम् ।
एकद्वित्रिचतुःपञ्चसप्ताष्टम्यो यदे यदि ॥ २२० ॥
सूचा भवन्ति नद् विद्यात् प्रत्यभिज्ञाभिधानतः ।
एकद्वित्रिचतुर्थैः स्युः षष्ठी सप्तम्यथाष्टमी ॥ २२१ ॥
यस्मिन् सूचात्तदन्याहुः प्रभावमिति सम्मितम् ।
चतुर्थान्तर्जिताभिः स्यात्सूचाभिर्वृत्तम चाह्नुतम् ॥ २२२ ॥
करं तुतीयाष्टमिभिर्विज्ञातव्यं नियेवाणम् ।
सूचाभिर्द्वितीयाभिर्वर्ज्यीभिरसङ्गवाहनम् ॥ २२३ ॥
सुरम्यावान्तमतान्यभिरष्टाभिः सर्वमङ्गलम् ।
इत्येकमद्वयश्रुतीनि वैहमान्युक्तानि यावद्दयमष्टमवृत्तम् ।
पर्णार्धतुङ्गवालसग्रमेयात् यो वेत्ति सूत्रं स लभेत लोके ॥ २२४ ॥

इति श्रीमहाकविदत्तश्रीलोचनविरचिते छन्दःशास्त्रवृत्तरत्नाकरे वस्तुकोशे
मात्रासमकविभागं नाम पञ्चदशोऽध्यायः ।

# अथ निम्नोच्चादिफलानि नाम विंशोऽध्यायः ।

प्राक्प्लवः पूर्वतः प्राच्यां द्रुमेण निम्नगो यदि ।
यतो द्वारं तदर्थं स्यात् पूर्वं हस्त्युपवाहनम् ॥ १ ॥

प्रत्यक्प्रागोदक्प्लवाभैः शाला पञ्चाधिका भवेत् ।
शाला वा दक्षिणा वापि अपरा पूर्वतोऽपि वा ॥ २ ॥

दक्षिण प्रत्यग्धिका प्रत्यक्पश्चाद्याम्यधिका शुभम् ।
उदक्पूर्वायाम्यधिका पूर्वा सन्नति विस्तराधिका ॥ ३ ॥

यस्य निम्ना भवेद् भूमिर्वामा दक्षिणतस्तथा ।
बहुदोषं हि तद् वास्तु पुत्रपौत्रविनाशनम् ॥ ४ ॥

यस्य दक्षिणतो निम्ना भूमिर्वामोन्नता भवेत् ।
धनेनापि पूर्णं तत् स्याद् भर्तुरल्पफलोदयम् ॥ ५ ॥

पश्चिमेन भवेन्निम्ना भूमिः स्थूलतरा तथा ।
फलं तत् सर्ववर्णेषु सर्वकामप्रदं गृहम् ॥ ६ ॥

अपरस्य यदा दीर्घं शालस्योच्चिकृतं भवेत् ।
धनदं स्वामिनो वास्तु चिरकालसमाप्य तत् ॥ ७ ॥

सव्यकर्णे च सकर्णे च नवैव सपरिक्रमम् ।
सप्तमं च समाक्रान्तं गृहमेवं चतुर्विधम् ॥ ८ ॥

बाह्योच्चकं च सव्यकर्णं सव्यासव्यमपोच्यकम् ।
सावष्टम्भं तु यद् वेश्म तद् विद्यात् सपरिक्रमम् ॥ ९ ॥

एकेनाप्यथ सूत्रतः पृष्ठतः पार्श्वतोऽपि वा ।
समवर्णे स्याद्विभिन्दैश्च लक्षणं तु पृथक् पृथक् ॥ १० ॥

पश्चोदीच्यास्तु वर्णाद्यो दूरतो दक्षिणेन वा ।
शुभे राजप्रसादाय दक्षिणेऽर्थविवर्धनः ॥ ११ ॥

वामतस्तु न कर्तव्य एकोऽलिन्दो न पृष्ठतः ।
वामतोऽर्थविनाशाय पृष्ठतो म्रियते गृही ॥ १२ ॥
यस्य स्यातामलिन्दौ द्वौ पृष्ठस्योभयपार्श्वयोः ।
धनलाभं विजानीयात् तस्यैवेह कुटुम्बिनः ॥ १३ ॥
यस्य स्यातामलिन्दौ द्वावग्रतः पृष्ठतस्तथा ।
धनधान्यमवाप्नोति सौभाग्यं चापि तद्गृही ॥ १४ ॥
यस्य वा पूर्वकालिन्दो पृष्ठतो दक्षिणेन वा ।
राजप्रसादैस्तत्स्वामी धनधान्यैश्च वर्धते ॥ १५ ॥
वामतो पूर्वकालिन्दो पृष्ठतश्च कृतो यदि ।
राजदण्डभयं विद्यात् पत्नी चास्य विपद्यते ॥ १६ ॥
दक्षिणो पूर्वकालिन्दः पश्चिमश्च कृतो यदि ।
ततः परापि वृद्धिः स्यात् सौभाग्यं च धनं भवेत् ॥ १७ ॥
पृष्ठतो पूर्वकालिन्दो वामतश्च कृतो यदि ।
कलहमरणं तत्र भवेत् दुर्भगतापि च ॥ १८ ॥
पृष्ठतो वामतश्चैव पुरतो दक्षिणेन वा ।
अलिन्दस्य कृतस्याथ धनधान्योऽनुक्रमात् फलम् ॥ १९ ॥
पृष्ठतो धननाशाय धनलाभाय दक्षिणे ।
अग्रे राजप्रसादाय वामतोऽर्थविनाशनः ॥ २० ॥
लक्षणैर्न तु यद्वास्तु सर्वतः परिशोधितम् ।
त्वरितमस्तु भवेत् कर्म्यं स्वयमेव यथास्थितम् ॥ २१ ॥
आर्जितं वर्धते तस्य वृद्धिश्च स्यादुपक्रिया ।
धर्मकामाश्च वर्धन्ते कीर्तिरायुर्यशो बलम् ॥ २२ ॥
नित्यं प्रमोदितमनं नित्यं सन्निहितमिव तत् ।
मृत्युव्याधिविनाशैश्च विनाशोऽर्थे निरामयम् ॥ २३ ॥
तत्र नैकप्रकाराणि विमानान्युपकल्पयेत् ।
प्रकारेषु च सर्वेषु भित्तौ चास्यापरोक्षिणी ॥ २४ ॥

एकस्मिन् स्थापितो मृत्युरपरस्मिन् धनक्षयः ।
पूर्वोत्तरोच्छ्रितौ यस्मिन् तत्राशीर्षा प्रकाशता ॥ २५ ॥

स्मृतपञ्चदशैवास्य धान्यशालाद्विभागयुग्मयान् ।
द्विरवमानानुलोमप्रत्तुहीयवर्गमानयमिः ॥ २६ ॥

सिद्धियोगैः पञ्चालिन्दमलिन्दवृद्धिरिष्यते ।
वेदशाल्यत्र द्विशालानि कीर्त्यन्ते षड् यथाक्रमम् ॥ २७ ॥

द्विकर्णेषु द्विशालानि तत्कर्णान्तेषु निर्दिशेत् ।
संमुखे द्वे समे तानि कोणाभ्युपगतानयेत् ॥ २८ ॥

सिद्धार्थं दक्षिणामुखम् अथान्यत्पार्श्वसिद्धयः ।
यमसूर्यमुखमयतस्तत्र मृत्युभयं सदा ॥ २९ ॥

याम्यसौम्ययोस्तु दण्डः स्यात् दण्डस्तत्र सदा भवेत् ।
प्राग्वारुणयोस्तु वातायुधं वास्तु तत् कालहोत्तरम् ॥ ३० ॥

उदग्दक्षिणशालास्तु यदि शाले कारयेदथ ।
तत्र ज्ञातिविरोधः स्यात्तत् कुर्वीत कदाचन ॥ ३१ ॥

पश्चिमप्राच्ययोस्तु शालामुखे चुल्लीवास्तु निर्दिशेत् ।
तत्र वित्तक्षयो घोरः कदाम्बोत्पन्न कारयेत् ॥ ३२ ॥

चतुश्शालं त्रिशालेषु सम्यक् प्राकारवर्जिताः ।
पूर्वेण सप्तशालेषु सन्निवेशान्त इति स्मृतम् ॥ ३३ ॥

अन्यानि चैवं दीर्घ्याहुः प्राग्मुखेषु प्रदक्षिणम् ।
अपरं यविकाले च सप्तकानिति तानि च ॥ ३४ ॥

एकस्मिन् तु काले द्वे गृहसंयुक्त उच्यते ।
न तं कुर्यात् स हि सदा मन्थवेधप्रदः ॥ ३५ ॥

इत्युक्तौ चतुःशालाफले प्रदक्षिण-
मक्षिणशालिन्यकलमन्यद्धर्मं च ।

यद् द्विविधालक्षणलक्षणं लक्ष्यमनुचिन्तयत्
सामान्यतो द्विलयोलक्ष्यं च तत्त्वतः ॥ २६ ॥

इति महाराजाधिराजश्रीविरचिते लक्षणसमुच्चये
शिलोच्चयलक्षणादिसंहितानिर्णयलक्षणस्तुतिशिलालक्षण-
शालग्रामलक्षणानि नाम विंशोऽध्यायः ॥

## अथ द्वासप्ततिशिलालक्षणं नामैकविंशोऽध्यायः ।

अथ द्वासप्ततेर्भूमिशिलानां यथाक्रमम् ।
अभिधानानि कार्त्स्न्येन लक्षणानि पृथक् पृथक् ॥ १ ॥
मुख्यानि तेषु चत्वारि कथ्यन्ते तानि नामतः ।
हिरण्यनाभं सुमेरुं सुश्री पद्मनाभेव च ॥ २ ॥
हिरण्यनाभमत्युत्कृष्टं हीनमुत्तरलक्षणम् ।
मन् स्याद् धनप्रदं मर्तुः सुमेरुं पूर्णया चिरम् ॥ ३ ॥
सुमेरुं लक्षणोपेतमृद्धिवृद्धिप्रदं विभोः ।
सुश्री चक्रिणया हीना भाग्यदा वित्तनाशिनी ॥ ४ ॥
पद्मनं चक्रिणाहीनं पैतृकं कुलनाशनम् ।
अखिलमयोगादेतेषां लक्ष्मणस्तरयोगतः ॥ ५ ॥
मुख्यायोगाच्च भेदाः स्युरष्टधा पृथक् पृथक् ।
जाम्बूनदं हिरण्याख्यं कनकाख्यं हेमसंज्ञितम् ॥ ६ ॥
कनकं काञ्चनं स्वर्णं सुवर्णं च ततः परम् ।
सम्भावर्णकं सारं च तथा चामीकराह्वयम् ॥ ७ ॥
तपनं नाभसौर्यं च शातकुम्भमथापि च ।
हिरण्यनाभं कल्याणं भूषणं भूतिभूषणम् ॥ ८ ॥

भेदा हिरण्यनाभस्यैतस्याष्टधा भवन्त्यमी ।
मत्तं सूर्यप्रभाख्यं च मन्दधारप्रभं तथा ॥ ९ ॥
चतुर्थं केसरीन्दुस्थं वामनं मेरुमेव च ।
हरिं हंसं सारसाख्यं(ख्यं) कुञ्जरं नीपदं तथा ॥ १० ॥
मेघमालाभिधानं च चतुरस्रं महोधरम् ।
कर्णेन्नं गाजतभाण्यात् सुभद्रं मकरं तथा ॥ ११ ॥
सुभद्रकाद्भुतगालान्याद्भुतधान्यय् धान्यपूरकम् ।
गुल्मीभेदमथ भूमलेखाभाद्यं सुकाञ्चनम् ॥ १२ ॥
निर्गिताख्यं विहङ्गं च गरुडं पन्नगाह्वयम् ।
सालचिह्नं च सर्पं च कोपसंज्ञं मणान्वरम् ॥ १३ ॥
उद्दामाख्यं तत्र्यास्त्रं त्रिलोकं कल्याणमम् ।
वारणं वारणी गुल्मी ककुभं कन्दरं तथा ॥ १४ ॥
इति गुल्मीभेदेषु षष्टिर्याणि वदाह च ।
भूयः पद्मसंपद्मपद्मनामानि सन्त्यति ॥ १५ ॥
राक्षसे *व्याघ्रसंहारं वैद्यादि सुरवाहनम् ।
पोचणं व्याघ्रकार्मुके श्रीवत्साख्यं त्रिदशोभनम् ॥ १६ ॥
मत्तवं च सिंहानन्दं शाकुनं त्रिमिनिर्मणी ।
त्रिपुरंहंसपक्षावे सुलभ नैमिपूरणम् ॥ १७ ॥
इत्यष्टाचत्वा पञ्चभेदाः प्रोक्ता यथाक्रमम् ।
हिरण्यनाभभेदेषु वन्धं जात्मनुगं गृहम् ॥ १८ ॥
भाग्याद्यामिश्रलसुभिर्भूषाभिकपलक्षितम् ।
पञ्चाद्याद्विशिपभक्त्यो हिरण्यं नाम नन्द्यभेम ॥ १९ ॥
पञ्चकपाद्याद्विभूर्णाभिः स्यात् सर्वम् सर्वमयं गृहम् ।
भाग्यादिभिर्भूर्णपञ्चभ्यो पत्र सद्धमसंज्ञितम् ॥ २० ॥

द्वित्रितुर्यपञ्चमीभिः कमलं कमलोद्भवम् ।
सप्तमीभिर्द्वित्रिषष्ठीभिः काञ्चनं काञ्चनप्रभम् ॥ २१ ॥
आद्याद्वितुर्यषष्ठीभिः स्वर्णं स्वर्णविभूतये ।
सुवर्णमाद्यात्त्रिचतुःषष्ठीभिः स्यात् सुवर्णदम् ॥ २२ ॥
स्यात् द्वित्रितुर्यषष्ठीभिः सन्नाभं तापशान्तिकृत् ।
आद्याद्विपञ्चमीषष्ठ्यो यत्र तत् सारमुत्तमम् ॥ २३ ॥
चामीकरं त्रिचतुराद्यापञ्चमीभिर्द्युतोत्तमम् ।
द्वित्रिषट्पञ्चमीभिः स्यात् तपनं नाम मन्दिरम् ॥ २४ ॥
षट्तुर्याद्यापञ्चमीभिस्तापनीयमनुत्तमम् ।
शातकुम्भं द्विषट्पञ्चचतुर्थीभिर्भवेद् गृहम् ॥ २५ ॥
हिरण्यनामं त्रिचतुःपञ्चषष्ठीभिरीरितम् ।
कल्याणमाद्याच्चतुःपञ्चषष्ठीभिरुच्यते ॥ २६ ॥
षट्पञ्चद्वित्रितुर्याभिर्भवेद् भूधरसंज्ञितम् ।
आद्याद्वित्रिचतुःपञ्चषष्ठीभिः मेरुरुत्तमः ॥ २७ ॥
अथ सुमेरुभेदानां लक्षणान्यभिदध्महे ।
पञ्चाद्याद्वित्रितुर्याभिस्तारकं नाम मन्दिरम् ॥ २८ ॥
पञ्चाद्याद्वित्रिपञ्चकल्पनात् सूर्यप्रभमुच्यते ।
आद्याद्वितुर्यपञ्चकल्पो यत्र तन्मन्दसारकम् ॥ २९ ॥
आद्यात्त्रितुर्यपञ्चकल्पो यत्र तत् केसरी विभुः ।
वासवं पञ्चमीतुर्याद्वितीयाभिस्तदुच्यते ॥ ३० ॥
षष्ठ्याद्याभिर्द्वितीयाभिरिन्द्रमन्दिरमीरितम् ।
आद्याद्वितुर्यषष्ठीभिर्हरिसंज्ञमुदाहृतम् ॥ ३१ ॥
आद्यात्त्रितुर्यषष्ठीभिर्हंससंज्ञं निवेशनम् ।
षष्ठीद्वित्रिचतुर्थीभिः सारसं नामतो भवेत् ॥ ३२ ॥
आद्याद्विपञ्चषष्ठीभिः कथयन्तीह कुञ्जरम् ।
आद्यात्त्रिपञ्चषष्ठीभिर्विज्ञेयं तोयदं गृहम् ॥ ३३ ॥

मेघमालं त्रिचद्रूपमाद्वितीयाभिरुदाहृतम् ।
वारासारं चतुःपञ्चद्रुताद्याभिर्भवेद् ध्रुवम् ॥ ३४ ॥
द्विचतुःपञ्चषष्ठीभिर्मण्ठोदरमिति स्मृतम् ।
कर्दमं नाम षट्पञ्चत्रितुर्याभिर्भयावहम् ॥ ३५ ॥
षट्पञ्चतुर्यान्त्याद्याभिः सुखेभं स्यात् धनमयम् ।
द्वित्रिषट्पञ्चतुर्याभिर्भवेत् मकरकुञ्जरम् ॥ ३६ ॥
आद्याभिश्च दशैताभि- र्विलेयं चाभ्यपद्धकम् ।
जलाद्यचीले सुखेष्वपद्मेवाः प्रकीर्तिताः ॥ ३७ ॥
आद्याद्वित्रिचतुर्थीभिर्भवाभिः स्यात् कुलक्रमम् ।
त्रिभ्यांस्त्राद्यपञ्चभिर्द्वितीयाभिर्विभावनम् ॥ ३८ ॥
आद्याद्विपञ्चतुर्थीभिर्वहन्तीभिर्विभि ?( वन्तीह भि )हृद्ममम् ।
पञ्चाद्यात्रिचतुर्थीभिर्भूताभिर्भक्तुलं विदुः ॥ ३९ ॥
पञ्चद्वित्रिचतुर्थीभिः चक्रं नायको भवेत् ।
सालङ्कृतं षडाद्यात्रिद्वितीयाभिर्भवेद् ध्रुवम् ॥ ४० ॥
आद्याद्वितुर्यापञ्चमीभिः सर्पमित्यभिधीयते ।
आद्यात्रिषट्चतुर्थीभिः क्रोधमित्यभिधानितम् ॥ ४१ ॥
षट्चतुर्द्वित्रिद्वितीयाभिर्भवेद् वेदम अनन्तरम् ।
आद्याद्विपञ्चषष्ठीभिस्तेजःकलयुताकुलम् ॥ ४२ ॥
सम्पूर्णाससमाद्यापञ्चत्रिषष्ठीभिर्भवनावनम् ।
द्वित्रिषट्पञ्चषष्ठीभिस्तु श्रीमित्योषममिधीयते ॥ ४३ ॥
तुर्याद्यापञ्चषष्ठीभिः कल्याणमनुपपते ।
द्विचतुःपञ्चषष्ठीभिर्धारणं मुखधारणम् ॥ ४४ ॥
त्रिचतुःपञ्चषष्ठीभिर्धारणं जीविधारणम् ।
चाद्याद्यात्रिचतुःपञ्चषष्ठीभिर्विश्वमातामयम् ॥ ४५ ॥

षट्पञ्चाद्वित्रिचतुर्थाभिः ककुभं नाम मन्दिरम् ।
कन्दरं षट्चतुःपञ्चत्रिकाद्याभिर्गृहाचलम् ॥ ४६ ॥
अथाष्टादश कल्प्यन्ते भेदाः षाडवलक्षणाः ।
तेषु शङ्खसमाख्याद्वित्रिचतुर्थीभिरुच्यते ॥ ४७ ॥
पञ्चाद्याद्वितृतीयाऽभिर्व्योमसालमीरितम् ।
पञ्चाद्याद्विचतुर्थीभिर्वैकारीति निगद्यते ॥ ४८ ॥
आद्यात्रिपञ्चतुर्थाभिर्विज्ञेयं देवदारुकम् ।
पञ्चत्रिद्विचतुर्थीभिर्योजनं दुःखयोजनम् ॥ ४९ ॥
षष्ठाद्याद्वितृतीयाभिरूर्ध्वमिश्रमितीर्यते ।
आद्याद्वितुर्यषष्ठीभिः शार्दूलं व्याधिवेशनम् ॥ ५० ॥
आद्यात्रितुर्यषष्ठीभिः क्रोधनं दुःखयोजनम् ।
षट्तुर्यद्वितृतीयाभिर्विज्ञानीयाद् वियोजनम् ॥ ५१ ॥
आद्याद्विपञ्चषष्ठीभिर्मत्तयं नाम मन्दिरम् ।
निरानन्दाख्यमाद्यात्रिपञ्चषष्ठीभिरुच्यते ॥ ५२ ॥
पञ्चषड्द्वितृतीयाभिः पाञ्चजं नामतो भवेत् ।
चित्रमाद्याच्चतुःपञ्चषष्ठीभिर्योगवर्जनम् ॥ ५३ ॥
निर्घृणं षट्चतुःपञ्चद्वितीयाभिरलीकपङ्कम् ।
त्रिचतुःपञ्चषष्ठीभिर्वदन्ति त्रिपुरान्तकम् ॥ ५४ ॥
षट्पञ्चतुर्याभ्या[ द्या ]भिः पवनं सुनरासनम् ।
षट्पञ्चद्वित्रितुर्याभिः सुलभं सुलदुर्लभम् ॥ ५५ ॥
षट्पञ्चद्वित्रितुर्याभ्या षष्ठ तद् वैरिपूरणम् ।
पञ्चमस्वाद्गुणान्धेयं षडाद्यष्टादश क्रमात् ॥ ५६ ॥
चतुराद्यासिकाशेषु मूर्च्छा नाम्ना न चान्तरा ।
स्यात् निषादं द्वितीयां च त्रिवाले चतुर्मङ्गलम् ।
षाडवाः कम्बमुक्त्यज्ज त्रिस्थालविधिनीरिताः ॥ ५७ ॥

द्विरश्वपरामादिभिरिशोत्तमानां चतुष्पदस्यैवमसौ प्रकारः ।
द्विसप्ततिः कृत्स्नमथोपदिष्टाः प्रत्येकमत्राश्रयभेदयुक्ताः ॥ ५८ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे

द्वासप्ततिविभागलक्षणं नामैकविंशोऽध्यायः ॥

## अथ द्विशालगृहलक्षणं नाम द्वाविंशोऽध्यायः ॥

द्विशालानि विधानात् स्युः शुभान्यशुभानि च ।
लक्षणानि क्रमात् तेषामिदानीं सम्प्रचक्ष्महे ॥ १ ॥
सिद्धार्थं यमसूर्यं च दण्डाख्यं वातसंज्ञितम् ।
चुल्ली काचं च मुख्यानि द्विशालानि भवन्ति हि ॥ २ ॥
अनेकभेदभिन्नानि वस्तुप्रस्तारयोगतः ।
मूलभेदक्रमेण स्युर्येषां भेदक्रमेण तु ॥ ३ ॥
तथा विलीनरूपत्वात् वीथिकालिन्दमार्गतः ।
प्राग्दीर्घादिविधानेन द्विशाल्यादिविपर्ययात् ॥ ४ ॥
यथासम्भवमेतानि कथयामः समासतः ।
निर्याहस्य मूलाग्रमनिर्याहस्य भागतः ॥ ५ ॥
कल्पनो गुण्यते रूपाण्यशुभानि शुभानि च ।
हितार्थाय भवेन्नृणां वर्णिनां त्रिविधामपि ॥ ६ ॥
हस्तिनी महिषी चेति द्वे शाले यत्र वेश्मनि ।
तत् सिद्धार्थमिति ज्ञेयं वित्तसम्पत्तिकारकम् ॥ ७ ॥
सम्पूर्णं महिषीगव्याभ्यां भवेद् यमसूर्यकम् ।
धन्यं स्याच्छागलीगावीशालाभ्यां दण्डमीरितम् ॥ ८ ॥
वातं करोत्युष्ट्रगावीयुक्तमुद्वेगकारकम् ।
महिष्यजाभ्यामुद्वेगकृच्चुल्ली भयावहा ॥ ९ ॥

कार्यं कोष्ठगुणाधीस्यां सुहस्तीतिविनाशनम् ।
एकमूलमसूर्यं च न द्विशालेषु कारयेत् ॥ १० ॥
व्यस्तासात् कायकुल्यकोश सर्वाभिभित्तिस्तथा ।
वस्त्वार्यांशानि भिद्यन्ते लक्षमस्तारयोगतः ॥ ११ ॥
प्रत्येकमेकादशधा मण्डिरादयभिशालतः ।
अन्ये चतुर्धा भिद्येते प्रत्येकं द्वे निवेशने ॥ १२ ॥
एवां मूला भिद्यावेवात् तद्वाकारादिहेतुकाः ।
वसुधारं भवेत् तेषामाद्यं सिद्धार्थकं ततः ॥ १३ ॥
कल्याणकं शाश्वतं च सिंह कामदं तथा ।
श्रीयं शाम्भं निष्कलङ्कं धनाधीशं कुबेरकम् ॥ १४ ॥
सिद्धार्थमनुजात्येषमेतान्येकादश क्रमात् ।
संहारं यमसूर्यं च कालं वैवस्वतं यमम् ॥ १५ ॥
करालं विकरालं च कबन्धं सूतकं रोगम् ।
यमसूर्यस्य भेदाः स्युः सप्तमो महिषं तथा ॥ १६ ॥
प्रचण्डचण्डे चण्डाख्यमसुखदं कालकोटरे ।
विवर्धं विघ्नं पूर्ण निर्धूमं वह्निदारुणम् ॥ १७ ॥
एकादशामी चण्डस्य भेदा चण्डभयप्रदाः ।
मकरध्वजवालाकेशान्यनिलं सर्पमञ्जनम् ॥ १८ ॥
धर्मार्थमनुपविध्वंसि * प्रलयं कलहं कलिः ।
कलियुगी च वारुणस्य भेदा उद्वेगदायकाः ॥ १९ ॥
रोगं चुल्ल्यनलं भक्षं चुल्ल्या भेदचतुष्टयम् ।
कायस्य तु फलं कार्यं कुलं ? च विरोधि च ॥ २० ॥
द्वापञ्चाशद् द्विशालानामष्टौ भेदाः प्रकीर्तिताः ।
भूमः साम्प्रतमेतेषां लक्षणानि पृथक् पृथक् ॥ २१ ॥

आद्याद्द्वितीये यद्गतो चन्द्र सूर्ये चलत्यथे ।
चतुर्थारामिकालं तद्दुष्टं सर्वाधिकारजम् ॥ २२ ॥
आद्यात्तृतीये यद्गतो चन्द्र लिखार्थकं हि तत् ।
सर्वोपद्रवनिर्मुक्तं सिद्धिवृद्धिविनाशार्थकम् ॥ २३ ॥
द्वितृतीये यद्यन्यूर्ध्वं भवेत् कल्याणवृद्धिकृत् ।
यद्यन्यचतुर्थीर्थं चान्यत् चाद्भुतमम् ॥ २४ ॥
मिश्रं द्वितीयाचतुर्थाभ्यां यद्यन्तीभ्यां सुखप्रदम् ।
कार्यं त्रिचतुर्थीभ्यां सर्वविनिनालकारकम् ॥ २५ ॥
आद्याद्याभिस्तु(स्तु) त्रिखण्डिः क्षीयते संचयं प्रभोः ।
आद्याद्द्वितीयाचतुर्थीभिः दाम्पत्ये चाम्भिमताचकम् ॥ २६ ॥
आद्यात्तृतीयाचतुर्थीभिर्भिन्नकलह समवृद्धिकृत् ।
द्वितृतीयाचतुर्थीभिर्भवेत् चमनर्थनम् ॥ २७ ॥
आद्याद्याभिश्चतसृभिः कुर्वेत् चित्तवृद्धिकृत् ।
पञ्चतुर्थयभेदेषु भूमौ लाभम् कदापि च ॥ २८ ॥
आद्याद्द्वितीयाचतुर्थाभ्यां संकर्तं स्वामिनाशकम् ।
यद्भाद्यात्तृतीयाभ्यां चातुर्यं पञ्चतुर्थकम् ॥ २९ ॥
द्वितृतीये यद्यन्यूर्ध्वं काले योषिद्विनाशनम् ।
विफलं यद्यतुर्थयमध्ये रोगकारकम् ॥ ३० ॥
चमात्कर्षं द्वितुर्याभ्यां स्वामिनो धनवर्धनम् ।
कालं त्रिचतुर्थीभ्यां भर्तुः प्राणविनाशनम् ॥ ३१ ॥
आद्याभिस्तिसृभिः स्वामिनाशनं विफलारम्भकम् ।
आद्याद्द्वितीयाचतुर्थीभिः कष्टं भर्तृनाशकम् ॥ ३२ ॥
आद्यात्तृतीयाचतुर्थीभिर्मेहीनं कुलक्षयकम् ।
सर्वं द्वित्रिचतुर्थीभिः स्वामिनो मरणप्रदम् ॥ ३३ ॥

आद्याद्यान्तिमनाडीभिः स्वामिनं कनिष्ठं विदुः ।
मध्यमं मध्यमैर्युक्तं स्त्रीणां सद्वितीयका ॥ ३४ ॥

मृत्युभागी विवाहीयात् भर्तुर्भूपभयप्रदम् ।
चन्द्रमाद्यात्तृतीयाभ्यां चन्द्रनाथभयप्रदम् ॥ ३५ ॥

एकत्रे स्यात् द्वितृतीयाभ्यां राजभयाय धारणम् ।
उद्भ्रमयाद्याच्चतुर्थाभ्यां स्वामिनो मरणीमितम् ॥ ३६ ॥

कारके द्वितीयचतुर्थाभ्यां कन्यकाक्षेपकारकम् ।
कोदरं त्रिचतुर्थीभ्यां स्वामिनो विग्रहावहम् ॥ ३७ ॥

मध्यमा( द्वि )तृतीयाभिर्विभवं धनधान्यकृत् ।
आद्याद्वितीयाचतुर्थीभिर्मिथो विग्रहावहम् ॥ ३८ ॥

आद्यातृतीयाचतुर्थीभिर्युक्तं सर्वधनावहम् ।
द्वितृतीयाचतुर्थीभिर्भिर्युक्तं धनमानकम् ॥ ३९ ॥

आद्याद्याभिधनाडीभिर्भिन्नाड्यकामयर्वकृत् ।
आद्याद्वितीयाभ्यां पृथक्यां नालभेदेषु नश्वरम् ॥ ४० ॥

एकत्रे भवेत् तत्र दम्पत्योः कलहः सदा ।
उद्वेगकारि पवनं तृतीयाद्योपलक्षितम् ॥ ४१ ॥

जनान्यं द्वितृतीयाभ्यां सदा सन्तापकारकम् ।
सन्तापोद्गारकार्याद्याच्चतुर्थाभ्यामनिलं भवेत् ॥ ४२ ॥

धनत्वं द्विचतुर्थीभ्यां शोकसन्तापकारकम् ।
तृतीयया चतुर्थ्या च धनार्धोद्वेगकारकम् ॥ ४३ ॥

आद्यया द्वितृतीयाभ्यां रोगं कार्यविनाशनम् ।
आद्याद्वितीयाचतुर्थीभिः कलहं विलासारकृत् ॥ ४४ ॥

आद्याद्वितीयाचतुर्थीभिः कलहं कलहावहम् ।
द्वितृतीयाचतुर्थीभिः कलिः सन्तापकारकम् ॥ ४५ ॥

याम्यायामितशालाभिः दक्षिणे शुद्धौ यथाक्रमा ।
रोगमार्गाद्द्वितीयाभ्यां शुद्धावेषु शोकदम् ॥ ५६ ॥
स्याद् द्वितीयतृतीयाभ्यां शुद्धौ पित्तविकारिणी ।
चतुःशालकं नाम पितृयाम्यां निवेशनम् ॥ ५७ ॥
पितृप्रभासपूर्वाभ्यां चत्वार्ये स्याच्छिवः सदा ।
उदक्शुद्धाभ्यां पूर्वाभ्यां काम्यवेदेषु पश्चिमम् ॥ ५८ ॥
कालं नाम यमेऽभिन्ने वस्तुवर्णविनाशकृत् ।
दक्षिणोत्तरसूत्राणां पौरस्त्ये वहनो यदि ॥ ५९ ॥
† क्षात्रं नाम तदा वेश्म सर्वनाशकारकम् ।
सूत्राभ्यां दक्षिणाभ्यां स्यात् कुलं त्रिकुलक्षयम् ॥ ६० ॥
दक्षिणोत्तरसूत्राणां पाश्चात्ये वहनो यदि ।
*विरोधं नाम तद्वेश्म सर्वलोकविरोधकृत् ॥ ६१ ॥
कथ्यान्येवं द्विकथनाद् द्विशालानां समासतः ।
एतानि सूत्रवहनभेदात् फलभेदाच्च निवर्तितानि ।
द्विशालभेदसम्यक्शुभफलशालालब्धशुभाशुभान्यन्ते भवन्ति सम्यक् ॥ ६२ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
द्विशालगृहलक्षणं नाम द्वाविंशोऽध्यायः ॥

## अथ एकशालालक्षणफलादि नाम त्रयोविंशोऽध्यायः ।

गृहाणामेकशालानां वक्ष्यामो लक्षणान्यथ ।
शालानां निर्मितानां च यथावद्गुणदर्शनाः ॥ १ ॥
विन्यसेद्वास्तुनः पूर्वं दृढस्य वर्णात् यथाविधि ।
पञ्च एव प्रवर्तन्ते भेदाः षोडश वेश्मनाम् ॥ २ ॥

गुरोरधो लघुं न्यस्येत् पूर्वं शेषं यथोपरि ।
गुरुभिः पूरयेत् पश्चाद् यावत् स्युर्लघवोऽखिलाः ॥ ३ ॥

दद्यादलिन्दान् सर्वेषु लघुस्थानेषु पण्डितः ।
सम्याकार्णं गृहद्वाराद्येतांश्च विनियोजयेत् ॥ ४ ॥

एषामलिन्दसंयोगाद् भवनानां पृथक् पृथक् ।
नामानि गुणदोषांश्च वक्ष्यन्तेऽनुक्रमादतः ॥ ५ ॥

ध्रुवं धान्यं जयं नन्दं खरं कान्तं मनोरमम् ।
सुमुखं दुर्मुखं क्रूरं सुपक्षं धनदं क्षयम् ॥ ६ ॥

आक्रन्दं विपुलं चैव विजयं गृहमुत्तमम् ।
ध्रुवे जयमवाप्नोति धान्ये धान्यागमो भवेत् ॥ ७ ॥

जये सपत्नाञ् जयति नन्दे सर्वाः समृद्धयः ।
खरमायासदं वेश्म कान्ते च लभते श्रियम् ॥ ८ ॥

आयुरारोग्यमैश्वर्यं तथा वित्तस्य सम्पदः ।
मनोरमे मनस्तुष्टिर्गृहभर्तुः प्रकीर्तिता ॥ ९ ॥

सुमुखे राज्यसन्मानं दुर्मुखे कलहः सदा ।
क्रूरव्याधिभयं क्रूरे सुपक्षे गोत्रवृद्धिकृत् ॥ १० ॥

धनदे हेमरत्नादि गाश्चैव लभते पुमान् ।
क्षयं सर्वक्षयं गेहमाक्रन्दं ज्ञातिमृत्युदम् ॥ ११ ॥

आरोग्यं विपुले ख्यातिर्विजये सर्वसम्पदः ।
यदि धान्ये द्वितीयोऽपि मुखालिन्दः प्रयुज्यते ॥ १२ ॥

तद् गृहं रत्नधामेव भर्तुः सौभाग्यकारकम् ।
मुखालिन्देन सन्धार्य द्वितीयेन सुयोजितम् ॥ १३ ॥

लक्ष्मीनिवासमिति ख्याते तस्मिन् श्रीर्नित्यमाविशेत् ।
अलिन्दकेषु द्वितीयोऽपि कल्याणाख्ये निषेध्यते ॥ १४ ॥

सुक्षेत्रं तद् भवेद् भर्तुर्वृद्धिकृद् भवनोत्तमम् ।
कुक्कुटस्य पश्चालिन्दो नन्दोऽन्त्यो विनिवेश्यते ॥ १५ ॥
वर्धमानं तदा तत् स्यात् स्वामिलक्ष्मीविवर्धनम् ।
कूटे पूर्वं द्वितीयेन मुखालिन्देन मन्दिरम् ॥ १६ ॥
करालं तद् विजानीयाद् भर्ता तस्य विनश्यति ।
अलिन्देन द्वितीयेन पश्चाद् योजितं पुनः ॥ १७ ॥
सुकान्तं तद् भवेत् तस्मिन् नरस् पुत्रानवाप्नुयात् ।
नागदन्तस्य पुरोभागे यदालिन्दः कृतोऽपरः ॥ १८ ॥
ध्वाङ्क्षसंज्ञं गृहं तज्ज्ञा निन्दितं प्रवदन्ति तत् ।
द्वितीयालिन्दपश्चान्ना विजयस्य मुखे यदि ॥ १९ ॥
तत् सवक्त्रमिति ख्यातं गृहं स्यात् पुण्यकर्मणाम् ।
धान्यमुक्तानि कुर्वाणि पूर्णचन्द्राणि बोधया ॥ २० ॥
शालात्रिभागं कल्पीयां निर्यूहं चतुराद्य विन्यसेत् ।
शोभनान्यै च येषाः स्युः संज्ञाश्चैषामनुक्रमात् ॥ २१ ॥
सुन्दरं वरदं भद्रं प्रमोदं विपुलं शिवम् ।
सर्वलाभं विशालं च विलक्षणमतुलं ध्वजम् ॥ २२ ॥
मधूद्योतं भीषणं छन्दमलिनं कुलनन्दनम् ।
नामनिर्देशमात्रमेषां गुणदोषान् प्रकल्पयेत् ॥ २३ ॥
यथार्थनामान्येतानि यस्मात् सोत्कण्ठमीरितात् ।
एवम् एकादशानि स्युर्वेश्मान्यन्यानि बोधत ॥ २४ ॥
शालामुखोऽभिनिर्युक्तानिर्यूहपक्षाव्यकारणात् ।
ईशं सुलक्षणं सौम्यं अचलं सत्यमुत्तमम् ॥ २५ ॥
रुचिरं सम्पूर्णं क्षेमशालेयं सुभूतं ध्रुवम् ।
कुम्भकं रूपमानन्दं सुनन्दं चेति कीर्तितम् ॥ २६ ॥
एतान्यपि यथार्थत्वाद् गुणदोषान् विकल्पयेत् ।
शालामध्ये च निर्यूहं चतुराद्य विनिवेशयेत् ॥ २७ ॥

विहाय मर्मणां वेधानमीषामेव वेश्मनाम् ।
योजनीय परेऽपि स्युर्भेदास्तेषां यथाक्रमम् ॥ ५८ ॥

कथयामः समासेन यथार्थैरेव नामभिः ।
अलङ्कृतमलङ्कारं रमणं पूर्णमम्बरम् ॥ ५९ ॥

पुण्यं सुगर्भं कलशं सुगन्धं रिक्तमौक्तिकम् ।
सुभद्रं वर्धितं दीर्घं विमर्दं सर्वकामदम् ॥ ६० ॥

वासान्तः स्थितवक्त्रद्वारपक्षाश्रयपर्यरैः कृतैः ।
एभ्योऽपरेऽपि निर्दिष्टा भेदाः षोडश वेश्मनाम् ॥ ६१ ॥

सभद्रं भासितं कीर्तं तिलकं कीलकं सुखम् ।
पयोदं कुमुदं कान्तं भासुरं सर्वभूषणम् ॥ ६२ ॥

वसुभारं धनदरं कुपितं विलसद्विषम् ।
कुलोदर्यं च विज्ञेयं गुणदोषास्तु पूर्ववत् ॥ ६३ ॥

अनन्तरमिहोक्तानि यानि वेश्मानि षोडश ।
प्रत्येकं नामलिङ्गेन परिकु(ष्कु)र्वीत चतुर्विधाम् ॥ ६४ ॥

गृहेभ्यः प्रयत्नानि कथयामो विभाजनः ।
चूडामणिं समर्गं च क्षेमं शेखरमद्भुतम् ॥ ६५ ॥

विजयं भूतिदं रुद्रं विरोधं कालपाशकम् ।
निराम्यं सुभालं च रौद्रं सौम्यं मनोरथम् ॥ ६६ ॥

सुभद्रं चेति सप्तं संज्ञाभिरुपलक्षयेत् ।
वेश्मनामेकशालानां ज्ञानं स्यादनुरूपतरम् ॥ ६७ ॥

कथितं तत्र संस्थानैर्नामभिश्च यथाक्रमम् ।
हंसिनी महिषी गावी वानरी च यथाक्रमम् ॥ ६८ ॥

गड्डपेन द्विरूपाणि भूमौ मानानि वेश्मनाम् ।
द्विहंसकं द्विचक्राह्वं द्विसारसमपापरम् ॥ ६९ ॥

द्विकोणिकं बुधैः ख्यातं हस्तिकर्णादेः क्रमाद् यद्वत् ।
श्रीपथादुपपृष्ठान्यानां क्रमाद्वाच्यानि सूरिभिः ॥ ५० ॥
कुलैर्वापीव नाशाय भवेद् वेश्म द्विकोणिकम् ।
इत्येकशालभवनान्युदितान्यशेष-
वद्वास्त्वमानपदकोपचरणादिभेदैः ।
संज्ञा च लक्षणफलैः कथितानुलाभैः
शालाभिरेवमपराणि च युग्मजानि ॥ ५१ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
एकशालाद्यष्टकवास्तुफलादिद्वित्रिशालभवनफलानि नाम त्रयोविंशोऽध्यायः

## अथ द्वारपीठभित्तिमानादिकं नाम चतुर्विंशोऽध्यायः ।

कर्णशालानिषद्धानि मध्यवेश्मान्तरस्थितैः ।
अलिन्दवाजिवारीणि स्युर्द्विशालानि यथा षट् च ॥ १ ॥
ईश्वरं वृषभं धर्मं रौद्रं पार्श्वं नयप्रदम् ।
मन्दरं लाभदं व्याकुलं विपुलं विलयं क्षयम् ॥ २ ॥
पार्श्वं च विपरीतं च माहुकं चेति नामतः ।
एतानि हस्ताकम्पानि विद्याद् गेहानि यत्नतः ॥ ३ ॥
अलिन्दौ निर्गमानकोणगानां यथाक्रमम् ।
एकद्वित्रिचतुर्भङ्क्या हलकानां प्रकल्पयेत् ॥ ४ ॥
यदि च क्रमयोगेन कक्ष्योदेशा भवन्ति च ।
लक्षणैरीश्वरं नाम हलकेन गृहं भवेत् ॥ ५ ॥
सर्वलक्षणसंपूर्णं सर्वर्द्धिफलदायकम् ।
वृषभं तु द्वितीयेन गुणचारविवर्जितम् ॥ ६ ॥

प्रथमं च द्वितीयं च यत्रैते तु हलके यदि ।
चन्द्रं वृद्धिकरं नृणां सर्वलक्षणसंयुतम् ॥ ७ ॥
वायव्ये हलके यत्र रोगं रोगविवर्धनम् ।
प्रथमे च तृतीये च यत्रैते तु हलके यदि ॥ ८ ॥
पायं तन्नामतो वास्तु सर्वसम्पत्प्रयोजनम् ।
पितृरोगोत्थकलहोत्थाभ्यां अवश्यं रोगकृल्लये ॥ ९ ॥
पितृरोगाभिवृद्धेषु मन्दनं शुभमादिशेत् ।
सुखमर्थप्रदं कान्तं हलके परिकीर्तितम् ॥ १० ॥
ईशान्यां तु चतुर्थेन लाभकं लाभकं शुभम् ।
लाङ्गलाख्या यदा शाला ईशान्यां च यदापरा ॥ ११ ॥
व्याहृतं तन्नामतो वास्तु वरिष्ठानां विधीयते ।
द्वितीया च चतुर्थी च शाला लाङ्गलके यदि ॥ १२ ॥
सिद्धं सिद्धनामानं प्रयाणेऽत्र कुटुम्बिनः ।
आद्या शाला द्वितीया च चतुर्थी च यदा पुनः ॥ १३ ॥
तिलकं हालिकं सिद्धं गृहे तत्र विलासकारणम् ।
वायव्यं हलके वह्निरीशान्यां च यदा पुनः ॥ १४ ॥
सर्वं भयकरं सिद्धं हलकेषु गृहं भवेत् ।
अग्निवायुमहेशानां शाला लाङ्गलके यदि ॥ १५ ॥
यान्यं मृत्युकरं नृणां न तत् कुर्यात् कदाचन ।
मध्ये नैर्ऋत्यैशान्योः शालाकर्णेषु लाङ्गलम् ॥ १६ ॥
विपरीतं व्याधिकरं नृणां नाशकरं तथा ।
यत्रस्थौ हलके यत्र पादाभिव्यक्तकृताः स्थिताः ॥ १७ ॥
मधूकं नाम तद् वास्तु सर्वमङ्गलयोजकम् ।
द्वारोच्छ्रायं भवेत्सारं तलोच्छ्रायं च वेदनाम् ॥ १८ ॥

पीठस्य च समुत्सेधं भित्तिविस्तारमेव च ।
तथा दारुकलां(ला) चैव या प्रोक्ता गृहकर्मणि ॥ १९ ॥
एकशालाविधाने च तेषां नामानि यानि च ।
तत् सम्प्रति प्रवक्ष्यामो यथावदनुपूर्वशः ॥ २० ॥
षोडशानां समुद्दिष्टो विंशतेरपि चापरः ।
विंशतेः सचतुष्कायास्तथाष्टाविंशतेरपि ॥ २१ ॥
द्वात्रिंशतोऽपरश्चेति † पञ्च वर्गाश्रिता मताः ।
शालाचतुर्थभागेन भित्तिविस्तार इष्यते ॥ २२ ॥
वर्गेषु भित्तिरुक्तोक्तं षोडशादिषु पञ्चसु ।
सर्वपीठा भवेद् यत्र भित्तिस्तम्भतुलादिभिः ॥ २३ ॥
कुर्वीत ह्रासं वृद्धिं वा तत्र सर्वकपर्दां त्यजन् ।
भित्तिसंयुतविस्तारं कार्यमुद्दिश्य बुद्धिमान् ॥ २४ ॥
शालाप्रविष्टं कुर्वीत ‡ हीनवास्तुप्रसिद्धकम् ।
चतुरश्रीकृते क्षेत्रे भूमिभागे समीकृते ॥ २५ ॥
उपरिष्टाद् भवेत् पीठं • तलादर्धसमुच्छ्रितम् ।
विपुले तु ततः पीठे वास्तुविस्तारतोऽङ्गुलम् ॥ २६ ॥
प्रतिहस्तं समुद्धृत्य संख्यया सह योजयेत् ।
ह्रासोच्छ्रायाः समाख्याता वर्गभूतेषु पञ्चसु ॥ २७ ॥
स्तम्भपार्श्वेन वैपुल्यमष्टांशेन विवर्जितम् ।
द्वारविस्तारपादांशो पक्षविस्तार इष्यते ॥ २८ ॥
विस्तारार्धेन बाहल्यं सार्धं वेधा तलोपरि ।
उत्तरोत्तरवैपुल्यं कुर्याच्छालावशाद् बुधः ॥ २९ ॥

वेश्मा विस्तारबाहुल्ये विधेये चाल्पयोरपि ।
द्वारविस्तारपादेन सूत्रे स्तम्भस्य विस्तृतिः ॥ ३० ॥

दशांशनयविहीनांश चतुः स्तम्भेन सम्मितः ।
स्तम्भभागस्य त्रिभागेन पट्टकोटिर्विधीयते ॥ ३१ ॥

हीनमङ्गलमायामे स्तम्भमानात् तु चतुर्गुणम् ।
पट्टान्यान्यनुकुर्वीत      तत्र स्थास्यबाहुल्ययोस्तथा ॥ ३२ ॥

पट्टकोष्ठर्धमुत्सेधाद्धुरेभार्धेन निर्गमम् ।
गम्भकरस्य प्रमाणं स्यादिति शास्त्रविदो विदुः ॥ ३३ ॥

मुख्यात्पुर्वतुर्पर्यन्त पादपादविभागतः ।
पट्टकोष्ठमस्तुर्येन प्रतिभागेन ह्रासयेत् ॥ ३४ ॥

पूर्वाभिमुखं गृहं यत्तु द्वारं माहेन्द्रसंयुतम् ।
हस्तिनी च भवेच्छाला तद् गृहं भद्रसंज्ञितम् ॥ ३५ ॥

भद्रं भद्रकरं नॄणां पुत्रपौत्रविवर्धनम् ।
सिध्यन्ति चास्य कार्याणि भद्राभद्रे वसन्तो गृहे ॥ ३६ ॥

दक्षिणाभिमुखं वेश्म द्वारं चास्य गृहक्षतम् ।
महिषी च भवेच्छाला तद् गृहं नन्दपीठकम् ॥ ३७ ॥

नन्दपीठगृहं पुंसां नित्यानन्दकरं स्मृतम् ।
सर्वसम्पद्गुणोपेतं धनधान्यविवर्धनम् ॥ ३८ ॥

वारुण्यभिमुखं सद्म द्वारं च कुसुमाह्वयम् ।
गावी चैव भवेच्छाला गौरवं नाडिर्मुखाः ॥ ३९ ॥

यदृच्छया प्रवृत्तानि भूतानि स्वेन वर्त्मना ।
नियम्यास्मिन् नयति यत् तद् यन्त्रमिति कीर्तितम् ॥ ३ ॥
स्वरसेन प्रवृत्तानि भूतानि स्वमनीषया ।
कृतं यस्माद् यमयति तद्वा यन्त्रमिति स्मृतम् ॥ ४ ॥
तस्य बीजं चतुर्धा स्यात् क्षितिरापोऽनलोऽनिलः ।
आश्रयत्वेन चैतेषां वियदप्युपयुज्यते ॥ ५ ॥

स्थितः सूत्रधारैः(रै)रुच्यते च सम्यक् न जायते ।
*मिश्रता पार्थिवः सूत्रधारा( णा )णाम् लिङ्ग क्रिया कथेत् ॥ ६
पार्थिवस्यापगमतो न कदाचित् विभिद्यते ।
द्रव्यान्तरादभिज्ञत्वं हि यन्त्रस्य परिकल्प्यते ॥ ७ ॥
तथा विरोधे नैवास्य पावकेनोपपद्यते ।
गन्धात् वह्नेर्विरोधस्य स्थिरता पार्थिवता बलात् ॥ ८ ॥
आत्मैव बीजं सर्वेषां प्रत्येकमपराण्यपि ।
एवं चैषा भवन्त्येषां भूयांसः सङ्करान्वयः ॥ ९ ॥
स्वयंवाहकमेकं स्यात् सकृत्प्रेर्यं तथापरम् ।
अन्यदन्तरितं वाह्यं वाह्यमन्यत् त्वदूरतः ॥ १० ॥
स्वयंवाहकमिहोत्कृष्टं हीनं स्यादितरत् मध्यमम् ।
तेषु योजनीय सुश्लिष्टत्वं निकटस्थितम् ॥ ११ ॥
यत्र( त्र )स्यवसलक्ष्यं यदेकं बहुषु साधकम् ।
तदन्यदपि संसर्गि यत्नात् विश्वकर्मोद्भवात् ॥ १२ ॥
एकः स्वीयां गतिं विधे कार्योऽन्या वाह्यकामिना ।
अन्तरसमिते कीर्ते यदपाते सूत्रमन्यथा ॥ १३ ॥
इत्थं गतिद्वयवशात् वैचित्र्यं कल्पयेत् स्वयम् ।
बालकाना विचित्रत्वं यत्नत्तु यन्त्रेषु कल्पते ॥ १४ ॥
अन्यत् स्यादन्तरत्वे( मे )र्यं द्वितीयं मध्यमं स्मृतम् ।
द्रव्यमयादिविशेषेण चतुर्णामपि योजनः ॥ १५ ॥
संस्कारादिभावात् भूतानां साङ्गैनामनिरिच्यते ।
यः सम्यग्जानाति स तु लभते जयति निधिः ॥ १६ ॥

शमठीनां तृणानां च गुल्मानां च लतस्य च ।
सारं स्थानानि च वृक्षाणां च पत्राणि फलानि च ॥ १७ ॥
प्राप्नोति किं किं न पुमान् य इदं वेत्ति तत्त्वतः ।
गृहस्थेन विलासलालामर्थेभ्य परं पदम् ॥ १८ ॥
रसेराभासमवने विज्ञानस्यैकस्यास्पदम् ।
पश्चाद् देवतानां ... प्रतिपत्तिम् ॥ १९ ॥
तास्तु ... तत्तुष्टिः पूर्वैर्बुधैः प्रकीर्तिताः ।
... स्यादर्थे कामः प्रतिष्ठितः ॥ २० ॥
सिद्धैश्चापारस्य निष्पत्तिर्मौनमाश्रम ... पूर्वकः ।
पार्थिवं पार्थिवैर्यातिः पार्थिवं ... ॥ २१ ॥
तद्वेष तेजोऽनिभिर्नित्यद्वेष ... ।
... तथा बीजैरनलैराकैरपि ॥ २२ ॥
वह्निजैश्च ... पार्थिवैर्वायुभिरपि ।
... पार्थिवैरनलैस्तथा ॥ २३ ॥
वह्निजातेऽपि बीजं स्यात् ... सोऽपि च वायु(नि)जे ।
पार्थिवानां भवेद् बीजमप्यानामपि वायवे(जलम्) ॥ २४ ॥
इति बीजानि सर्वेषां कीर्तितान्यखिलान्यपि ।
कुर्यात्करणानुसारेण ... ॥ २५ ॥
... च ... विविधान्यपि ।
[illegible] ॥ २६ ॥
काष्ठं च चर्म वस्त्रं च स्वर्णादिषु प्रयुज्यते ।
उर्ध्वकः ... ॥ २७ ॥
... च ... ।
... ॥ २८ ॥

एवमाद्यक्षितीयानि पार्थिवस्य प्रचक्षते ।
धारा च जलभारश्च पयसो भ्रमणं तथा ॥ २९ ॥
एवमादीनि भूजस्य जलजानि प्रचक्षते ।
यथोच्छ्रायो यथाधिक्यं यथा नीरन्ध्रतापि च ॥ ३० ॥
उत्थानानूर्ध्वगामित्वं स्पन्देऽथान्यस्य सन्तथा ।
मरुत् स्वभावतो गाढैर्यां पृथिव्या चलीप्सितः ॥ ३१ ॥
इत्याद्यैर्बीजसत्त्वैश्च यन्त्रकर्मविधिः कृतः ।
(रस)स्वामिनो नातिलघ्वा ये बीजं भवति भूतये ॥ ३२ ॥
काष्ठाम्बु(सु)नित्य लोहं च जलजौ पार्थिवं भवेत् ।
अन्यपवनमतादन्यत्तु निर्धूमपूर्णमनलस्तथा ॥ ३३ ॥
बीजं स्वकीयं भवति यन्त्रेषु जलजन्मसु ।
नाथाद्यं पूर्वकथितं वह्निजं जलजो भवेत् ॥ ३४ ॥
सरन्ध्रहीनस्य घटस्य पूरितः सलिलोऽन्विता ।
मरुत् बीजत्वमायाति यन्त्रेषु जलजन्मसु ॥ ३५ ॥
वह्निजातेषु सूतताम्रलोहजन्मादि तद्भवे ।
पार्थिवं कथयन्तीह बीजं बीजविचक्षणाः ॥ ३६ ॥
वाह्नीद्रैर्भवेद् बीजमत्र आपस्तथा भवेत् ।
वायोर्वैत्यादिभिः। योगैर्भवत् गच्छति बीजताम् ॥ ३७ ॥
प्रस्थैवकं च जनकं प्रेरकं धारकं तथा ।
सद्भावकं च भूताने बीजं स्यादनिलोद्भवैः ॥ ३८ ॥
प्रेरणं चाभिघातश्च निवर्तं भ्रमणं तथा ।
जलजं मारुतोत्थेषु बीजं स्यादिति सम्मतम् ॥ ३९ ॥
सरन्ध्रहीनस्य नाथाद्यैर्वायुः पावकजन्मनि ।
प्रवर्तितानि तान्येव भवन्ति पवनोद्भवैः ॥ ४० ॥

प्रेरितः सन्नुद्धृतिमश्च जानिगश्च समीरणः ।
आरम्भो बीजानां गच्छत्स्येवमसम्भवात् प्रकल्पयेत् ॥ ४१ ॥
भूतमेकमितोऽतिरिक्तमन्यद्धीनं ततोऽधिकम् ।
अन्यद्धीनतरं चान्यदेवं मार्गैर्विकल्पितैः ॥ ४२ ॥
मात्रा भेदा भवन्त्येषां कस्माद् वा कर्त्रैव बहूनि ।
निष्क्रिया भूः क्रिया त्वंशो शेषेषु सहजा स्थितु ॥ ४३ ॥
अतः प्रायेण सा जन्या क्रियाबीजप्रयत्नतः ।
साध्यस्य रूपयतनः सविवेको यत्र भवेत् ॥ ४४ ॥
यन्त्राणामाकृतिस्तेन निर्णेतुं नैव शक्यते ।
यथावद्बीजसंयोगः सौश्लिष्ट्यं श्लक्ष्णतापि च ॥ ४५ ॥
अलक्षता निर्वहणं लघुत्वं शब्दहीनता ।
शब्दे साध्ये तदाधिक्यमशैथिल्यमगाढता ॥ ४६ ॥
वहनीषु समस्तासु सौश्लिष्ट्यं चास्खलद्गति ।
यथाभीष्टार्थकारित्वं लयतालानुगामिता ॥ ४७ ॥
इष्टकालेऽर्थदर्शित्वं पुनः सम्यक्त्वसंवृतिः ।
अनुल्बणत्वं तादृप्यं दार्ढ्यं मसृणता तथा ॥ ४८ ॥
चिरकालसहत्वं च यन्त्रस्यैते गुणाः स्मृताः ।
एकं बहूनि चलयेद् बहुभिश्चाल्यतेऽपरम् ॥ ४९ ॥
सुश्लिष्टचलनलक्षत्वं यन्त्राणां परमो गुणः ।
अथ कर्माणि यन्त्राणां विचित्राणि यथाविधि ॥ ५० ॥
न विस्तराच्च सङ्क्षेपात् साम्यानं संप्रचक्ष्महे ।
कस्यचित् सा क्रिया साध्या कालः कस्यापि कस्यचित् ॥ ५१ ॥
शब्दः कस्यापि चोच्छ्रायो रूपस्पर्शौ च कस्यचित् ।
क्रियास्तु कार्यस्य वशादनन्ताः परिकीर्तिताः ॥ ५२ ॥

तीर्यगूर्ध्वमधः पृष्ठे पुरतः पार्श्वयोरपि ।
गमनं सरणं पात इति भेदाः क्रियोद्भवाः ॥ ५३ ॥

कालो मुहूर्तकालाद्यैर्मितो भेदैरनेकधा ।
शब्दो विचित्रः सुभगो रतिकृत् भीषणस्तथा ॥ ५४ ॥

उच्छ्रायस्तु जलस्य स्यात् क्वचित् सूक्ष्मोऽपि दृश्यते ।
गीतं नृत्यं च वाद्यं च पटहो वंश एव च ॥ ५५ ॥

वीणा च कांस्यतालश्च तुमिला करटापि च ।
यत्किञ्चिदन्यदप्यत्र वादित्राणि विभाव्यते ॥ ५६ ॥

समस्तमपि तद् यन्त्राज्जायते कल्पनाबलात् ।
कार्ये तु नाटके चोक्तं ताण्डवं लास्यमेव च ॥ ५७ ॥

राजमार्गश्च दैवी च यन्त्रात् सर्वं प्रसिध्यति ।
तथा चात्यद्भुतास्तेषु विकल्पा यास्तु जातितः ॥ ५८ ॥

ताः सर्वा अपि सिध्यन्ति सम्यग्यन्त्रस्य साधनात् ।
भूचराणां गतिर्व्योम्नि भूमौ व्योमचरागमः ॥ ५९ ॥

चेष्टितान्यपि मर्त्यानां तथा भूमिभृतामिव ।
जायन्ते यन्त्रनिर्माणाद् विविधानीप्सितानि च ॥ ६० ॥

यथासुरा जिता देवैर्यथा निर्मथितोऽम्बुधिः ।
हिरण्यकशिपुर्दैत्यो नरसिंहेन हतो यथा ॥ ६१ ॥

भ्रमणं हस्तियुद्धं च गजानामागतोऽपि च ।
नानाप्रकार(रा) या चेष्टा नानाचाराम्बराणि च ॥ ६२ ॥

दोलाकेल्यो विविधाश्च तथा रतिगृहाणि च ।
चित्रा सेन( ना ) च कुट्यश्च स्वयंवाद्यकलेवकाः ॥ ६३ ॥

समाश्च विविधाकाराः सत्त्वा नागाः प्रकल्पिताः ।
एवंप्रायाणि चान्यानि यन्त्रात् सिध्यन्ति कल्पनात् ॥ ६४ ॥

विधाय भूमिकाः पञ्च रम्या स्यादद्भुतापि स्थिता ।
प्रतिप्रहरमन्यासु सर्पन्ती याति पञ्चमीम् ॥ ६५ ॥

एवंमप्यत्ति चित्राणि सुकरत्वं सिध्यन्ति यन्त्रणा ।
क्रमेण विरानावर्तं स्याके दन्ता भ्रमन्त्यसौ ॥ ६६ ॥

तन्मध्ये पुत्रिका कल्प्या प्रति नारीं प्रबोधयेत् ।
अंकुश दर्शनं लोपे भक्तिसम्पातजलोद्गतिः ॥ ६७ ॥

अवस्तुनोऽपि वस्तुत्वं वस्तुनोऽपि यथान्यथा ।
निःश्वासेन विषद् याति श्वासेनाप्याति मेदिनीम् ॥ ६८ ॥

क्षीरोदमध्यगा शय्या प्रतीहारः फणाकुला ।
गोलश्च सूति( चि )विहितः सूर्यादीनां प्रदक्षिणम् ॥ ६९ ॥

परिभ्रमत्यस्यहोरात्रं ग्रहाणां दर्शयन् गतिम् ।
गजादिवृक्षे रथिकृत्पत्रो गमितः सुगमम् ॥ ७० ॥

शान्त्या शाकिकया तस्याः पर्यन्ते हन्ति भो( यो )जनम् ।
दीपिकापुत्रिका कल्प्या क्षीणं क्षीणं प्रयच्छति ॥ ७१ ॥

दीपे तैलं प्रनृत्यन्ती तालवल्या प्रदक्षिणम् ।
यावत् प्रदीपते वारि तावत् पिबति सन्ततम् ॥ ७२ ॥

यन्त्रेण कल्पितो हस्ती न नद्न् गच्छन् प्रतीयते ।
शुकाद्याः पक्षिणः क्लृप्तास्तालस्यानुगमान्मुहुः ॥ ७३ ॥

जनस्य विस्मयकृतो वदन्ति च पठन्ति च ।
पुत्रिका वा गजेन्द्रो वा तुरगो मर्कटोऽपि वा ॥ ७४ ॥

वलनैर्वर्तनैर्नृत्यैस्तालेन हरते मनः ।
येनैव कर्मणा क्षेत्रे क्रियते तेन तत्पराः ॥ ७५ ॥

पाश्चात्यानि पुनस्तद्वत् गतानि पुष्पाणीत्यपि ।
फलके कानि      तिष्ठन्ति पाश्चात्यनुगताणि च ॥ ७६ ॥

चालनी(नं) ददति पुष्पवन्ते विपर्यन्त्यथमानानुलम् ।
जल्पन्ति गायन्ति तथा वेण्वादीन् वादयन्ति च ॥ ७७ ॥

निजकद्रुतरस्य यथाम्यन्तो यन्त्रभित्तिभिः ।
पाखेटा द्विष्यमानुष्यस्ता दृश्याश्च न केवलम् ॥ ७८ ॥

दुष्करं यदयन्त्यन्न तत्तद् यन्त्रात् प्रसिध्यति ।
यन्त्राणां घटना नोक्ता गुप्त्यर्थं नाज्ञतावशात् ॥ ७९ ॥

तत्र हेतुरयं ज्ञेयो व्यक्ता नैते फलप्रदाः ।
कथितान्यत्र बीजानि यन्त्राणां घटना न यत् ॥ ८० ॥

तस्माद् व्यक्तीकृतेष्वेषु न स्यात् स्वार्थो न कौतुकम् ।
वस्तुनः कथितं सर्वं बीजमात्रमिह कीर्तनात् ॥ ८१ ॥

सम्पूर्णं स्थापिता नाहीर्यन्त्राणां कार्यं यद् यथा ।
यन्त्राणि यानि दृष्टानि कीर्तितान्यत्र तान्यपि ॥ ८२ ॥

यन्त्राणि यत्नात् तान्यत्र विज्ञेयान्युपदेशतः ।
एतत् स्वबुद्धिभास्वाभिः समस्तमपि कल्पितम् ॥ ८३ ॥

जयतनय सुरद्रुमः कथितं यत् सुरालयैः ।

बीजं चतुर्विधमिह प्रवदन्ति यन्त्रे-
ष्वम्भोऽग्निभूमिपवनैर्विहितैर्यथावत् ।
प्रत्येकतो बहुविधं हि विभागतः स्या-
न्मिश्रैर्गुणैः पुनरिदं गणनामपास्येत् ॥ ८४ ॥

किमिहास्त्यन्यत् भवति सुकवे चित्रमपरं
किमन्यद् वा तुष्टौ भवति किमु वा कौतुककरम् ।
किमन्यद् वा कीर्त्यै जनकमपरं कामसदनं
किमस्त्यन्यत् पुण्यं वा किमिह च परीतापशमनम् ॥ ८५

घृतेऽस्य पर्णं पीतमिदं बीजपूर्णाः संजायन्ते पोषिताः सूकरीः ।
मान्त्रा मात्स्यश्चिरकृत् पाकवल्लीं पर्कं पोलाद्यं पुनः पचार्यं तत् ॥८६॥

पारस्पर्यं क्षीराक्ते सोपदेशं काकमाच्यासौ वास्तुकमोंयमो वी ।
तामसीयं निर्मलः पत्व सोऽस्मिन्नभिमाण्येव वेत्ति पल्लाणि कर्तुम् ॥८७॥

निर्विर्पुंसकं ये मुनीः पचत्स्वं आत्मस्थैर्यं धान्यशाकानिकायम् ।
ये वा कृत्स्नं योजयन्तीऽत्र सम्यक् तेषां कीर्तिर्घी सुखं चाप्नोति ॥८८॥

अङ्कुशेन सितमधुलपाकेलोपितूर्णं त्रिफलं नवनृपतम् ।
संविधेयमसृग् मध्यगतन्तं श्रियसन्धि दलनाश्मर्यं तत् ॥ ८९ ॥

कारवेषु विहगेषु तदन्ना श्रिमधुद्रतलोहितमेहि ।
आप्नोति विफलन्त्वपुत्रायं स्तुवता जयति पितरं च ॥ ९० ॥

सुश्लिष्टलवणकल्पेन कृत्वा सरसमन्तर्गुरुधातुकारम् ।
मलं तथा कुण्डलपोर्गुणेन मध्ये पुटं तस्य मधु पर्येषम् ॥ ९१ ॥

पूर्वोक्तयन्त्र विधिनोपरेऽस्य क्षितेऽस्य शाल्यान्नसंस्कृतेन ।
स्वर्णं ततः लक्षमाथमधुलीकारसोद्धात्कर्कं करोति ॥ ९२ ॥

अश्विवह शाल्यालविनिर्मिते सुमति स्पष्टतलं
       विज्ञासु शाम्बल् मृगशिशुहसां यान्ति(ति) नीलयेव मासा ।
विविनासां दधिलवण्यिनो निर्मलेऽस्य यांजां
       प्रीतिं गच्छत्स्यधिकमधिकं मन्मथकीर्तिमानि ॥ ९३ ॥

वटकमूलो वेणुः पाकवो विषमय काण्ला
       वामदाहिविके चाश्वानोऽत्यन्यमून्यलिङ्गाण्यपि ।
मधुरमधिकं पचितं च स्वानि विनयात्पर्क
       नविह विधिना वल्लोम्बुकानिलस्य विभूतिमाप्नुम् ॥ ९४ ॥

लघुपक्वमयं महाविषं दलमुखितानुं विपाय तस्य ।
उपरे रसपन्नगपादचीन ज्वलनाचारमधोऽस्य पाति( ति )सूर्णम् ॥९५॥

गन्धाश्मकः कृष्णसत्त्वं चक्राङ्कोत्थाप्यमौक्तिकेनाभिरेण ।
सूतस्यान्तः पारदस्यास्य यावत्या मिश्रं कुर्वन्नन्ते याति दूरम् ॥

इत्थमेव सुरभिन्निरतुल्यं [illegible] मातृविभावम् ।
आवर्तीत विधिना चतुरोऽमलसत्त्वं पारदमूलात् एककुम्भात् ॥९

अपक्वपातालीनियमम्यचत्ति [illegible] कुम्भसुधा गुणेन ।
स्योक्तो कगिल्या मरकतम्यमौति [illegible] ॥ ९८

कुलतमिन्तनसवयसयस्य तद् विधाय रसजातिमल्लः ।
अपरेडाविधिना विनिमदं सिद्धनागसुपर्णं विदधाति ॥ ९९ ॥

स कोऽप्यस्य स्फारः स्फुरति नरसिंहस्य महिमा
  पुरस्तात् यस्यैता मदकलमधुपोऽपि द्विपवराः ।
मुहुः श्रुत्वा श्रुत्वा निनदमपि गम्भीरविषमं
  पलायन्ते भीताः [illegible] ॥ १०० ॥

[illegible] ।
सञ्चिनुयात् पञ्चरचितं [illegible] कल्पयेत् ॥ १०१ ॥

सिद्धं मीलकविधिना [illegible] कृष्णवर्मणा गुप्तम् ।
पुंसोऽथवा कुमत्या स्वयं कृष्णादिरमणीयम् ॥ १०२ ॥

रत्नगतैः मन्त्रं विधिना नारायणसङ्गतैः सूतैः ।
[illegible] विदधाति ॥ १०३ ॥

[illegible] ( आभा )दि ।
[illegible] च करोति ॥ १०४ ॥

एवमन्यदपि [illegible] विधत्ते ।
युक्तिमतेन विधिना निजबुद्धेः [illegible] ॥ १०५

पुंसो बाहुसमुच्छ्रायं रूपं कृत्वा शिलेतमुखादि ।
तत्कर्योऽभिनवदण्डं निखनेद्धि प्रतिवाणं कार्यं ॥ १०६ ॥
षड्गुलमथ मुहूर्तस्तं कुम्भहस्तमथवा यदि तत् स्यात् ।
तत्रिहस्ति निखातो निहितं नीरात् हरिं संकुलमुखं प्रसरेण ॥ १०७
ये चापरा ये सलिलपातयोऽस्मिन्नुपूर्णताः तत्र कुर्यात्तु कुर्वते ।
ये क्रीडाख्याः क्रीडार्थं च राज्ञां सर्वेऽपि स्युर्योगानतो गुणानाम् ॥१०८
इदानीं प्रकटमायतनं वापिकानां प्रवक्ष्यते ।
क्रीडार्थं कार्यसिद्धये च वापीं ताहि निर्विदुः ॥ १०९ ॥
निम्नगं भवति ग्रोणीवैभवयुक्ताभिस्तिरसाकलम् ।
यत्र तत् पाल्यबन्धः स्यात् वापिकाविनियोजनम् ॥ ११० ॥
उच्छ्रायसमपाताख्यं पक्षोर्ध्वां नालिका पयः ।
जलाधारगुणाम्बुधोपवस्तात् समनालिका(कम्) ॥ १११ ॥
यत्र पातनद्युच्छ्रायं वलितोच्छ्रायतो जलम् ।
निर्गत्य गत्वा यथास्थूर्ध्वं सन्धिद्रुमलक्षणयोगतः ॥ ११२ ॥
वलितोच्छ्रायतस्तोयं निर्गन्तूर्ध्वोर्ध्वमेरयेत् ।
सन्धिद्रुमलक्षणयोगेन तत् स्यात् पालसमोच्छ्रयम् ॥ ११३ ॥
वाप्यां वाऽपि च कूपे विधानतो दीर्घिकाविधिरा विहिता ।
पक्षोर्ध्वमस्तु गमयति नदिद्रोच्छ्रयसंज्ञितं कथितम् ॥ ११४ ॥
पातालमिवास्य रूपं यत् सलिलं धारासंस्थितं विचारित ।
तस्माद्रामास्य निरवधिनतोऽस्योच्छ्रायतुल्यस्य ॥ ११५ ॥
सलिलं सुरङ्गेवाम्भीर्ये निक्षेप वर्त्मना दूरे ।
अपूर्वमतलमध्यार्थं तदिह समोच्छ्रायतः कुरुते ॥ ११६ ॥
धारागृहमेकं स्यात् प्रवर्षणाख्यं ततो द्वितीयं च ।
प्रणालं जलमध्यं नन्द्यावर्तं तथाऽन्यदपि ॥ ११७ ॥

माङ्गल्यमार्थमेतत् विधेयं योग्यमेतद्भवनिष्कुक्षम् ।
मङ्गल्यानां सदनं श्रियामिदं तुष्टिपुष्टिकरम् ॥ ११८ ॥
सच्छिकाचापस्य सचिवे करवाप्यामिव सोऽयं देयम् ।
पञ्चांशेस्सेषाद् द्विगुणा त्रिगुणा वा नासिका कार्या ॥ ११९ ॥

जलनिर्गमहंसहासरचनगर्भमुखा वर्तिका गीतन्या ।
निर्व्यूहकल्पसि तस्यां शुभे मुहूर्ते पट्टं कार्यम् ॥ १२० ॥
सर्वाभिरेव वीथीभिर्युक्तं सहितं पक्षकर्णकुक्षकैश्च ।
सुनिविष्टस्तम्भमालं विततभित्तिं सम्यग्वेधेन ॥ १२१ ॥

स्तम्भोद्गमैर्विविधैः सकम्पैर्युक्तं हिरण्यशाखिकैर्वा ।
रत्नोद्गमैः कदाचित् सुरगणसमुद्भवैरथवा ॥ १२२ ॥
श्रीकण्ठोत्थैरथवा सालङ्कृतमयसहजहरोत्थैः ।
नानास्वरूपैर्विलासरूपैर्यदि वापि षोडशाभिः ॥ १२३ ॥

अथवा चतुरस्रभिन्नविकल्पितविविधैर्विविधरूपैर्वा ।
सुश्लिष्टमणिरत्नपीठैर्मणिभिरपि वा विचित्रितम् ॥ १२४ ॥
प्राक्शीर्षैरतिविधैः शालिकाशीर्षैर्भूषितं विविधैः ।
वेदीभिः परिकलितं कपोतपालीभिरभिरामम् ॥ १२५ ॥

रमणीयतालभञ्जिकाभिर्विविधनर्तनाकुलितमत्तालम्बम् ।
मिथुनैश्च वानराणां कलहप्रभृतिभिरीहामृगैः ॥ १२६ ॥

विद्याधरसिद्धोरगकिन्नरैरप्सरोभिश्च रमणीयम् ।
यक्षवरैः परमग(गु)णैः कीचकविधिनिर्मितैर्नानाविधैः ॥ १२७ ॥

कल्पलताभिर्विविधैर्विचित्रलतापत्रपुष्पसंयुक्तम् ।
पत्रगुल्मतरुलताभिराश्रमभवमनोहारि ॥ १२८ ॥

मकरमुखसहस्रोत्थैः सुश्लिष्टविविधालीकैः कल्प्यो ।
सन्धिप्रदेशविहितं श्रोत्रावयवपरिकल्पितम् ॥ १२९ ॥

सुश्लिष्टसन्धिबन्धे स्तम्भमुखाभित्तिसंश्रिते परितः ।
सम्यक् कृत्वा स्वन्तरविक्षेपणं वज्रलेपाद्यैः ॥ १३० ॥
ताम्रारकूटसदृशम्मैनमिथ्यायोत्थपूर्णसंधिपिनम् ।
अतसीकरञ्जतैलप्रविगाढो वज्रलेपः स्यात् ॥ १३१ ॥
दृढसन्धिबन्धहेतोः स तत्र देयो द्विजः कदाचिद् वा ।
शाखास्कन्धस्तम्भानवसितजालनीलैः प्रलेपश्च ॥ १३२ ॥
उत्कूपयन्त्रकैर्वा सामन्तजलौघाय तत्प्रपिनः कृत्वा ।
पिधायानुपान्युक्तं प्रवर्षयेत्स्तूपनये स्वयमिः ॥ १३३ ॥
कार्याण्यस्मिन् करिणां मिथुनान्यभितोऽम्बुकेलिकृतानि ।
अन्योन्यपुष्करोत्क्षिप्तशीकरव्यपरिषिक्तमयवराणि ॥ १३४ ॥
वर्षोत्कूलं चास्मिन् प्रीतिमति प्रतिमजो वीक्ष्य ।
एकस्मेद्न्हस्तैर्निर्वापमिव मुञ्चन् जलं कार्यः ॥ १३५ ॥
स्तनयोर्मुखेन सृजती जलधारां तत्र कापि कार्या स्त्री ।
आनन्दस्नुतवानिव सलिलकणान् पक्ष्मभिः काचित् ॥ १३६ ॥
नाभिकुहरविवराभिव विनिर्गतां कापि विभ्रती धाराम् ।
काम्यकुलीनसांशुभिरिव योषित् त्रिभङ्गी कार्या ॥ १३७ ॥
एवमपर्याप्तिविधानात् स्वभावचेष्टान् बहूंश्च रमणीयान् ।
स्रोतान् विधाय कुर्यादाश्चर्यं नरपतेः स्थपतिः ॥ १३८ ॥
मध्ये तस्य विधेयं सिंहासनमनलमणिविघटितम् ।
तत्रासीनैर्नरपतिरभिषिक्तः श्रीपतिर्देवः ॥ १३९ ॥
आयात् कदाचिदस्मिन् मङ्गलगीतैर्विमर्दितानन्दः ।
वादित्रवाद्यनिपुणैर्निषेव्यमाणः सुरेन्द्र इव ॥ १४० ॥
य एतस्मिन् गाढतपनतापव्यसनितिकरे
सुखी धारागारे स्फुरसलिलधारे नरपतिः ।

सुखेनास्ते पश्यन् विविधजलशिल्पानि स भवे-
न मर्त्यः किन्त्वेष क्षितिकुलनिवासः सुरपतिः ॥ १५१ ॥

जलदाकुलाब्दयुक्तं पूर्ववदम्बुदं पदं समारचयेत् ।
वर्षद्धारानिकरैः प्रवर्षणाख्यो नयप्रोति ॥ १५२ ॥

प्रतिकूलमस्मिन् कार्या दिक्पालद्वारयायिनः पुरुषाः ।
विविधाः पयः सुरूपाश्चत्वारः सप्त वा सुदृशः ॥ १५३ ॥

यन्त्रेण समोष्ठूप्येन ताम्रसुवर्णेन वा ततः पुरुषान् ।
कृत्वा सम्यङ्नालान्तकर्मोभिः पूरयेद् विमलैः ॥ १५४ ॥

सलिलप्रवेशरन्ध्रप्रपिहितमपि पिधाय तत्र पुरुषाणाम् ।
अङ्गानि वारिमोक्षाय्यपिहितान्यथ मोचयेत् लेपम् ॥ १५५ ॥

सलिलं सप्तकनाले द्वारमतिरोधमोचनैः पुरुषाः ।
मुञ्चन्ति स्वेच्छयमी विविधप्रपातेन चित्रकरम् ॥ १५६ ॥

इत्थमिमाम् वारिधराम् सामस्त्या(स्त्या)न्नु अन्तरेण वा सलिलम्
स्पन्दन्तो वा स्वेच्छं प्रवर्षयन्तिमद्भुतमिदम् ॥ १५७ ॥

इदं नानाकारं कुलभवनमार्थं रतिपते-
र्निवासस्थिवाणामनुकृतिरमेकं जलकृताम् ।
पयःसत्तीर्थ्यं रविकरपरीतापहरणं
न केषामत्यर्थं भवति नयनानन्दजननम् ॥ १५८ ॥

एकेनाथ चतुर्भिः स्तम्भैरष्टाभिरथार्कसङ्ख्यैर्वा ।
षोडशभिर्वा कुर्यान्मनोहरं पद्ममिव क्षितलम् ॥ १५९ ॥

मध्ये पूर्णं चतुर्भिश्चतुरस्रं सर्वभित्तिसंयुक्तम् ।
ईशानोरणयुक्तं छतौत्तं पुष्पकाम्बरम् ॥ १६० ॥

तस्योपरि मध्यगता प्राङ्गणवापी स्फुटा विधातव्या ।
शतपत्रविहितभूषा तन्मध्ये कर्णिका कार्या ॥ १६१ ॥

तत्कोणेषु चतुर्ष्वपि रमणीया दारुदारिकाः कार्याः ।
मध्याम्बुजमिलितकराः सालङ्काराः समङ्काराः ॥ १५२ ॥

पूर्वोक्तयन्त्रयोगात् पद्मासीने चतुर्ष्वदारिपर्णी ।
शृङ्गारमलयारिभिरङ्गणवापीं सिञ्चन्ति ततः ॥ १५३ ॥

नाभिमिति कृत्वा वापीं तत्सलिले तदनुपद्मगर्भगताम् ।
छायास्तु गन्धरोत्क्षेपणि रोहन्ति सर्वतो नियतम् ॥ १५४ ॥

मुखपट्टसमुत्कीर्णै रूपैर्विविधैर्मनोहरै रचितैः ।
भङ्गीर्वारि विमुञ्चन्ति मासरन्ध्रकमल नैकार्थैः ॥ १५५ ॥

प्रणालार्क्षं धारामण्डलमिव मत्स्यदृक्सुलनवं
  निर्यान्ति यत्र गत्ख क्षितिनिपतितिलक्ष्नवदर्पस्थमि ।
क्रोडेन्येतद् वेश्म स्रपतिरपि कुब्जा चतुरपा
  प्रमाण्यैनी ह्रासन्यविक्रमदृणीची कुलविपाम् ॥ १५६ ॥

चतुरश्रालिन्दगम्भीरा वापी कार्या मनोरमा सुदृढा ।
गर्भगतं पुष्पमस्याः कर्तव्यं लिखसन्निभ ततः ॥ १५७ ॥

विहितप्रवेशनिर्गति सुरङ्गपार्श्वे विधेनिगलद्वारम् ।
विरचीत चाष्ठल्पैः प्रयवैर्व्योमसमुपरिस्फुरत् ॥ १५८ ॥

विकासप्रकोष्ठितवर्त्मना मनोऽङ्गल्लत्तं च विरेकेण ।
तस्य विधेयं मध्यं सलिलाविर्भावसङ्गुरसम् ॥ १५९ ॥

ऊर्ध्वविनिर्गमितपञ्चनलिकास्थलदृतस्वरोऽद्भुतैः ।
सचित्रकर्णिकाकमलकिञ्जल्ककारमिर्मिलोत्पन्नम् ॥ १६० ॥

आपूरयेत् तलोऽम्बु च धाराम्बुभिरमलकमलपर्यन्तम् ।
विविधाम्बुनैव सम्यक् प्रविधाय मनोरमं भवनम् ॥ १६१ ॥

नानारूपकपुष्पपाठ(त्व)परिपिनमकलोरम्भुरम् ।
पातालमिराप्ततमित्र्यनलद्युणपि विद्धं कुलशोभम् ॥ १६२ ॥

कृत्रिमतालतमालकदलीपङ्क्तिभिरपि चाम्बुजकम्बैर्युक्ताम् ।
कुर्याद्रम्भोद्यानीं वापीमाहार्ययोगेन ॥ १६३ ॥

सामन्तसुभगसुभगा राजद्वाराक्ष्यसंश्रयात्तत्र ।
परराष्ट्रागतवृत्तान्तसेवुर्गि किमपिह निभृताः ॥ १६४ ॥

अथ स यथाविधि सलिलक्रीडां पूर्वोक्तमार्गरूपाणाम् ।
दृष्ट्वा मुदितः कुर्यात् पर्यङ्कारोहणं क्षपतिः ॥ १६५ ॥

तत्र स्थितस्य नृपतेः परिवारितस्य
धाराङ्गनाभिरभितो जलमध्यभाजि ।
पातालसद्मनि यथा भुजगेश्वरस्य
निस्सीमसम्भृतरतिर्भवति प्रमोदः ॥ १६६ ॥

पूर्वोक्तवापिकायां मध्ये स्तम्भैश्चतुर्भिरुपरचितम् ।
मुक्ताप्रवालपूर्णं पुष्पकमथ कारयेद्धृष्टमम् ॥ १६७ ॥

वाप्यां पयोभिः पुष्पकमापूर्णं सुमिर्गताभिरथ सुतरम् ।
गर्भस्थलिकाभित्तिभिरुपरिहितधोभं समन्ततः कुर्यात् ॥ १६८ ॥

पूर्वोक्तवारियोगात् पूर्णाम्भःकर्णितो विधायैताम् ।
जलकान्तिषु सोत्कण्ठो महीपतिः पुष्पकं यायात् ॥ १६९ ॥

कुर्वीत नर्मसचिवैर्विलासिनीभिश्च सार्धमवनिपतिः ।
तद्विस्पन्दनतरणीं निमज्जनोन्मज्जनैः क्रीडाम् ॥ १७० ॥

एकत्र परिरभ्य बहिरन्यत्र कृत्वा सलिलेन नद्धः ।
क्रीडत्सलं केलिचरैः सहायैरप्यः सुखं मज्जनपुष्करिण्याम् ॥ १७१ ॥

वापीतलस्थितमथ व्यपयातनग्न-
माच्छादितस्तनभरं करपल्लवेन ।
गाढाबद्धसक्तवसनं जलतोयसुप्ता-
लोकने प्रणयिनीजनमत्र धन्यः ॥ १७२ ॥

रथदोलादिविधाने दारुकर्मापि चक्ष्महे वयं सम्यक् ।
यन्त्रभ्रमणककर्म प्रकीर्तितं पञ्चमं यत् तत् ॥ १७३ ॥
तत्र वसन्तः प्रथमो मदनविलासो वसन्ततिलकश्च ।
विभ्रमकस्त्रिपुरकः पञ्चैते दोलकाः कथिताः ॥ १७४ ॥
तिलकेचुलुरः स्तम्भान् समैकस्त्रोणान् कदलान् सुवृत्तान् ।
सदृशान्तरान् धरित्रीखातान् सुश्लिष्ट(ष्ट)पीठगतान् ॥ १७५ ॥
प्रासादस्योत्कृष्टि प्रविधाय च विरचिताङ्घ्रवरदैर्घ्यम् ।
सुश्लिष्टं रमणीयं तदथो विहितगाम्भीर्यम् ॥ १७६ ॥
तदूर्ध्वतले स्तम्भो लोहमयाधारसंस्थितः कार्यः ।
समसंहितः पीठयुतो मसृणश्चामलकतुलाभिः ॥ १७७ ॥
संस्थाप्योपरि पीठस्य कुम्भिकामलिकां विमलां च ।
चतुरपिच्छैस्तलोऽम्बुसदृशिराभिर्वेष्टयेत् सद्भिः ॥ १७८ ॥
स्तोकसमथ भूमिकोच्छ्रयमस्योर्ध्वं कल्पयेत्तिलाम्बुकुम्भम् ।
निवसेन वेष्टनोर्ध्वं चतुरं स्तम्भशीर्षं च ॥ १७९ ॥
हीरमह(णा?)पर्यन्तं मचला गजशीर्षिका विशालाख्या ।
सुदृढा प्रयत्नरचिता मनोभिरामा प्रपाशोभम् ॥ १८० ॥
तस्योपरि कार्या चतुष्किका हेमभास्वतोऽभीष्टम् ।
तस्यामुपरि विधेयस्तलशालो दृढतरन्यासः ॥ १८१ ॥
स्तम्भैर्द्वादशभिरथ हैमैः युक्ता समुच्छ्रितैर्भव्यैः ।
रत्नकलीकोणस्थितिरचिता भूः प्रथमिका कार्या ॥ १८२ ॥
मध्ये भ्रमका तस्याः गर्भस्तम्भप्रतिष्ठितः कार्यः ।
हेमप्रमाणदण्डसहितां पश्चात्कल्पयेत् पट्टैः ॥ १८३ ॥
रथिकाशिखायामेषु च कलशाम(च)रणस्य मृदुपरिष्टात् ।
भ्रमचक्राणि न्यस्येन्मध्ये स्तम्भे च पञ्चैव ॥ १८४ ॥

अत उपरि पञ्चमांशोर्ध्वे द्वि भूमिका पुष्पकाकृतिः कार्या ।
मध्यस्तम्भाधारा कुम्भकलशविभूषणा शिरसि ॥ १८५ ॥
स्तम्भेऽश( ष )न्तराद् भाति ते कूटं चतुरस्त्र्यर्धभूमिका तत्र ।
रथिकाभ्रमरकयुक्ता पदपदं चारुघण्टेषा ॥ १८६ ॥
चतुरस्ररथिकाङ्गी समसिंहकर्णाढ्या-
परिभ्रमकस्तम्भयुगाभ्यधिकविलासं भूपतिः ।
करोति मध्यमेरुसद्रि( वं वि )मानानि यत्कीर्तिं
कल्पान्तसमये भवत्यचलकीर्तिरिभाति सः ॥ १८७ ॥
आरोप्य स्थिरमेवं स्तम्भं भूमीपृष्ठादिरहितमथ ।
हस्तचतुष्कोच्छ्राया कार्योपरि भूमिका चास्य ॥ १८८ ॥
मध्ये भ्रमरकयुक्तं दीर्घं पूर्ववद्विधानैरुपलिप्तम् ।
पुष्पकमपि च स्तम्भे शिथिलं कलशोपरिकृतं कुर्यात् ॥ १८९ ॥
तस्योपरि च पीठा चतुरस्रसमसंयुता विधातव्या ।
मध्ये स्तम्भवती कार्या स्तम्भेन सहायती तत्र ॥ १९० ॥
एवं पुष्पकभूमिकान्तरलब्धावधी विमुक्तो क्रमो
यावद् धामकृतपञ्चचक्रशिखरं सकलं कनकाभासयेत् ।
तावत् ता रथिकासमा पञ्चदशस्तम्भ स्थिताः पुष्पके
कलशावसकूलपुष्पार्पितं दत्तो भ्राम्यन्ति सर्वा अपि ॥ १९१ ॥
अथ कोणगतान् स्तम्भान् पुरो विनिवेशयेत् ऋजुन् सुदृढान् ।
सुश्लिष्टपीठसंस्थान् समान्तरान् मैत्रिमीलिताः ॥ १९२ ॥
तेषामुपरि स्तम्भ( स्ता )न्तरसंयुक्ता भूमिका विधातव्या ।
रथिकास्तम्भ पञ्चमो भ्रामयन्ते पूर्ववद् विस्तृताः ॥ १९३ ॥
तदुपरि तथार्धभूमिः कार्या सुश्लिष्टपाट्टसन्धाना ।
मध्यभ्रमरकयुक्ता सकलपक्षा सततारम्भापुण्या च ॥ १९४ ॥

[1]नानाविधव्यालवती चलन्नतो वातायनैर्वा व्ययम् ।
अन्योन्यसन्नद्धपरिस्फुरत्वोल्यमाल-
विद्रुमोज्ज्वलरचिताग्रमत्तवारणम् ।
दृष्ट्वा वसन्ततिलकं सुरमन्दिरस्थं
मुग्धाङ्गनाजनमुपयाति न विस्मयत्वं( यं कः ) ॥ १९५ ॥

प्रविभाज्य रङ्गभूमिं प्रथमां त्वाष्टान्तरान्तरस्थाने ।
चतुरस्रा रूपवती सचतुर्भद्रा विधेया भूः ॥ १९६ ॥

प्रतिकोणमागम( गा )त्स्या भद्रेषु भवन्ति संयता भ्रमराः ।
अन उपरिष्टाद् भूत्वा भ्रमरालाद्भासमाः कार्याः ॥ १९७ ॥

रेखाः शुद्धाः कार्या बहिरन्तर्भित्तिभागमान्यतः ।
पीठेषु मध्यग( सं )स्थास्ततोऽपरा भूमिकाः कार्याः ॥ १९८ ॥

पीठस्य मध्यसंस्थैरन्योन्याधारालियोभिर्मिमकैः ।
सर्वे भेदाद् भवन्ति सान्तरा( रा ) विभागे भ्रमराः ॥ १९९ ॥

दोलासनो विहितसारमधुरू( रु )णानि-
विशेषण पश्चिमदलासमतु विभागेण ।
पूर्णावलिस्फुरदुपैति समुन्नसन्ती
कीर्तिर्न भाति भुवनत्रितयेऽपि नक्य ॥ २०० ॥

चतुरश्रमथ क्षेत्रं कृत्वाष्टौ भाजितं ततोऽष्टभिः ।
कर्णैः कोष्ठैस्त्रिभिश्चतुरस्रं कल्पयेत् मध्यम् ॥ २०१ ॥

तद्विगुणमपूर्णमिलस्य भूमिकस्थानानां सन्निवेशतया कार्यम् ।
तत्र च मध्यमचतुष्केण भूमिका स्यात् समुच्छ्रयतः ॥ २०२ ॥

तथा भद्रचतुर्भागवर्तिना भूमिका उपर्युपरि ।
कर्णौ भवन्त्येवं नाः स्युर्निर्गमाः प्रमाणेन संयुक्ताः ॥ २०३ ॥

डोलाकोऽष्टकयुक्ता पश्चात् चतुरश्रकल्पना कार्या ।
मिथस्तु भूम्यौ कार्ये समवृत्तचतुर्भागविस्तारे ॥ २०४ ॥

रङ्गः स्यादाद्यभुवि द्वितीयभुवि कोणगतास्तथा रथिकाः ।
स्युर्मध्य(?)वृत्तियुक्ता दोला अपि तत्र रमणीयाः ॥ २०५ ॥

रथिकास्तृतीयभूमौ कार्या भद्रेषु चातिरमणीयाः ।
कोणेष्वधासमान्यर्धांशास्तु केऽपि क्रमः कार्यः ॥ २०६ ॥

दोलारथिके चतुरस्रे क्रमोऽष्टांशतो भवेत् तथा ।
आसनमिह तत् कथितं सुधीभिः स्थानं पर्यङ्कं स्यात् ॥ २०७ ॥

निखिलान्यपि क्रमकसंयुक्तं नानि विकसि तमस्तम् ।
पञ्चाशत्कानि स इह नाम ह्रस्वकोऽपराचिका ॥ २०८ ॥

पञ्चकर्मसमस्तात् चमस्य चरं (नि)र्योजयेदेकम् ।
लघुचक्राणि च लघुनियोजयेदासनेष्वत्र ॥ २०९ ॥

लघुचकारकद्वये संलग्नाः कीलका दृढाः कार्याः ।
तुल्यान्तराः समन्ताः मलघु(क)चक्रात् कृतान्तराः ॥ २१० ॥

रथिकाशिलाचनकं चमचकारक(पि ?)नियोजितं कार्यम् ।
परिचतुष्कयमस्मिन्निर्वर्तं चक्रद्वयोपेतम् ॥ २११ ॥

ऊर्ध्वं द्वितीयभूमेस्तृतीयभूमेरधान्तरे कुर्यात् ।
निमनं रथिकापंक्तिक्रमसंक्रमाणि यन्त्राणि ॥ २१२ ॥

आसनाधारयष्टीनां रथिकाचक्रयोजिताम् ।
अधः समान्तरान् कुर्याच्चतुरः परिवर्तकान् ॥ २१३ ॥

त(द्व)त् द्वितीयभूमौ दोलागर्भे समान्तरे यष्टी ।
लग्ने तथैकपार्श्वे पाश्चात्यरथकयोर्न्यस्येत् ॥ २१४ ॥

तद्वच्चो भूमौ कोणरथिकायामयचक्रसंलग्नाः ।
यष्टीरानतमानयो द्विचक्रका इतरचक्रयोर्न्यस्येत् ॥ २१५ ॥

प्राग्भागवद्भूवे कोष्ठोपरिविशालककपोतिका ।
कोष्ठमार्गेणाता यदिहितिर्ष्यंकृ कार्याथिवाम्बरा ॥ २१६ ॥

पूर्वे भद्रे द्वारं कुर्यात् सोपानराजिसमन्वितम् ।
गर्भात् पश्चिमभागे निवेशयेद् देवनाथोलाम् ॥ २१७ ॥

अन्योन्यं चककसमविन्यासस्तुर्यकं विधानतः सम्यक् ।
ज्ञात्वा प्रयोजनीयं चीन्यदं मन्दवाहनं वा ॥ २१८ ॥

एष समासेन यथा जनमार्गैः कीर्तितः स्फुटोऽस्माभिः ।
अन्येष्वपि कर्तव्यः सम्यग् जनहेतवे नहुल् ॥ २१९ ॥

सकमादिद्रव्याणां विन्यासैः कल्पितं दृढैः श्लक्ष्णैः ।
सुश्लिष्टसन्धिबन्धं वृत्तं तथा दीर्घसुरूपवरैः ॥ २२० ॥

पीठादिभिरथ तिलकैः समन्ततः सिंहकर्णसंयुक्तम् ।
त्रिपुरं सम्यक् कुर्याद् विचित्ररूपं (च)कीलिकैः ॥ २२१ ॥

सुरूपया कल्पैः पूर्वमभीक्ष्य पुरुकं यन्त्राध्यायं वेत्ति यः सकपोलम् ।
प्राप्नोत्यर्थान् धान्यिकान् कीर्तियुक्तान् स इमापालैरन्वहं पूज्यते च ॥

एतद् द्वादशाङ्ककमलितं क्ष्मापालचूडामणे-
र्यः सकमप्रतिबद्धवृत्ति चरितो यस्येच्छया ज्ञायते ।
स श्रीमान् भुवनैकराममदसितैर्वो व्ययतां द्रुतं
यन्त्राध्यायमिमं जघुद्धिरधिकैर्यन्त्रप्रपञ्चैः सह ॥ २२२ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
यन्त्रविधानं नामैकत्रिंशोऽध्यायः ॥

## अथ गजशाला नाम द्वात्रिंशोऽध्यायः ।

लक्षणं गजशालानामिदानीमभिदध्महे ।
चतुरश्रीकृते क्षेत्रे भागैर्भक्ते ततोऽष्टभिः ॥ १ ॥

मध्ये द्विगुणविस्तारं स्थानं कुर्वीत हस्तिनः ।
तस्याः प्रासादवद् भागा ज्येष्ठमध्यकनीयसः क्रमात् ॥ २ ॥

गजद्विभागिकोऽलिन्दो भद्रिकस्यापि भागतः ।
भागेनैकेन भित्तिः स्याद् द्वितीयालिन्दकाद् बहिः ॥ ३ ॥

तस्या द्वारप्रदेशे तु कर्तव्यौ कुम्भरज्जुकौ ।
कर्णप्रासादिका कार्या द्वितीयालिन्दसंमिता ॥ ४ ॥

द्वे द्वे वलापके कुर्याद् भित्तौ दिक्षु विदिक्ष्वपि ।
¹प्राग्ग्रीवोऽस्मै सर्वेन्द्राख्या सुभद्रेप्सुवाहना ॥ ५ ॥

अस्या एव यदा पश्चात्प्राग्ग्रीवौ भवतो मुखे ।
नन्दिनी नामतः शाला तदा स्याद् गजवृद्धये ॥ ६ ॥

अस्या एव यदा स्यातां प्राग्ग्रीवौ पार्श्वयोर्द्वयोः
तदा सुभोगदा नाम तृतीया परिकीर्तिता ॥ ७ ॥

अस्या एव यदा पृष्ठे प्राग्ग्रीवः स्यात्ततोऽपरः ।
²भद्रिका नाम शाला स्यात् तदा द्विरदपुष्टिदा ॥ ८ ॥

पञ्चमी चतुरश्रा स्याद् वर्धनी नाम पूजिता ।
प्राग्ग्रीवालिन्दनिर्मुक्ता षष्ठी तत्रापरा ॥ ९ ॥

शाला प्रधानिका धान्यधनजीवितहारिणी ।
तदेतां वर्जयेत् कुर्यादन्याः सर्वार्थसिद्धये ॥ १० ॥

प्रमाणितेति यदिवेह शाला सा प्राणसंस्थद्विपनाशिनी स्यात् ।
कुर्यादतस्तां न यथोदितास्तु कार्याः परा जीवितवित्तवृद्ध्यै ॥ ११ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
गजशाला नाम द्वात्रिंशोऽध्यायः ।

# अथाश्वशाला नाम त्रयस्त्रिंशोऽध्यायः ।

अथ लक्ष्माश्वशालायाः प्रोच्यते विस्तरादिह ।
अवेक्ष्य वास्तोः कर्तव्ये एते गन्धर्वसंज्ञके ॥ १ ॥
अथवा पुष्पदन्ताख्ये स्थानं वासाय वाजिनाम् ।
अरत्निशतमानं पञ्चषष्टं तत् परिकीर्तितम् ॥ २ ॥
अशीत्यरत्निकं मध्यं चत्वारत्न्यधमं भवेत् ।
स्थलप्रदेशे विपुले शुभे रम्ये शुची तथा ॥ ३ ॥
समे च चतुरस्रे च स्थिते( १ ) मधुरप्लवे च ।
स्थानं हयानां कर्तव्यं प्रदेशे सुपरिष्कृते ॥ ४ ॥
शिलागुल्मद्रुमस्थाणुचैत्यायतनवेश्मभिः ।
वल्मीकश्वभ्रकान्तारैश्च वर्जिते तत् समाचरेत् ॥ ५ ॥
निःशब्दे चाल्पवृक्षे च प्रागुदक्प्रवणे तथा ।
प्रदेशे तद् विधातव्यमालोच्य सुसमाहितैः ॥ ६ ॥
ब्राह्मणानुमते शास्त्रे दिने स्थपतिभिः सह ।
शुभेऽह्नि भागमालोक्य तु स्थपतीनानयेत् शुभान् ॥ ७ ॥
न जाता ये श्मशानेषु देवतायतनेषु वा ।
अन्येष्वपि निषिद्धेषु जातान् वृक्षान् विवर्जयेत् ॥ ८ ॥
वृक्षान् प्रशस्तानानीय समीपे भूर्जवेश्मनः ।
ततो भूमिं परीक्षेत प्रशस्तामथ निश्चिताम् ॥ ९ ॥
शिलाश्मवल्मीकश्मशानपल्वलकेषु च ।
विहारेषु च कर्तव्यमश्वानां न निवेशनम् ॥ १० ॥
जयन्ति स्वामिनः पीडां ग्रामधान्यफलकेषु च ।
दुष्काले वेश्मकरणमश्वानां मृत्युमादिशेत् ॥ ११ ॥

स्थाने छिद्रादिवल्मीकविच्छिन्नं स्यादनर्थकम् ।
मतिल्पसन्तापकरं छायवृक्षं तपस्विनाम् ॥ १२ ॥
वैद्योपयानकक्षं स्त्रीणां च क्षयकारकम् ।
विच्छिन्नं पादपैर्वल्मीकैर्युक्तं स्याद् भूतभीतिदम् ॥ १३ ॥
भवेद् रोगकरं भर्तुर्विच्छिन्नं कण्टकिद्रुमैः ।
दीर्णायामुन्नतायां च कूलं भूमेः भयावहम् ॥ १४ ॥
नतायां शुभफलकरं कूलं भवति मन्दिरम् ।
तस्मात् कार्यं प्रयानतायां भूमौ तद् वाजिवृद्धये ॥ १५ ॥
मङ्गल्यरम्यवीथ्ये च चतुरस्रे समोत्तुङ्गे ।
शुभे च विच्छिन्नं सदा भवेत् कल्याणकारकम् ॥ १६ ॥
निर्गच्छतो यथा वामे पार्श्वे भर्तुस्तुरङ्गमाः ।
भवन्ति कुर्यात् स्थपतिस्तथा वाजिनिवेशनम् ॥ १७ ॥
अन्तःपुरप्रवेशस्य कार्यं दक्षिणतश्च तत् ।
प्रवेशो दक्षिणं तेषां हेषितं जायते यथा ॥ १८ ॥
तथा भर्तुर्हितार्थाय कर्तव्यं सद्म वाजिनाम् ।
प्रागुदग् वा मुखं तस्य विधातव्यं सतोरणम् ॥ १९ ॥
मार्गवीथीकेन संयुक्तं चतुःशालमसङ्कटम् ।
द्वारराजिसमुद्रायमहारत्निविस्तृतम् ॥ २० ॥
मण्डलकर्मसंयोगेऽपि पुरः कुड्यार्धसंयुतम् ।
पृष्ठे समस्तकुड्यं वा तत्र स्थानानि कल्पयेत् ॥ २१ ॥
तानि तु प्राङ्मुखानि स्युस्तथैवोदङ्मुखानि च ।
आयामे किष्कुमात्राणि त्रिकिष्कूणि च विस्तरात् ॥ २२ ॥
प्रोच्छ्रायोर्ध्वमानानि चतुरस्राणि कारयेत् ।
अयोग्यां सुखसञ्चारां तेषु भूमिं प्रकल्पयेत् ॥ २३ ॥

स्थानं तुरङ्गस्य मध्ये तु हस्तमात्रं समन्ततः ।
आस्तीर्णं च समश्लक्ष्णनीरन्ध्रैः फलकैर्दृढैः ॥ २४ ॥

शालकाष्ठार्जुनपुन्नागकुङ्कुमादिविनिर्मितैः ।
अष्टाङ्गुलसमुच्छ्रायैरन्यथावारितविस्तृतैः ॥ २५ ॥

अश्विवृद्धैः संकुलैर्वैरपरा पार्श्वयोर्द्वयोः ।
अजान्वङ्गुलैः काष्ठैः रुम्भकारि स्थिरमुन्नतैः ॥ २६ ॥

पश्चिमस्य भवेत् स्थानं निर्मितैः स्थालनं शुभैः ।
किञ्चित्प्रत्योचितं तत् स्यादेकान्ते सुसमाहितम् ॥ २७ ॥

दृढद्वारमार्गं च कुर्यात् वातायनकोष्ठकम् ।
सुपरिस्रवसुगन्धि च विस्तारोच्छ्राययोः समम् ॥ २८ ॥

स्थाने स्थाने च यः कीलाः सुदृढाः कपिशीर्षकाः ।
पश्चादीनिवद्धार्थं तौ पुनः कल्पयेद्भुवी ॥ २९ ॥

पश्चात् चन्द्रार्कमेकं च सुशुभं परिकल्पयेत् ।
चतुर्दिक्स्थापनं स्थलस्था शालाकोणचतुष्टयम् ॥ ३० ॥

स्थानेष्वेतेषु तुरगान् सर्वेष्वपि निवेशयेत् ।
तत्र कुर्याद् बलिं होमं स्वस्तिवाचनकं जपम् ॥ ३१ ॥

ग्रीष्मे कार्यं सुसंवृतं सिक्तं तत्र महीतलम् ।
वर्षास्वनन्तरमुष्णं च शिशिरे संवृतं शुभम् ॥ ३२ ॥

शिक्षेपुस्तत्र तुरगा नातिसङ्कीर्णसङ्गिनः ।
वस्त्रकाम्नो भिषः कार्याः सर्वाबाधविवर्जिताः ॥ ३३ ॥

स्थानं दक्षिणपूर्वस्यां दिशि वह्नेः प्रकल्पयेत् ।
निवस्त्रपादुकाकुम्भं च किञ्चिद्भिर्गृहीसमाश्रितम् ॥ ३४ ॥

माहेन्द्र्यां दिशि प्रकर्तव्यं स्थानकं धनदस्य च ।
वायव्यां तु प्रकर्तव्यं स्थानमौदूखलं दिशि ॥ ३५ ॥
निःश्रेणयः कुशाः कुम्भाः कार्पासं कलशादयः ।
कुद्दालोद्दालमुसलाः शूर्पयोगाः कुटस्तथा ॥ ३६ ॥
कणग्रहण्यः मूर्द्धं च तथा परशवोऽपि च ।
भाण्डाः      प्रदीपाश्च भवन्त्यागारोपयोगिनः ॥ ३७ ॥
सङ्ग्रहः शुल्कसंभारवस्तूनां नैर्ऋते भवेत् ।
अन्नपूपप्रकारार्थं चान्यच्छेदोपयोगिनः ॥ ३८ ॥
पयार्थान् सन्निधौ कुर्याज्जलस्थानविकल्पनम् बुधः ।
भाण्डानि कुर्याच्च पृथग् अन्त्रा( सो )मनयनैकधा ॥ ३९ ॥
कृतशाली निर्ल्नं दीपं पर्वी कालमुपासते ।
पिटकानि विचित्राणि वस्तीन् नानाविधानपि ॥ ४० ॥
दर्पणविधानि चान्यानि संविदध्यात् प्रयत्नतः ।
तुरःशालाश्रिते भाण्डं सजाहादैर्निधीयते ॥ ४१ ॥
प्राङ्मुखे तुरगं गेहे वारुण्यां स्थापयेद् दिशि ।
पूर्वामुखे पदे चापि मित्रस्य वरुणस्य च ॥ ४२ ॥
भवन्ति तेन बहवः पुष्टिं च प्राप्नुवन्ति ते ।
सा हि दिक् पूजनीया च स्तोत्रव्या च प्रकीर्तिता ॥ ४३ ॥
होमशान्तिककार्येषु पश्च्यां याश्च पराः क्रियाः ।
तासु प्रशस्यते पूर्वा चाश्वेभ्योविहिता स्वयम् ॥ ४४ ॥
तस्यास्तुवेति दिक्कूपमनुलोमं ततः शुभः ।
अन्यायां पूजनो याति स पनीयोमनुक्रमात् ॥ ४५ ॥
नानाविधासने पूजा माङ्गल्यानि   पराण्यपि च ।
माङ्गल्यानां तुरङ्गाणां कर्त्तव्यानि शुभार्थिभिः ॥ ४६ ॥

एवं कृते सुभिक्षमित्याहुर्बकालेऽपि च ।
वृद्धिर्भवति सूत्रस्य तस्मात् प्राची प्रशस्यते ॥ ४७ ॥
भर्तुर्वृद्धिमयं स्यात्पश्चाद्वारस्य तद् भवेत् ।
दक्षिणाभिमुखायां तु शालायां पश्चिमार्धकम् ॥ ४८ ॥
स्थानं भवति बाह्यानां पदे मल्लाटे भिषाद्ययोः ।
वह्निमाध्यस्थिता सा हि प्रात्मा वह्निज पातिमाम् ॥ ४९ ॥
सद्वारे बहुभोक्ता च तथा चक्रो नमेद्वयः ।
उदङ्मुखेऽपि भवने प्राप्नुवन्ति धूर्तं धनाः ॥ ५० ॥
तथाविधनाशानन्यानां दक्षिणेन दिवाकरः ।
उदेत्यनन्तरं याति तस्य विनाय प्रदक्षिणम् ॥ ५१ ॥
यथानि वामतोऽर्थं च( भार्या ) स्थाप्यास्तेनोत्तरामुखाः ।
चन्द्रार्कौ प्रतिकूलौ( द्वेष )स्तो तथा वर्तेन वाजिनः ॥ ५२ ॥
कुपतिश्च अर्थं सिद्धिं शुभाशुभं विन्दति ।
भरोगाश्च भवन्त्यस्या वर्धयन्ति च सन्ततिम् ॥ ५३ ॥
दक्षिणाभिमुखात् कुर्यात् सत्याशात् न चाक्षणात् ।
पितृकार्यं यतोऽन्यत्र दक्षिणा वर्जितेव दिक् ॥ ५४ ॥
अस्यामेव दिशि प्रेता यतः सर्वे प्रतिष्ठिताः ।
उदेति वामतो याति यान्ती दक्षिणतो रविः ॥ ५५ ॥
सोमश्च कुरु भवति तैवाप्या दैवतीक्षितः ।
श्रीर्हिङ्कारैर्विविधैः पीडयन्तेऽनातिविहृताः ॥ ५६ ॥
भयेन व्याधिभिश्चान्तं सद्यो गेच्छन्ति चाधिपम् ।
पराजयमतुष्टिं च स्वामिनोऽनर्थसङ्गतिम् ॥ ५७ ॥
कुर्वन्त्यतो न कर्तव्यात् कदाचित् दक्षिणामुखाम् ।
पश्चिमाभिमुखानां च गृहाणां कारिणां तथा ॥ ५८ ॥

अटन्ति रुदन्तो वाजिः पुरतोऽस्तं प्रयान्ति च ।
न भवेद् विजयस्तेन भर्तुस्तत्र कर्मणि ॥ ४९ ॥
पार्श्वस्य हुतवर्तिन्यात् प्रातिलोम्याय भास्वतः ।
कुर्वन्ति व्याघ्रकस्तेषां नूनं देहविनाशनाः ॥ ५० ॥
निद्रां त्यजन्ति वेपन्ते भक्ष्यं कासं प्रयान्ति च ।
यवसं नाभिनन्दन्ति अश्वाः शुष्यन्ति सर्वथा ॥ ५१ ॥
शिरोऽभिघुननमात्रेण कम्पन्ते यदि वाजिनः ।
कम्पयन्ते रक्तपित्तोत्थिता रोगैर्भवेत्तथा ॥ ५२ ॥
जायन्ते स्वापिनो वन्यवत्कुष्ठोपद्रवादिनः ।
वाजिनां च भवेत् तत्र वह्निदाहकृतं भयम् ॥ ५३ ॥
भर्तुः पराजयो नित्यः स्याच्च देहस्य संक्षयः ।
नैर्ऋत्याः ककुभो वाहा कम्पन्ते संमुखं यदि ॥ ५४ ॥
तदा न तेऽभिनन्दन्ति यवसं पानभोजने ।
यथा यथा क्षितिं पादैर्घट्टयन्ति पुनः पुनः ॥ ५५ ॥
हेषन्ते नीरस्य पङ्कजो मनुष्याणां पक्षिणः यद्वत् ।
भ्रमयन्ति च गात्राणि नैर्ऋत्यां वाजिनः स्थिताः ॥ ५६ ॥
तथा नदीनां कुपिता भावो कुर्वन्ति राक्षसाः ।
कम्पन्ते यदि वाजानाद् वायव्याभिमुखं हयाः ॥ ५७ ॥
तदा ते वातिकै रोगैः पीड्यन्ते सन्निपातजम् ।
भयः कायो भवेद् भर्तुः क्रेशतामश्वोपलीभिमात् ॥ ५८ ॥
नराणां च भवेन्मृत्युर्दुर्भिक्षमथवा भयम् ।
ऐशान्याभिमुखं यद्वत् कम्पयन्ति तुरङ्गमाः ॥ ५९ ॥
सूर्योदयस्याभिमुखी यद्वानां चैवमादिशेत् ।
विचरयन्ते यदा वाहा प्राच्यां दिग्भागुपाश्रिताः ॥ ६० ॥

कल्पन्ते ते यदीर्योक्तैर्योगैर्निर्मिता विचित्रिताः ।
कल्पवृक्षफलिकापालस्य भर्तुर्न विजयावहाः ॥ ७१ ॥

शिलाताम्रकुशनापाय जायन्ते नाम वाजिनः ।
चतुर्वेशां च शालायां स्थानमश्वस्य नेष्यते ॥ ७२ ॥

स्वामिनस्तत्क्षीणाय स्वास्थ्याय च वाजिनाम् ।
स्थाने पक्षस्ते कुम्भाल सर्वथा वासयेत्ततः ॥ ७३ ॥

न च वार्याः क्षणमपि रोगिभ्यः कल्यवाजिनः ।
कल्यानामपि रोगाः स्युर्यतो रोगिसमाश्रयात् ॥ ७४ ॥

इष्टागारस्य पूर्वेण कार्यं भेषजमन्दिरम् ।
तस्यैव वामतः सर्वसंभारान् परिकल्पयेत् ॥ ७५ ॥

वाजिनां भेषजार्थाय भाण्डानि च विनिक्षिपेत् ।
अगदानौषधीः स्नेहान् कर्णिकाः लवणानि च ॥ ७६ ॥

भेषजागारसंनिधौ कुर्याद्वाडिकमन्दिरम् ।
भवनं व्याधितानां च कार्यं वासाय वाजिनाम् ॥ ७७ ॥

कुक्कुरं तत्र कर्तव्यं पूर्वनिर्दिष्टवेदिमत् ।
संचरं च विधातव्यमेतत् वेश्मचतुष्टयम् ॥ ७८ ॥

सुधाचन्दनवर्णैः कुड्यैः सप्राग्ग्रीवोत्तोरणम् ।
चन्द्रार्येऽपि चित्रजालानि सुगन्धानि च कारयेत्

वेश्मस्यैर्विविधैर्द्रव्यैः स्थापितान् परिपालयेत् ॥ ७९ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
अश्वशाला नाम त्रयस्त्रिंशोऽध्यायः ॥

## अथाप्रयोज्यप्रयोज्यं नाम चतुस्त्रिंशोऽध्यायः ।

राज्ञां सेनापतीनां च वणिजामपि वेश्मसु ।
यदि वा वास्तुकक्षासु सभादेवकुलेषु च ॥ १ ॥

तापसाश्रमयानेषु आरामायतनेषु च ।
कक्ष्याध्वजपताकासु सर्वोपकरणेषु च ॥ २ ॥

अप्रयोज्यानि यानि स्युः प्रयोक्तव्यानि यानि च ।
विस्तरात् तानि कथ्यन्ते हितार्थमिह देहिनाम् ॥ ३ ॥

पूर्वोक्तानां नृपादीनां यानि वेश्मसु केवलम् ।
अप्रयोज्यानि तान्येव पूर्वमत्राभिदध्महे ॥ ४ ॥

तेषु नैव प्रयोक्तव्या स्वरूपता अपि देवताः ।
दैत्या ग्रहास्तथा तारा यक्षगन्धर्वराक्षसाः ॥ ५ ॥

पिशाचाः पितरः प्रेताः सिद्धविद्याधरोरगाः ।
चारणा गुह्यकाश्च तेषां योधाः सुरास्तथा ॥ ६ ॥

प्रतीहाराः प्रतीहार्यस्तेषामपि कृताश्च ये ।
आयुधानि महीयानि सर्वे चाप्सरसां गणाः ॥ ७ ॥

दीक्षितव्रतिचान्द्रिकमासिकाः क्षुत्प्रपीडिताः ।
व्याधितच्छिन्ननासाक्षिकीलोत्कृत्तकर्णाङ्गुलिभिः ॥ ८ ॥

शूलकण्टकविभिन्नाङ्गा येऽन्येऽप्येवंविधा नराः ।
मत्तोन्मत्तजडक्लीबपङ्ग्वन्धबधिरादयः ॥ ९ ॥

पौराणिकाश्च नेष्यन्ते युद्धानि च पतितानाम् ।
देवासुराद्याः सङ्ग्रामा विग्रहाश्च महीक्षिताम् ॥ १० ॥

प्राणिदुःखनिवासांश्च युगान्तं च न शस्यते ।
रौद्रवीराद्भुतभयानकबीभत्सकरुणा रसाः ॥ ११ ॥

न प्राङ्गणेषु प्रयोक्तव्या द्वारयन्त्रप्रवर्जिताः ।
हस्तकम्बरथपाताणि निधानायतनानि च ॥ १२ ॥

चण्डालकर्मशालानि श्मशानानि वनानि च ।
वृक्षाः पुष्पफलैर्हीना विहङ्गावासदूषिताः ॥ १३ ॥

एकद्विशाखाः कण्टाश्च भग्नाः शुष्काः सकोटराः ।
कदम्बशाल्मलीपीलुनारिकेलारलुकादयः ॥ १४ ॥

मूलानि परस्पृशन्तो कटुकण्टकिनश्च ये ।
गृध्रोलूका विहङ्गेषु कपोतश्येनवायसाः ॥ १५ ॥

कङ्कश्चेति न धार्यन्ते तथा रात्रिचराश्च ये ।
गजाश्वमहिषाश्चोष्ट्रा मार्जारखरवानराः ॥ १६ ॥

सिंहो व्याघ्रतरक्षुश्च वराहमृगजम्बुकाः ।
तथा वनचरा ये च कव्यादा कुणपक्षिणः ॥ १७ ॥

गृहेष्वेते न कर्तव्याः पीडाव्याधिताश्च ये ।
अमीषां करणाद्वैराचार्यैर्विपदुच्यते ॥ १८ ॥

व्याधिं घोरमवाप्नोति व्यसनं बन्धमेव च ।
यत्र तत्र गृहस्वामी धनहानिं पराजयम् ॥ १९ ॥

प्रवासं बन्धनं नाशं मृत्युं वा क्षिप्रमाप्नुयात् ।
इत्युक्तान्यप्रशस्तानि यत्नेषु गृहमेधिनाम् ॥ २० ॥

तत्र यानि प्रयोज्यानि कथ्यन्ते तान्यतः परम् ।
यस्य यत्र भवेद् भक्तिर्या चास्य कुलदेवता ॥ २१ ॥

हस्तवत्सप्रमाणेन तान् कुर्वन् स्यात शोभनम् ।
तद्द्वारपार्श्वयोः कार्यौ प्रतीहारौ स्वलङ्कृतौ ॥ २२ ॥

वेत्रदण्डधरप्रकरौ खड्गकोशपरिच्छदौ ।
रूपयौवनसम्पन्नौ विचित्राम्बरभूषणौ ॥ २३ ॥

धात्री वामनिका कुब्जा सखीभिः परिवारिता ।
विदूषकैः कञ्चुकिभिस्तुष्टैरनुगताननी ॥ २४ ॥
द्वारस्थो धवलः कार्यः प्रतीहार्यौ मनोरमाः ।
निधयश्चानुरूपाश्च शङ्खपद्मोज्ज्वललक्षणाः ॥ २५ ॥
रत्नपीताररोपाश्च वहन्तो पद्मोत्पलान् ।
पद्मस्था पूर्णकुम्भा वा रत्नजालविभूषिता ॥ २६ ॥
पत्रैः पर्णस्थितैः पुष्पफलपल्लवसम्भृतैः ।
पूर्णकुम्भाश्च कर्तव्याः कल्पवृक्षाश्च सर्वकामदाः ॥ २७ ॥
कार्यो हिमद्रुमो द्वारे वामभिः शङ्खपद्मयोः ।
द्वारमण्डलमध्यस्था लक्ष्मीमाला गजोत्तमैः ॥ २८ ॥
पद्मासना पद्महस्ता श्रीश्च कार्या स्वलङ्कृता ।
धृतः सवत्सा धेनुर्वा सम्यक्कल्पविभूषणा ॥ २९ ॥
फलभक्षैर्मयूरैर्विभिराहारार्थं निवेशितैः ।
नानापुष्पफलैर्नम्रैः शाखि तिर्यगवस्थितैः ॥ ३० ॥
चित्रा पञ्चलता लेख्या चारुरम्यप्रसरेषु ।
हंसकारण्डचक्राह्वैर्विविधैर्विसिनीपत्रपालिभिः ॥ ३१ ॥
कुमारकैश्च क्रीडद्भिर्युक्ता ललितबाहुभिः ।
वाहस्थानेषु निवेश्यन्ते विविधाभरणाम्बराः ॥ ३२ ॥
रतिक्रीडापरा नार्यो नायकस्तु यदृच्छया ।
कापाण्डुदेहच्छवयः स्वल्पचारुविभूषणाः ॥ ३३ ॥
विविधैश्च तनुभिर्गात्रैः कार्याः सुरतलालसाः ।
प्रवृद्धबालाविटपैः प्रबलाकल्पपल्लवैः ॥ ३४ ॥
चम्पकाशोकपुन्नागनागजातिलतादिभिः ।
नानापुष्पफलोपेतैः वृक्षैरन्यैश्च भूषिताः ॥ ३५ ॥

उद्यानभूमयः कार्याः कुन्तलिङ्गकसंकुलाः ।
काननैः फलपुष्पाढ्यैः स्वैः स्वैर्विहितसंकुलाः ॥ ३६ ॥
मनोरमैर्विहङ्गैश्च वापीश्च कमलोत्पलैः ।
कादम्बकुररक्रौञ्चहंससारसमेखलाः ॥ ३७ ॥
तीरान्तोद्भूतकह्लारकेतकीवनखण्डिताः ।
जलान्तर्लीनमत्स्यैश्च सकच्छपा नलिनीवनैः ॥ ३८ ॥
हैमवाश्च गृहभित्तीनामथो भागेषु वेदिकाः ।
कृतैः सर्वे समभेदेषु भिक्काञ्चनभाजनाः ॥ ३९ ॥
चित्रपत्रपङ्क्तिनिर्मिताः कोरकलताः फलभूमयः ।
विविधानोद्यहंसाश्च चम्पकनीलविचक्षणाः ॥ ४० ॥
कुट्टिमा ललना दोलायाः प्रेङ्खासकृतिभूमिषु ।
सकल्पाः पञ्जरस्थाश्च कपोतशुकसारिकाः ॥ ४१ ॥
पक्षुहाः परपुष्टाश्च मयूराश्च सकुक्कुटाः ।
इति यानि प्रदिष्टानि प्रयोज्यानि वेश्मनि ॥ ४२ ॥
तानि सर्वाणि शस्तानि सर्वोपकरणेष्वपि ।
देवयोनिगणास्तद्वत् पुरुषाश्च विनिन्दिताः ॥ ४३ ॥
सालभञ्जाश्च न धार्यन्ते पीठशय्यासनादिषु ।
पुरस्तात् कीर्तितान्यत्र प्रयोज्यानि यानि च ॥ ४४ ॥
तानि शस्तानि कार्याणि समादेवकुलेषु च ।
विप्रमानुषसम्बद्धान्यप्रयोज्यानि कानिषु ॥ ४५ ॥
प्रोक्तानि तानि तावन्ति क्षुद्रशालेष्वकादिषु ।
इति कथितमयोज्यं योज्यमीर्यं च कृत्स्नं
भवनशयनयानाद्येषु विन्यस्यवेद्येषु ।
विरचयति यथोक्तं शिल्पिनां वर्जयेद् यः

स भवति भूपतीनां शिल्पिनां चार्चनीयः ॥ ५६ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
अप्रयोज्यप्रयोज्यं नाम चतुस्त्रिंशोऽध्यायः ॥

## अथ शिलान्यासविधिर्नाम पञ्चत्रिंशोऽध्यायः ।

अथ ब्रूमः शिलान्यासविधिमत्र यथागमम् ।
तथोत्तरायणे पुण्ये शुक्लपक्षे शुभेऽहनि ॥ १ ॥
स्थिरभस्य दिवसे करणे च शुभान्विते ।
तिष्येऽश्विनीषु रौहिण्यामुत्तरेष्वपि च त्रिषु ॥ २ ॥
रेवत्यां श्रवणे हस्ते शिलाविन्यासमाचरेत् ।
स्थिरस्य राशेरुदये सौम्यमित्रावलोकिते ॥ ३ ॥
सम्यङ्निमित्तशाकुनस्वस्तिपुण्याहवाचिते ।
हर्षोदये च मनसः कुर्याद् वास्तोर्निवेशनम् ॥ ४ ॥
स्नातः सकुसुमः साञ्जनः शुचिः शान्तः समाहितः ।
कर्मारम्भेन स्थपतिः कृतदेवार्चनक्रियः ॥ ५ ॥
पूर्णां समाप्तविकलां चतुरस्रामनिन्दिताम् ।
शिलामाद्यां न्यसेत् तावत् परीक्ष्येत विचक्षणः ॥ ६ ॥
कुम्भाङ्कुशध्वजच्छत्रमत्स्यचामरतोरणैः ।
पूर्णनागफलोष्णीषपुष्पस्वस्तिकवेदिभिः ॥ ७ ॥
नन्द्यावर्तैः सचक्रैः कूर्मपद्मादिभास्करैः ।
चक्रैः प्रशस्तैः साकारैर्मुद्रिताः कर्मणो हिताः ॥ ८ ॥
दीर्घा ह्रस्वाल्पविस्ताराऽस्मात्स्थानावदीर्णिता ।
छिद्रयुक्ता चातिहीना च सास्थ्यङ्कुरा सशर्करा ॥ ९ ॥

नयता कुशपत्राभिर्भित्त्वा कृत्वा दोषभयापहौ ।
भूमौ चतुरस्राणां पदाङ्कः स्वस्तिकाकृते ॥ १० ॥
कल्पास्सूत्रनिकृष्टान्तं पादैः सूत्रास्तु कर्षयेत् ।
मध्यान्मध्यावसादूर्ध्वमन्तराः स्युरिमाः शिलाः ॥ ११ ॥
वासिष्ठी काश्यपी नन्दा भार्गव्याङ्गिरसीति ताः ।
नव मध्यतरे देशे संनिवेशस्य वास्तुनः ॥ १२ ॥
नैर्ऋत्यां वा सकुम्भां समां गोचर्मसम्मिताम् ।
वेदीं सगन्धकलशां चतुरस्रां प्रकल्पयेत् ॥ १३ ॥
आग्नेय्यामाहितो वन्हौ स्थापयेत् क्रमशः शिलाम् ।
बकालमूलैरश्वत्थैः सपद्मोत्पलपल्लवैः ॥ १४ ॥
सर्वौषधिहिरण्याद्यैर्मरालनखकन्यकैः ।
कुम्भैस्ताम्रमयैश्चापि मन्त्रैस्तामभिषेचयेत् ॥ १५ ॥
तीर्थप्रस्रवणाम्भोभिः सहकालनपल्लवैः ।
सुगन्धिभिः सपुष्पाद्यमभिषेकं प्रयोजयेत् ॥ १६ ॥
जाह्नवीयमुनारेवासरस्वत्यादिसम्भवैः(वम्) ।
महानदीजलं पल्वलं शुभतीर्थभवं तथा ॥ १७ ॥
तथाद्रिवनवेशान्तदेवायतनजानि च ।
अभिषेकार्थमम्भांसि यथालाभमुपाहरेत् ॥ १८ ॥
मन्त्रेणानेन चैतासामभिषेकं समाचरेत् ।
हिरण्यवर्णाः पावकाः शुचयो दुरितच्छिदः ॥ १९ ॥
शुभास्तु शान्ताः श्रीमत्य आपो युष्मान्प्रपुष्णुत ।
मन्त्रपूतेन पयसा स्नापयित्वा ततः शिलाम् ॥ २० ॥
स्थपतिर्लिप्तकल्केन मसृणेनानुलेपयेत् ।
हिमचन्दनचूर्णेन रूपकार्ये सुगन्धिना ॥ २१ ॥

तरसा छादयेदेनां सक्तैः पुष्पयवामिश्रैः ।
धूपमाल्योपहारैश्च दधिमांसासवादिभिः ॥ २२ ॥

पूजयेद्विरुक्तां देवीं चक्रपुष्पैश्च पुष्कलैः ।
निवेशनान्ते नैर्ऋत्यां तथा विप्रान्नपश्चिमात् ॥ २३ ॥

समस्तधुयान् छुधीन् ब्राह्मणानर्चयेद् दक्षिणाद्यैः ।
गोहिरण्याक्षितिपुण्याहगीतवादित्रनिःस्वनैः ॥ २४ ॥

कर्त्रा अभिनन्दितोमात्यैस्तेभ्यः कुर्यात्समर्पितयम् ।
निवेश्य वास्तोष्पतये भूतेभ्यश्च ततो बलिम् ॥ २५ ॥

तासां चतसृणामन्याः कुर्यात्पञ्चशिलाः पृथक् ।
प्राकारस्थरित्यगाद्ये द्वे तथा श्रीवत्सलक्षणा ॥ २६ ॥

नन्द्यावर्तन्तु पूर्णायां भद्रैकोऽ(बहो) यथाक्रमम् ।
कूर्मं प्राग्दक्षिणे गर्भां वास्तुनः स्थापयेदथ ॥ २७ ॥

अन्याः क्रमेण संस्थाप्याः कोणेष्वन्येषु च त्रिषु ।
प्रतिष्ठापनमन्त्राश्च तासां चतसृणामपि ॥ २८ ॥

चत्वारः कथिता दैत्याः छात्यनाटकमदर्शिनाः ।
वीर्येणाद्रिवराहस्य येषां स्वर्गमिमं जिताः(तान्) ॥ २९ ॥

वसिष्ठनन्दिनीं नन्दां प्राङ्मतिष्ठापयाम्यहम् ।
सुवत्त्वं सुदिवसे सा त्वं नन्दे निवेशिता ॥ ३० ॥

आयुः कारयितुर्दीर्घं श्रियं चाऽकालिकां वह ।
भद्रासि सर्वतोभद्रा भद्रे भद्रं विधीयताम् ॥ ३१ ॥

काश्यपस्य पियसुते प्रीताऽस्तु पुष्कमेधिनः ।
जये विजयतां स्वामी गृहस्यास्य महात्मनः ॥ ३२ ॥

आचन्द्रार्कं यशश्चास्य भूम्यामिह चिरोऽस्तु ।
त्वयि सम्पूर्णचन्द्राभे स्थापितायां वास्तुमस्तके ॥ ३३ ॥

मध्यमेव गृहस्वामी पूर्णं पूर्णमनोरथः ।
इति मूलमयो(यं) मन्त्रैः कुर्यात् स्थपतिस्थापकैः ॥ ४४ ॥
ताभिर्हिरण्यवर्णाभिः शिलाभिः समसूत्रकम् ।
प्रागुदक्क्रमशो न्यस्या न प्रत्यग्दक्षिणाक्रमा ॥ ४५ ॥
इष्टकान्यासवत्सर्वमाकारपुरकर्मसु ।
विमाने भित्तिविन्यासे चतुर्मुखमिकेनमे ॥ ४६ ॥
पुरोक्तः शालिभेदेषु प्रतिमास्थापनेषु च ।
कार्त्तिकेन विधानेन कलशः स्थापयेच्छिलाः ॥ ४७ ॥
† वैर्वैतैर्वोक्तसमासे(कवै)स्ताः सामभिः स महात्मनः ।
नागपुष्पिकगुग्गुलुभिर्धूपयित्वा च यथाक्रमम् ॥ ४८ ॥
जपात् समस्तांश्चित्तुपान्गुरो विरमेत् ततः ।
कृत्वा भित्तिप्रमाणं च चितेश्चयचतुष्टयम् ॥ ४९ ॥
समाप्यमानविकर्मैवं कनिष्ठं च यथोत्तरम् ।
प्रतिशिलास्ताः प्रथमे भूतले सुस्थिताः समाः ॥ ५० ॥
न चालयेच्चालने स्याद् गृहभर्तुर्महद् भयम् ।
कम्पने च भयं विद्यात्तेनासां स्थिरतां शुभः ॥ ५१ ॥
स्थपतेर्गृहभर्तुश्च मङ्गलं परमं विदुः ।
प्रागुदक्शिलायां चलने गृहभर्तुर्महद् भयम् ॥ ५२ ॥
भार्याविभागो नैर्ऋत्यां वायव्ये श्रीनिर्मदहिषि ।
गुरोश्च भयमैशान्यामथवारेऽपि तद् भवेत् ॥ ५३ ॥
प्रथमं स्थापितेषे(ताले)षु सकम्पानपि न चालयेत् ।
मोक्षरेण प्रयुयाच विधिवत्तुल्यो यतोऽन्ययोः ॥ ५४ ॥

शिलान्यासे प्रथमं तस्मात् कुर्यात् सम्यक् समाहितः ।
शिलानां स्थपतिस्तद्वत् लक्ष्मणानामपि सर्वथा ॥ ४५ ॥
द्वारमण्डपशालानां नगराणां च वेश्मनाम् ।
मध्यमाग्रो विधिर्यस्मात् तस्मात् तत्राहृतो भवेत् ॥ ४६ ॥
एवं शिलान्यासविधानमेतद् यथावदस्माभिरिहोपदिष्टम् ।
अस्मिन् कृते वेश्मपुरालयादि स्थिरतामभ्येति चिरेण चित्रम् ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
शिलान्यासविधिर्नाम पञ्चत्रिंशोऽध्यायः ॥

## अथ बलिदानविधिर्नाम षट्त्रिंशोऽध्यायः ।

इदानीमभिधास्यामो बलिदानविधिं क्रमात् ।
येन येनार्चिता देवास्तुष्यन्ति समहेश्वराः ॥ १ ॥
मण्डले वास्तुनो मध्ये गोमयेन प्रकल्पयेत् ।
कलशं तत्र विन्यस्येत् सम्पूर्णं सकाञ्चनम् ॥ २ ॥
वास्तुदेवास्ततः कल्प्या यथास्थानं नियोगतः ।
सपुष्पैर्विविधैर्माल्यैरर्घ्यं पश्चान्निवेदयेत् ॥ ३ ॥
अर्चयेद् विघ्नकर्माणं माल्यैर्धूपैर्विलेपनैः ।
भक्ष्यैः फलैर्बहुविधैः पूजयेत् सुसमाहितः ॥ ४ ॥
आग्नेय पयसा ब्रह्मा पूजयेच्छिशिरैः पुनः ।
शालिगोधूममुद्गाद्यैर्धान्यैः पञ्चभिरर्चयेत् ॥ ५ ॥
अपरां पूजयेदाज्यलाजसर्पिःसितादिभिः ।
मालतीमल्लिकाभिश्च पूजयेत् त्रिदशाधिपम् ॥ ६ ॥
कुम्भे ईशं तथा धूपे रक्तचन्दनलेपनैः ।
ततः सूर्यं सगन्धाद्यैः पूजयेद्रोचनकुङ्कुमम् ॥ ७ ॥

जम्बीरैर्बीजपूरैश्च नारङ्गैः पीलुकैः फलैः ।
पूजयेत् सत्यभामानं देवं तेन स तुष्यति ॥ ८ ॥
मत्स्यमांसैश्च तुष्यन्ति सर्वे रक्षःपुरोगमाः ।
तिलैः फलैर्नारिकेलैर्भूपाश्च परितुष्यति ॥ ९ ॥
गन्धधूपप्रयोगैश्च नभोनामानमर्चयेत् ।
पुष्पैः सुगन्धिभिः शुक्लैर्मोदकैः परितुष्यति ॥ १० ॥
कृसरं मधुसंयुक्तं पूष्णे भक्त्या निवेदयेत् ।
वितथं तु शुभैर्गन्धैर्मद्यमांसविमिश्रितैः ॥ ११ ॥
पूजितस्तुष्टिमायाति निवसंश्च महाद्युतिः ।
पुष्पैः सपुष्पकैस्तुष्टिमवाप्नोति गृहक्षतः ॥ १२ ॥
मत्स्यमांसयुतैर्भक्ष्यैर्यमस्तुष्टिः सदा भवेत् ।
सुकाण्डकधूपेन गन्धर्वानर्चयेद् बुधः ॥ १३ ॥
मृगमांसयुतैर्भक्ष्यैर्भृङ्गराजं च तर्पयेत् ।
राजजम्बूफलैर्दिव्यैर्देवमभ्यर्चयेन्मृगम् ॥ १४ ॥
पायसैर्मधुसंयुक्तैर्मांसैर्भक्ष्यैश्च चोभवैः ।
कर्पूरसुरभिद्रव्यगन्धैः संपूजयेत् पितॄन् ॥ १५ ॥
सपुष्पैर्मोदकैर्लाजैः पक्वैश्च विमिश्रितैः ।
दौवारिकं प्रयत्नेन पूजयेद् विघ्नकारकम् ॥ १६ ॥
अपूपैः शोभनैर्गन्धैर्धूपैर्माल्यैरनुत्तमैः ।
पुष्पैः कनककालीनां सुग्रीवं पूजयेत् सदा ॥ १७ ॥
सपुष्पैर्लाप( ज )कैर्भक्ष्यैर्विपुलकमलपायसैः ।
अर्चयेत् पुष्पदन्तं तु यशोवीर्यान्वितं सुरम् ॥ १८ ॥
मांसैश्च सूकरादीनां वैनतेयं समर्चयेत् ।
वरुणं च महासत्त्वं पूजयेद् धूपचन्दनैः ॥ १९ ॥

राहुं च मांससंयुक्तैस्तर्पयेद् भक्ष्यभोजनैः ।
रुधिरेण मद्येन तुष्टिमेति दानीश्वरः ॥ २० ॥

मांसेन तु कपस्तुष्टिं रोगाणामधिपो भजेत् ।
मेदसा पूजयेद् रोगं सर्वलोकभयङ्करम् ॥ २१ ॥

वासुकिं क्षीरपानेन पूजयेत् सततं नरः ।
पूर्ववत् पूजयेद् देवं विश्वकर्माणमीश्वरम् ॥ २२ ॥

क्लिन्नप्रसूनविन्यासैर्भल्लाटं पूजयेद् बुधः ।
दधियुक्तेन पाकेन सोमं सर्वत्र पूजयेत् ॥ २३ ॥

कुबेरं पूपदानेन पूजयेत् सततं नरः ।
अदितिं च सुवर्णेन पयोरसे च पूजयेत् ॥ २४ ॥

अर्कमन्दारमालाभिर्धूपार्घं च समर्पयेत् ।
अन्येषामपि देवानामर्चनं पूपसाधनैः ॥ २५ ॥

सर्वपुष्पफलैरेषां कार्या तुष्टिस्तथा तथा ।
इत्येते बलयः सर्वे वास्त्वर्थं परिकल्पिताः ॥ २६ ॥

शोधने कर्षणे भूमेः स्थापने कृतकल्पने ।
गृहे प्रवेशने स्तम्भे निवेशसमुच्छ्रयेषु च ॥ २७ ॥

स्कन्धावारनिवेशेषु पुरग्रामनिवेशने ।
देवालयक्षितिपवेश्मनिवेशनेषु
प्रोक्तान् बलीन् प्रविकिरेत् प्रयतः सुरेभ्यः ।
प्रारब्धमन्यदपि वास्तुगतं चिकीर्षुः
कुर्वीतिमं विधिमभीप्सितसाधकं स्यात् ॥ २८ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
बलिदानविधिर्नाम षड्विंशोऽध्यायः ॥

## अथ कीलकसूत्रपातो नाम सप्तत्रिंशोऽध्यायः ।

वर्णानां यानि वृक्षाणि कीलकार्थे नियोजयेत् ।
इदानीं तानि वक्ष्यामि श्रेयःकीर्तिहिताय च ॥ १ ॥
खदिरोदुम्बराश्वत्थपालाशाक्षधवार्जुनाः ।
अर्जुनः कदराखोटनिम्बशाकवनद्रुमाः ॥ २ ॥
शिरीषसर्जनम्भोधवेधवाः कीलकर्मणि ।
शुभावहानो द्रुमाः ख्याताः क्षीरवन्तो विवर्जिताः ॥ ३ ॥
ब्राह्मणः खदिरकीलो विप्राणां वृद्धिकारकौ ।
रक्तचन्दनवैणवकीलौ क्षत्रस्य वृद्धिकौ ॥ ४ ॥
शाकश्च खदिरश्चैव सामन्तानां हितावहौ ।
कीलौ पालाशशिंशपोत्थौ वैश्यानां कीर्तिदौ शुभौ ॥ ५ ॥
शूद्रजातेस्तु निम्बशाखवार्जुनसमुद्भवा ।
वैश्यकेषु सौभाग्यकार्ये च सुरवोधजाः ॥ ६ ॥
न्यग्रोधो वकीरो यानि मुनिकर्णप्रशुकवरः ।
महामात्र(त्रा)श्वैवयानां कीलाः सर्वाङ्गुला गृहे ॥ ७ ॥
विप्राणां सर्ववर्णेभ्यः क्षत्रियाणां त्रिवर्णजाः ।
वर्णद्वयोक्ता वैश्यानां शूद्राणां स्वानुलोमतः ॥ ८ ॥
प्रतिलोमा न कर्तव्याः कीलका मुनिभिस्तथा ।
प्रमाणमथ कीलानां निगद्यन्ते पृथक् पृथक् ॥ ९ ॥
द्वात्रिंशदङ्गुलाः कीला विप्राणां स्युः शुभावहाः ।
क्षत्रियाणां पुनश्चाष्टाविंशत्यङ्गुलसम्मिताः ॥ १० ॥
चतुर्विंशत्यङ्गुलाश्च वैश्यानां शुभदायिनः ।
विंशत्यङ्गुलैः कीलाः शूद्रजातेस्तु ते हिताः ॥ ११ ॥

यवाङ्गुलपरीणाहाः सर्वेष्वेते शुभावहाः ।
ब्राह्मणक्षत्रियविशां वैश्यशूद्रजन्मनः ॥ १२ ॥

षडङ्गुलपरस्तु शूद्रस्य शङ्कुलेऽस्तु पञ्चधा ।
दार्भैर्मैत्रैश्च पोकार्पासैः विप्रादीनां यथाक्रमम् ॥ १३ ॥

शर्वपर्वपरीणाहं दृढं सूत्रं तु वार्तिनम् ।
अलाभे स्वस्य सूत्रस्य सौत्रकार्पासनं बुधः ॥ १४ ॥

षड्गुणीषात् सूत्रमन्ये तु षड्गुणीपुः स्वेष्टकं ईव ते ।
इत्थं संभृत्य सम्भारान् गृहकर्मणि शुभेऽहनि ॥ १५ ॥

शुक्लपक्षे शुचिः स्नातः स्थपतिश्च शिलान्वितः ।
गृहस्थानमिमितात् तु देवस्थानानि लक्षयेत् ॥ १६ ॥

कुसुमाक्षतगन्धाद्यैः कर्तव्या शुद्धदेवताः ।
आदौ स्थानानि वास्तूनां परीक्षेत समन्ततः ॥ १७ ॥

तेषु सर्वेषु कर्तव्यमर्चनं तु यथाविधि ।
गृहस्य मध्ये शिलस्था तु लिखन्य प्रथमः पदे ॥ १८ ॥

गोमयेन समालिप्तां कुर्याद् वेदीं सुलक्षणाम् ।
चतुरस्रां चतुर्द्वारावतः सुप्रतिष्ठिताम् ॥ १९ ॥

तस्या मध्ये प्रतिष्ठाप्यः कुम्भो हैमोऽथ राजतः ।
ताम्रजो मृन्मयो वापि पूर्वालाभे परः परः ॥ २० ॥

अव्रणश्चाक्षतः सोऽश्मपट्टो जलपूर्णः स्वलङ्कृतः ।
मणिरत्नप्रवालैश्च स्वर्णरूप्येण निर्मितः ॥ २१ ॥

प्रतिष्ठाप्या(प्योऽ)क्षतैः पुष्पफलबीजसमन्वितः ।
गीतेन गन्धमाल्यैश्च चर्चयित्वा समन्ततः ॥ २२ ॥

तस्योपरिष्टात् विन्यस्येत् क्षीरवृक्षस्य चक्रकम् ।
सुगन्धिमाल्यधूपेन धूपयित्वा चतुर्दिशम् ॥ २३ ॥
वेष्टयेदहतेनैवं सूत्रपञ्चकेन सर्वतः ।
वास्तुमध्ये गतो ब्रह्मा कुम्भकर्ण(र्णः) स तिष्ठति ॥ २४ ॥
कुम्भस्योत्तरभागे तु कीलकान् स्थापयेद् बुधः ।
कीलानष्टौ परीक्ष्यैव स्थापयेच्च यथाविधि ॥ २५ ॥
श्वेतचन्दनलिप्तांस्तान् श्वेतपुष्पैर्विभूषयेत् ।
तालजलकान् सुरभिणा धूपेन च सुधूपितान् ॥ २६ ॥
कर्णाग्रयेण सूत्रेण त्रिवर्णेनाभिवेष्टयेत् ।
मधुसर्पिर्दधिक्षीरैर्मूलभागेषु लेपयेत् ॥ २७ ॥
अर्चयेत् परशुं सूत्रमष्टीलादीनि सर्वतः ।
अथोपकरणान्यत्र धूपपुष्पाक्षतादिभिः ॥ २८ ॥
ततः पूर्वोत्तरे वास्तोर्भागे सप्तार्चिषः पदे ।
गोमयेन समालिप्ते कुशास्तरणमास्थितः ॥ २९ ॥
अग्निकार्यं प्रकुर्वीत पुरोधाः शान्तिमेव च ।
सांवत्सरः शुचिः स्नातः शुक्लवासा।      समाहितः ॥ ३० ॥
प्राङ्मुखः साधयेल्लग्नं सम्यक् नाडिकाघटया ।
राशिलग्नं तु नक्षत्रैर्ग्रहास्तोदयलक्षितैः ॥ ३१ ॥
एवं संसाधयेल्लग्नं यदीच्छेत् सिद्धिमात्मनः ।
पूजया तुष्टिकारिण्या पूजयेच्च पुरोहितम् ॥ ३२ ॥
अन्यथा चेत् फलं तस्मिन् ब्रह्मा भवति दूषितः ।
सांवत्सरस्य कर्तव्या ततः पूजा यथाविधि ॥ ३३ ॥

मांसकृसरेऽर्पिते पश्चात् पूजितः स्याद् बृहस्पतिः ।
स्थपतिं पूजयेत् पश्चात् स्वपुष्टिविष्टिकारिणा ॥ ३४ ॥
तदधीने यतः कर्म शुभं वा यदि वाऽशुभम् ।
श्वेतचन्दनदिग्धाङ्गान् श्वेतपुष्पैश्च पूजितान् ॥ ३५ ॥
सक्षीरहव्यैर्नैवेद्यैरपूपैः सम्प्रपूजयेत् ।
परिकर्मकरा ये च तान् यथाशक्ति पूजयेत् ॥ ३६ ॥
देवा यक्षादिकाश्चैव नागिन्यः परितोषयेत् ।
यथा सुमनसस्ते स्युस्तथा कर्तव्यमादरात् ॥ ३७ ॥
ततः स्थपतिराचम्य बलिकर्म समाचरेत् ।
भूतयागे बलिं दीयात् सार्वभौतिकमाचरेत् ॥ ३८ ॥
तस्यालाभे बलिः कार्यो यो भवेत् सोऽभिधीयते ।
सिद्धान्नं चरुकं श्वेतरक्तपीतासितान् पृथक् ॥ ३९ ॥
पायसं कृसरं क्षीरं पिष्टपाकान् श्वेतमोदकान् ।
पालिकापिष्टकर्णाश्च पललोल्लापिकाघृतम् ॥ ४० ॥
दध्योदनं च सौमित्रं देवताभ्यो निवेदयेत् ।
गिरिशृङ्गेषु शक्त्यैर्वनराशिं च पूजयेत् ॥ ४१ ॥
ततश्च पायसं दद्यात् ब्रह्मस्थाने निवेदयेत् ।
ततश्चाऽनुक्रमेणैव देवताभ्यो बलिं हरेत् ॥ ४२ ॥
बलिकर्म यथान्यायं कृत्वा च द्विजवाचनम् ।
स्वशालीयान् कुर्वीत ब्राह्मणान् पूजयेद् दक्षिणादिभिः ॥ ४३
ओङ्कारस्वस्तिपुण्याहैर्गीतवादित्रनिस्वनैः ।
ततो विप्रैः सह स्थापी कुर्वीत तस्य प्रदक्षिणम् ॥ ४४ ॥
मध्यमात् प्रथमं कुम्भे पातयित्वा द्विजोत्तमैः ।
ततो दक्षिणपूर्वेण गत्वा पुण्याहवाचकैः ॥ ४५ ॥

अहताम्बरसंवीतः शुचिः स्वपनिरासने ।
स्थित्वा प्राङ्मुखः शङ्कुं कृत्वा दक्षिणपाणिना ॥ ४६ ॥
वसुधायाश्च वामेन प्रतिष्ठाप्य च मूलके ।
मन्त्रानमून् जपन् कीले हन्यात् परशुना ततः ॥ ४७ ॥
विघ्नास्तु ये तले नागा लोकपालास्तथैव च ।
प्रतिष्ठन्तु गृहे चास्मिन्नायुर्बलकरं भवेत् ॥ ४८ ॥
प्रहारान् सुस्थिरानष्टौ दद्यात् कीलस्य मूर्धनि ।
हन्यमाने ततः कीले निमित्तान्युपलक्षयेत् ॥ ४९ ॥
गोविप्रधवलच्छत्राः कन्या वृषवरस्त्रियः ।
शङ्खदुन्दुभिसंह्रादो तथा गीतस्य च ध्वनिः ॥ ५० ॥
वाणिर्भवति पठपठित् हन्यमाने प्रसूस्तथा ।
सततं सुखमाप्नोति धान्यैश्वर्यैश्च वर्धते ॥ ५१ ॥
एवं शुभं विपरीतं वा निमित्तः शङ्कुकीलयोः ।
पातयित्वा च सर्वेषां दर्शनं न सुखावहम् ॥ ५२ ॥
दृष्ट्वा शुभनिमित्तानि ततः शङ्कुं निवेशयेत् ।
हन्यमानो यदा कीलो विशेद् भूमौ शनैः शनैः ॥ ५३ ॥
कर्मसिद्धिर्भवेत् तत्र एवं स्वल्पपरिश्रमम् ।
हन्यमानोऽपि न विशेद् धरित्रीं कीलको यदा ॥ ५४ ॥
न तत्र कर्मसिद्धिः स्यादनिमित्तं च लक्षयेत् ।
एकेनापि प्रहारेण यत्र कीलो विशेन्महीम् ॥ ५५ ॥
न सिद्धिं याति नाशकः कुलं वा नोपयुज्यते ।
नायकस्याहितया हन्यात् कालेन कश्यप ॥ ५६ ॥
कालेन नाशितः कीलो वह्निदोषकरो भवेत् ।
अश्मना यदि ताडयेन तदा स्यादर्थि प्रपञ्चणि ॥ ५७ ॥

ऐन्द्रीं प्रति ततः कीलो भवसम्भवतत्कारकः ।
आग्नेय्यां हन्यते कीले भवत्यग्निभयं महत् ॥ ४८ ॥

याम्यायां मरणं राज्ञां विदिशि राक्षसो भयम् ।
जलनाशस्तु वारुण्यां वायव्यां रोगतो भयम् ॥ ४९ ॥

सौख्यं सौम्यागते राजप्रसादश्चैशतो गतः ।
कीलके कुर्वीत काले शुभयोगान्वितेऽह्नि ॥ ५० ॥

यस्मादृद्धिमवाप्नोति धनधान्यैश्च वर्धते ।
हन्यमानो यदा यत्नात् कीलः कश्चिदपि स्फुरेत् ॥ ५१ ॥

भार्यां विद्यात् तदा पत्न्या ज्येष्ठस्य तनयस्य वा ।
यदि भग्नेन कीलः स्यात् स्वामिनो जायते भयः ॥ ५२ ॥

यदा कीलः पतेद्धस्तात् क्षेत्रः स्यात् स्वपतेस्तदा ।
हस्तच्युतश्च स मध्यवीथिके हस्तविच्युते ॥ ५३ ॥

सुखेन हन्यमानोऽसौ कीलः स्फुटो न जायते ।
अतो महाराजपरीक्षस्य भयात् तदा शुभः ॥ ५४ ॥

अतः गन्धधूपोपहारैः कुर्याच्च परिवेषणम् ।
इदं साम महापुण्यं परिचिन्त्य समाहितः ॥ ५५ ॥

श्लोकं तु जपेद् विद्वान् वास्तुपुरुषविवेचनम् ।
गत्वाथ नैर्ऋतीमाशां ततः शङ्कुं निवेशयेत् ॥ ५६ ॥

स्तम्भोपरेण साक्षाच्च तत्पदं जपमाचरेत् ।
वायोर्दिशं ततो गत्वा तत्र शङ्कुं निवेशयेत् ॥ ५७ ॥

अभिषेकं महारत्नसाम्ना तस्य समाचरेत् ।
अर्धपात्रीं शिरो गत्वा शङ्कुं तस्यां निवेशयेत् ॥ ६८ ॥

भावेन साम्ना कुर्वीत प्राग्वत् तस्याभिषेचनम् ।
ततोऽन्तु सूत्रं बध्नीयात् सकर्णं त्रिगुणीकृतम् ॥ ६९ ॥

प्रदक्षिणं प्रसार्यैनमुक्तः शङ्कुक्रमो यथा ।
प्र(य)म्यमाने यदा सूत्रं शङ्कुः किंचिदपि मुञ्चति ॥ ७० ॥

तदा मुक्तयं विद्यात्किञ्चित्स्वस्थानिवृत्तये ।
तस्मात् यत्नः प्रकर्तव्यो यावत् सूत्रं प्रसार्यते ॥ ७१ ॥

चतुर्णामपि बाहूनां योगं छिद्रं न दृश्यति ।
सूत्रं प्रसार्य विनिवेशयन् पूर्वं प्रकल्पितान् ॥ ७२ ॥

स्थैर्यं स्थैर्यं ततः स्थलेष्वनेन विधिना पुनः ।
शङ्कुस्थानेषु शालस्याः शिलान्यासस्य क्रमात् ॥ ७३ ॥

प्राग्दक्षिणाद्या विदिशो मन्त्रं येषां कृत्वा जपेत् ।
भास्कराणां च सर्वेषां मानवानां तथैव च ॥ ७४ ॥

बलिं तेषु प्रवक्ष्यामि मन्त्रेण परिभावितम् ।
रक्तं बलिमुपाचार्य नैर्ऋत्यभिमुखस्तथा ॥ ७५ ॥

नैर्ऋत्यधिपतिर्मिथ नैर्ऋत्या ये च राक्षसाः ।
बलिं तेषु प्रवक्ष्यामि रक्तमोदनमुत्तमम् ॥ ७६ ॥

कृष्णं बलिमुपाचार्य गत्वा च दिशमाग्नेयीम् ।
नमस्ते यमराजाय ये चान्ये तं समाश्रिताः ॥ ७७ ॥

बलिं तेषु प्रवक्ष्यामि कृष्णमोदनमुत्तमम् ।
बलिमुद्गृह्य हारिद्रमैशानीमाश्रयन् दिशाम् ॥ ७८ ॥

ततो रक्षेषु सर्वेषु ये चान्ये नाम समाश्रिताः ।
प्रयच्छामि बलिं तेषां हरिद्रोदनमुत्तमम् ॥ ७९ ॥
एवमेतान् बलीन् सर्वान् यथावत् सन्निपातयेत् ।
ततः कुम्भोदकं पुण्यं सात्वा विध्येन सन्नयेत् ॥ ८० ॥
वामदेव्येन कुर्वीत प्रोक्षणं तेन वास्तुनः ।
कृत्वा विप्रशालाभिरपि निर्मिताः काकूयते
फलं पञ्चभूतोत्थ सुखमिह निखिलानि चतुरः ।
तथा सूत्रपाते विधिरपु च मन्त्रैः प्रतिष्ठितो
भक्तिः कीलकसूत्रविधिपरिज्ञेयस्य विविधान् ॥ ८१ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
कीलकसूत्रपातो नाम सप्तत्रिंशोऽध्यायः ॥

## अथ वास्तुसंस्थानमातृका नामाष्टात्रिंशोऽध्यायः ।

इदानीमभिधास्यामो वास्तुसंस्थानमातृकाम् ।
निवासहेतवे सम्यक् सर्वकर्मोपजीविनाम् ॥ १ ॥
चतुरश्रं समं तत्रापि दीर्घं वृत्तं च वास्तुकम् ।
चक्राकारमण्डलार्धचन्द्रकन्याकृतीनि च ॥ २ ॥
छिन्नकर्णं विकर्णं च पार्श्वं मुरजसन्निभम् ।
वाजस्थानकं कूर्मपृष्ठं सर्वतो व्यजनाकृति ॥ ३ ॥
शरावस्थालिकाकारं मुरजपणवोपमम् ।
त्रिपार्श्वकं वज्रपार्श्वं यवमध्यसमाकृति ॥ ४ ॥

उत्सन्नग्राम(न)गमन्याने यथा पदसुविलक्षणम् ।
विकामिते च भद्रं च ऽमलन्तं च विचाविहम् ॥ ३ ॥
त्रिकुटं पञ्चकुटं च पारिक्षिप्तं तथापरम् ।
विश्वसारिन्दकान्तं श्रीकान्तं वर्धमानसमानकम् ॥ ५ ॥
पुरीपदं नरपदं चत्वारिंशत् समासतः ।
सेनामुखान्यथान्येषां विनियोगो विधीयते ॥ ७ ॥
चतुरश्रे समे राजा सान्याकारे पुरोहिताः ।
दीर्घे कुमारकाः सेनापतिर्वृत्तायते वसेत् ॥ ८ ॥
वसेयुः ताम्रकाकारे सर्वे बाह्याः सुखार्थिनः ।
अन्तःपुरं सदा समे वाणिजाः कालकाकुली ॥ ९ ॥
वैश्यास्तु भगसंस्थाने दर्पणाभे सुवर्णकृत् ।
संस्थानतो पञ्चसमे जना नगरगोष्ठिकाः ॥ १० ॥
वसेयुः पिशाचसंस्थाने खेटे शुक्तिमिलाविजाः ।
पिप्लकर्णे महाप्राणा विकर्णे कृतलुब्धकाः ॥ ११ ॥
शाङ्खाभे वैकल्पनाको गन्धाकार्याः क्षुरोपमे ।
नाना(ना)प्यकाः तालिमुखे कूर्मपृष्ठे तु मालिकाः ॥ १२ ॥
सर्वतो सौचिका वाजिपोषिका व्यजनोपमे ।
नाहवणास्त धाराभे स्वस्तिके पणिकाशमयाः ॥ १३ ॥
पणाभे सप्तशाभे वेणुलूपीविपाचकाः ।
विचार्यैरे तु रथिनः कथञ्चनमिने तुला ॥ १४ ॥
मीनाः भयाकारस्य पत्रप्रतिमे धान्यजीविनः ।
उत्सन्ने भग्नणा हस्त्यारोहिणो रा(ग)जमन्दिरे ॥ १५ ॥

परशुप्रतिमे क्षेत्रे बन्धनागारिणो जनाः ।
शिल्पाविनि सुधाकाराः स्थकामे कर्मकारिणः ॥ १६ ॥
मृगाङ्के सचिवाः स्थाप्या बाहुल्ये कोशरक्षिणः ।
त्रिकूटे पञ्चकूटे च वसेयुर्बुद्धिजीविनः ॥ १७ ॥
समन्ततः *परिष्वक्ते सर्वे मान्योपजीविनः ।
द्विस्वस्तिके तु वेश्मानि कुर्याद् वासांश्च सर्वशः ॥ १८ ॥
श्रीवृक्षप्रतिमे वृक्षान् पक्षवाटांश्च कारयेत् ।
वर्धमानाङ्कुशिकुलेऽप्येवमेव प्रकल्पयेत् ॥ १९ ॥
दण्डोपरे तु गणिकाचोरान् नरपद्मोपमे ।
इत्युक्ताः शुभदा वासाः सर्वकर्मोपजीविनाम् ॥ २० ॥
कर्मोपजीविजनवासनिमित्तमेताः
क्षेत्राकृतीरभिहिताः प्रविभज्य तेषाम् ।
वेश्मानि कारयति यः स्थपतिर्यथाव-
न्मान्यः स कस्य न भवेदिह भूमिपृष्ठे ॥ २१ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
वास्तुसंस्था(प?)नकाङ्कशालानामाष्टचत्वारिंशोऽध्यायः ॥

## अथ द्वारगुणदोषो नामैकोनचत्वारिंशोऽध्यायः ।

गृहाण्युक्तानि सर्वेषामेवं कर्मोपजीविनाम् ।
वर्णिनां च गृहस्थानां कथ्यन्तेऽतः परं यथा ॥ १ ॥
भल्लाटे धनदे पूष्णि वारुणे पृथिवीधरे ।
ब्राह्मणस्य भवेद् वेश्म माहेन्द्रद्वारमुत्तमम् ॥ २ ॥

माहेन्द्रेऽर्केऽथ सत्ये वा आर्यके वा निकेतनम् ।
कार्यं गृहस्वामिद्वारं क्षत्रियस्य शुभावहम् ॥ ३ ॥

याम्ये वैवस्वते वापि गान्धर्वेऽथ गृहक्षते ।
वैश्यस्य भवनं कार्यं द्वारं पुष्पाह्वये शुभम् ॥ ४ ॥

वारुणे शोषवृन्दे वा यद्वा पैत्रेऽथवासुरे ।
शूद्रस्य सदनं कार्यं भल्लाटद्वारमुत्तमम् ॥ ५ ॥

विप्राणां प्राङ्मुखं वास्तु यद्वा स्याद् दक्षिणामुखम् ।
वर्धते धनधान्येन पुत्रपौत्रैश्च नित्यशः ॥ ६ ॥

दक्षिणाभिमुखं वास्तु भवनं पश्चिमामुखम् ।
क्षत्रियस्य परं याम्ये विजयश्चेह वर्धते ॥ ७ ॥

वास्तुनः पश्चिमं द्वारं भवनस्योत्तरामुखम् ।
लभते धनधान्यैः पुत्रपश्वादिभिश्च विट् ॥ ८ ॥

वास्तु स्यादुत्तरद्वारं यदि पूर्वमुखं तथा ।
शूद्रस्य कर्मवृत्तिस्तु धनधान्यैर्विवर्धते ॥ ९ ॥

एकस्यामपि शालायां चत्वारः संप्रकीर्तिताः ।
विदिग्द्वारप्रभागाश्च कल्पन्ते च शुभाशुभाः ॥ १० ॥

उत्सङ्गो हीनबाहुश्च पूर्णबाहुस्तथापरः ।
प्रत्यक्षायश्चतुर्थश्च निवेशाः परिकीर्तिताः ॥ ११ ॥

उत्सङ्ग एकदिक्स्थाभ्यां द्वाराभ्यां वास्तुवेश्मनोः ।
स सौभाग्यप्रजावृद्धिधनधान्यजयप्रदः ॥ १२ ॥

यत्र प्रवेशतो वास्तु गृहं भवति वामतः ।
तद्धीनबाहुकं वास्तु निन्दितं वास्तुचिन्तकैः ॥ १३ ॥

तस्मिन् वसन्नल्पवित्तः स्वल्पमित्रोऽल्पबान्धवः ।
स्त्रीजितश्च भवेन्नित्यं विविधव्याधिपीडितः ॥ १४ ॥
वास्तुप्रवेशतो यत् तु गृहं दक्षिणतो भवेत् ।
प्रदक्षिणप्रवेशत्वात् तद् विद्यात् पूर्णबाहुकम् ॥ १५ ॥
तत्र पुत्रांश्च पौत्रांश्च धनधान्यसुखानि च ।
प्राप्नुवन्ति नरा नित्यं वसन्तो वास्तुनि ध्रुवम् ॥ १६ ॥
एतदर्थं समाश्रित्य वास्तुद्वारं यथा भवेत् ।
प्रत्यक्षापसव्यसौ निन्द्यौ वामावर्तप्रवेशकृत् ॥ १७ ॥
ब्राह्मणो निवसेत्पूर्वे दक्षिणे क्षत्रियो वसेत् ।
निलये निवसेद् वैश्यः शूद्रः सर्वत्र धामनि ॥ १८ ॥
एते वैशेषिकाः सर्वे वर्णानामनुपूर्वशः ।
वास्तुद्वारनिवेशाश्च वासैः सह निरूपिताः ॥ १९ ॥
यथोत्तरमथोच्छ्रायो वर्णानां गृहकल्पनाः ।
ब्राह्मणक्षत्रियाणां च राज्ञां च जनपदरक्षिणाम् ॥ २० ॥
सार्धभूमि शूद्राणां वेश्म कुर्याद् विभूतये ।
ततोऽधिकतरं यत् स्यात् तत् करोति कुलक्षयम् ॥ २१ ॥
वैश्यस्य वर्धयेद् गेहमर्धपञ्चमभूमिकम् ।
अतिप्रमाणे तस्यास्य धनधान्यपरिक्षयः ॥ २२ ॥
क्षत्रियस्य गृहं कुर्यादर्धषष्ठतलं परम् ।
सकलकल्याणवृद्ध्यै तदतिरेकं तु नेष्यते ॥ २३ ॥
वरं विप्रस्य भवनमर्धसप्तमभूमिकम् ।
स्वाध्यायाचारभोगार्थमस्तु तु यथावहम् ॥ २४ ॥
यजन्तो राजसूयाद्यैः क्रतुभिर्येऽवनीश्वराः ।
तलैरर्धाष्टमैस्तेषां कारयेद् भवनोत्तमम् ॥ २५ ॥

आहवनीयकुण्डानां राजा राज्याभिषेचका यः ।
तस्याग्न्यर्धाङ्गुलके भवनं कर्णिकेत्यपेत् ॥ २६ ॥

वाजपेयेन वा यज्ञा यो द्विजः स्यात् समाहितः ।
तस्यां कोटिमखो यो वा सोऽपि तस्मिन् भवेषु(व)तीः ॥ २७ ॥

यथाप्रमाणनिर्दिष्टे यत्सम्भवते तु पावकः ।
प्राप्नुवन्ति पराबुद्धिमवृद्धिं तु विपर्यये ॥ २८ ॥

सप्तैकलक्षं वेश्म मानतः संप्रकीर्तितम् ।
साधारणेन हस्तेन परं खातस्य विंशतिः ॥ २९ ॥

चत्वारिंशत् त्रिकाः षष्टिः क्षत्रियस्य प्रचक्षते ।
अशीतिर्निर्दिष्टमनुष्यस्य शतहस्ता महीपतेः ॥ ३० ॥

मानः परं बृहतानुर्णसमार्थ कल्पनुच्यते ।
देवदानवदैत्यानां पिशाचोरगरक्षसाम् ॥ ३१ ॥

सिद्धगन्धर्वयक्षाणां पिशाचप्रमथोऽभिचकम् ।
एकभौमालयो नैव पाई यस्य विद्यते ॥ ३२ ॥

वैश्यस्य भवनं कार्यमथो नान्य(स्य)भौमभूमिकान् ।
द्विभूमिकमथः कार्यं क्षत्रियस्य न मन्दिरम् ॥ ३३ ॥

सार्धद्विभौमानि विप्रस्य त्रितलान्यपि भूपतेः ।
दीपप्रमाणावसुलो यहं यत् कुलिशिपमा स्यात् निहितं कथञ्चित् ।
मर्तुर्मिते सिद्धिविनाशार्थं तत् प्रयासशीलादिविपर्ययाय ॥ ३४ ॥

गुणदोषम् प्रवक्ष्यामि भूतानां सर्ववास्तुषु ।
सुस्थिरं चतुरस्रं च काम्यं स्यात्प्रपयोगितम् ॥ ३५ ॥

वास्तु स्वर्गीयविन्यासो न दूष्यं न तथोत्कटैः ।
मतल्पं न कुब्जं नान्यमि    पिच्छितं न बहिर्गतम् ॥ ३६ ॥

नाभ्यालं च कृतं मध्ये गर्ते भान्तरकुक्षिषु ।
न विपुलं न संक्षिप्तं यत् तत् स्यात् द्वारमुत्तमम् ॥ ३७ ॥

पदस्य द्वारतो भागे पदमध्यात् प्रदक्षिणम् ।
स्थापितं वृद्धिमाप्नोति द्वारं वृद्धिं करोति च ॥ ३८ ॥

रथ्यान्तरवृक्षद्वाराद्यावीक्षणाय      कुम्भकैः ।
कुम्भकोणस्तम्भकैर्भवनस्थानभागिभिः ॥ ३९ ॥

यद् विद्धं भवनद्वारं तच्छुभाय न जायते ।
द्वारं द्वारे प्रविद्धं च कर्तव्यं विजानता      ॥ ४० ॥

वेश्मनां प्रवेशमैकैकमन्यद्वारे कृतात्मना ।
द्वारं प्रवेशयेत् वेश्मनां नारोहणावरोहयोः ॥ ४१ ॥

पक्षद्वारस्य वा भेदं कथञ्चिदपि बुद्धिमान् ।
न बाह्यगान्तरे द्वारे प्रविद्धं कारयेत् क्वचित् ॥ ४२ ॥

विहिते हि भयं तेन स्यात् बहुदोषकरं तथा ।
तोरणं गोपुरद्वारमाद्यो वेश्मनां बहिः भवेत् ॥ ४३ ॥

गृहाणां मौलिकद्वारं मौले चैतान् प्रवेशयेत् ।
द्वारं द्वारस्य कर्तव्यमुपर्युपरि भूमिषु ॥ ४४ ॥
प्रदक्षिणेन वा कार्यं कार्यं नापरथा पुनः ॥ ४५ ॥
उपर्युपरि भूमीनां सूत्रं कुर्यात् प्रदक्षिणम् ।
नापसव्येन कुर्वीत द्वारमारोहणानि च ॥ ४६ ॥
यस्यां भित्तौ कृतं पूर्वं तस्यामुपरि कारयेत् ।
अथान्यभित्तौ तद्द्वारं विधातव्यं प्रदक्षिणम् ॥ ४७ ॥
न मध्ये सप्तमो द्वारं कुर्यादिह पदस्य च ।
न स्पृष्टे      न पदे नापि सिरापाते निविश्यते ॥ ४८ ॥
भित्तिशालाविस्थितैर्द्रव्यैस्तिर्यक् कृत( ता )न्तैश्च मन्दिरे ।
मर्मवेधो न दोषाय द्वारवेधोऽथवा क्वचित् ॥ ४९ ॥

द्वारगुणदोषो नामैकोनचत्वारिंशोऽध्यायः ।

यवमहाल्पकल्पाना पुरवैकृतस्य च ।
न भवेद्यदा एकद्वारे द्वयमपः सोमसूर्ययोः ॥ ५० ॥

न प्राकारेण कुड्येन न चिह्नेन वा पुनः ।
अन्तर्हितानि युध्यन्ति द्वाराण्यपि कुत्रचित् ॥ ५१ ॥

मार्गवेधे स्याद् भयं राज्ञो भित्ते तस्करतो भयम् ।
कुलपीडा भवेत् कुम्भे पक्षिपाति पराभवः ॥ ५२ ॥

आम्रालेऽप्यन्नदारिद्र्यं कूपामध्ये क्षयो धनाम् ।
रथ्याविद्धे भवेद् रोगो मरणं चत्वरेण च ॥ ५३ ॥

मृद्द्वारवेधे वैकल्यं बुद्धिपूर्णा प्रजायते ।
बाल्या वृक्षेण वा भित्ते स्यात्कलीकारतो भयम् ॥ ५४ ॥

कोणाभ्यन्तुमध्ये दद्याद् वृक्षे रोगभयं भवेत् ।
स्तम्भेन म्रियते स्वामी कर्मकार्यो न तिष्ठति ॥ ५५ ॥

मण्डपेन महद् दुःखं महाभीतिर्वृहत्फलिः ।
तस्मात् सर्वप्रयत्नेन द्वारवेधं विवर्जयेत् ॥ ५६ ॥

परस्परमतः पुष्करं द्वारे भित्त्योर्द्वयोरपि ।
अन्योन्यं भिद्यते यस्मिन्नैकान्तर्यामिणि उभे ॥ ५७ ॥

वास्तु तद् विस्मेरुत्कर्षे विकल्पानिमिभाग्यकम् ।
न तत्र जायते वृद्धिः स्थापितस्य न कस्यचित् ॥ ५८ ॥

पूर्वकृती पूर्वं द्वारं सर्वदोषभयङ्करम् ।
पूर्वद्वारं तु माहेन्द्रं प्रशस्तं सर्वकामदम् ॥ ५९ ॥

गृहक्षतं तु विशीर्णं दक्षिणेन शुभावहम् ।
गन्धर्वमथवा तत्र कर्तव्यं श्रेयसे त( स )था ॥ ६० ॥

पश्चिमेन प्रशस्तं स्यात् पुष्पदन्तं जयावहम् ।
भल्लाटमुत्तरे द्वारं प्रशस्तं स्याद् गृहेशितुः ॥ ६१ ॥

एकाशीतिमिते तस्मिन्नङ्गुलमपरेऽपि वा ।
ह्रासोऽस्य(प)ञ्चगाहस्तानां शुभो बहुधनादिदः फलम् ॥ ५२ ॥
तुलाकाशीतिः षष्ठिजन्म भूत्यर्थः श्रियमा कुले ।
कोणे चाङ्गुलता      पुंसः शौर्यं स्यात् पूर्वैकत् कमलात् ॥ ५३ ॥
तुलापि(मि)तिरम्बरीचत्वे चक्रपादाङ्गुलाधिकम् ।
दीर्घं तुलामश्वसं पाश्वतः सुव्यर्थिकम्      ॥ ५४ ॥
तुलोपपीठा स्त्रियुद्धिर्दश्वतुलानवातिरत्यपार्श्वसस्कम्पत् ।
स्थानमिर्दुभासायु भयकर्तायाश उपटः समादित्यपरोऽनुलेषु ॥५५॥
चन्द्रम्यस्ताश्च      स्त्रियु द्विर्दशतुलानतिरप्या शुभसकपथा ।
तुलार्धलब्धिर्विपरीतमन्येन दोषाधिया नैर्मलस्तृतुलेषु ॥ ५६ ॥
गुणाश्च दोषाश्च यथावदेते निरूपिता द्वारसमाश्रिता ये ।
तान् विलयमिच्छन्नवधियां यदिशो निवाय पूजयत्यनुपैति लोके ॥५७॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
द्वारगुणदोषो नाम एकोनचत्वारिंशोऽध्यायः ॥

## अथ पीठमानं नाम चत्वारिंशोऽध्यायः ।

देवानां मनुजानां च पीठमानमथोच्यते ।
पीठं कनीयो मानं च सार्धमानं तु मध्यमम् ॥ १ ॥
द्विभागमुत्तमं तत् स्याद्देवा पीठसमुच्छ्रितिः ।
महेश्वरस्य विष्णोश्च ब्रह्मणश्चोत्तमं भवेत् ॥ २ ॥
इतरेषां च देवानां कनीयो नव पीठता ।
ईश्वरस्य यथाधामं पीठं कार्यं विचक्षणैः ॥ ३ ॥

समन्तात् पञ्चकिष्किमात्रो भित्तिषु दृश्यते ।
तस्मात् प्रयत्नः कर्तव्यस्तत्पक्षीभिर्निवारः ॥ १२ ॥

इति शान्तिकर्मविधानमात्मन्यनायकर्म यथाविधि शिल्पिकृतम् ।
सकलोऽपि यशो सुखमे वित्तं पुत्रपौत्रादि समृद्धे विजयः ॥ १३ ॥

इति महातन्त्रे काश्यपीयेऽंशुमद्भेदे ज्ञानरत्नभूषणाख्यशास्त्रे भवनकर्मणि
बलिविधिर्नामैकचत्वारिंशोऽध्यायः ॥

## अथ शान्तिकर्मविधिर्नाम द्विचत्वारिंशोऽध्यायः ।

हर्म्यालयशिलास्तम्भे विमर्शे शान्तिकर्मणः ।
यथाविधि द्विजपालात् कृत्वा शान्तिर्यथाक्रमम् ॥ १ ॥

स्थापयेत् कर्णिकां कुम्भैः सहितैर्गन्धवारिणा ।
सर्वगन्धानुलिप्तां च माल्यवस्त्रैर्विभूषिताम् ॥ २ ॥

कृतमाल्याभिषेकितां सूत्रे च मधुकेषिताम् ।
होमयागसमायोग तां मूर्तेषु निवापयेत् ॥ ३ ॥

मधुकुक्कुटमरीचं च शीतलं च विचारणीत् ।
सायचिन्त्या तु शिल्पिन्द्राय कुण्डपाद्यमनुत्तमम् ॥ ४ ॥

स्थापयेत् कर्णिकाः सर्वाः स्थपतिः प्रयतः शुचिः ।
एतेन विधिना कर्म चातुर्वर्ण्यस्य कारयेत् ॥ ५ ॥

कर्णिका रोपिता यत्र पुनस्तत्र रोप्यते ।
न तत्रैव वेदान् स्थापनी यावद् विनश्यति ॥ ६ ॥

स्थितानि तु यदा यत्र विनश्यति नयति पुनः ।
तदा तत्र यथाशास्त्र स्थापितमाद्य सर्वदा ॥ ७ ॥

मधूलीनिर्यातिनं द्वारं प्रवेशे चेद्विलन्यते ।
जायतेऽग्निभयं घोरं तस्मिन्नुत्पातलक्षणम् ॥ ८ ॥

उत्पाते कर्णिका रथ्या सर्वतस्त्वाभिवर्षणात् ।
मध्ये वर्मण्यसङ्कुला भूतव्यालसरीसृपाः ॥ ९ ॥

कर्णिकाग्रमधिरोहन्ति दोषांस्तत्र वदेद्भुवम् ।
कृतापीडां परिक्षुण्णां यत्रारोहन्ति वायसाः ॥ १० ॥

गृहिणामन्तत् प्रवासः स्यात्कं पाने च हीयते ।
मयूरे मधूपर्कं राजा हरेत् पञ्चाश्वतः परम् ॥ ११ ॥

वराहे जायते व्याधिः कोकिलैर्मण्डलः परम् ।
काकोलैर्जातीनि वर्षाणि जायते सुमहद् भयम् ॥ १२ ॥

शुके स्युः कलहश्चापि न च निष्पद्यते गृहम् ।
कुक्कुटेऽग्निभयं विद्यात् राजतो वा महद् भयम् ॥ १३ ॥

सारिकायां तु दौःशील्यं स्त्रीणां गृहपतेस्तथा ।
मर्कटेनैव(तु)पिञ्जेन गृहं स्थिरं न गच्छति ॥ १४ ॥

स्त्रीपुंसयोः कुलिशे तु जायते पापकारिणा ।
पारावते तु जायेते स्त्रीपुंसौ पुत्रसम्पदौ ॥ १५ ॥

बिडाले तु कुलं नाशैः सह रोगैर्निपीड्यते ।
श्वसनो वा शलं वापि हस्ती वा हन्ति तद्गृहम् ॥ १६ ॥

आरण्यैः शकुनैरेतत् स्याद् वर्षाद् वर्षेण फलम् ।
शून्यं च जायते मृत्युर्मध्यासन्न भवक्षयः ॥ १७ ॥

पुरस्तादर्धमासे भूते बालानां मरणं तथा ।
वसन्तीते निलीने तु राजा शल्यं हरेत् गृहम् ॥ १८ ॥

यथा स्थाने प्ररूढेन वृक्षः कर्णलतोऽपि वा ।
अग्निर्दहति तत् क्षिप्रं विद्युद् वा हन्ति मन्दिरम् ॥ १९ ॥

यत्रारोहति गृहस्तम्भं त्रिकाद्भिस्तत्समाचरेत् ।
कृत्वा कुशशालैः कूर्चं ततो बीजानि वापयेत् ॥ २० ॥

गायत्र्याद्य मधुक्षेत्रं शान्तिकानि च कारयेत् ।
मेघेऽग्निकूटे भूयोऽपि तत्र कुर्वीत मन्दिरम् ॥ २१ ॥

येषु येषु गृहाङ्गेषु मधुनः सञ्चयो भवेत् ।
तत्स्थानकृत्य वर्णं ब्रूयात् प्रेषितव्यो चाप्युपद्रवम् ॥ २२ ॥

गवाक्षेऽन्तोः शिखापेषु कुक्कुटाम् सन्निधापयेत् ।
यावत्र रोपयेत् सौम्यं तावद् रक्षेत् सयत्नतः ॥ २३ ॥

अभिलीनं तु वाकुनैर्नहि किञ्चित् प्रयाक्ष्यते ।
तस्मात् प्रयत्नतो रक्षेद्भुत्थानाम् प्रागुदीरितान् ॥ २४ ॥

भङ्गे गृहाणां दारूणां शान्तिहोमोऽथ कथ्यते ।
इन्द्रकीलो महाकूटः कुक्षिकोत्तरे पटी ॥ २५ ॥

पक्षद्वो    ऽलिन्दपाली वा स्वामिनं मन्त्युपद्रवाः ।
शुक्लाद्यपाल्यः    कूटं वा वेदिका कर्णपालिका ॥ २६ ॥

मेघं कपोतपालिश्च स्तम्भशीर्षं कुकुम्भिका
कन्यकाः पक्षि(क्ष)संघाश्च मञ्जकाः सकुमारकाः ॥ २७ ॥

गोपानस्यो वृगास्थम्भ स्वामिनाः स्वकुमारिका    ।
पादिका द्वारपक्षाश्च वालरं मन्त्युपद्रवाः ॥ २८ ॥

संपूर्णं सहभद्रो हन्ति शिल्पानामाचरो नरः ।
स्तोत्राणि शान्तिमोक्षो वा जन्तुरिति च पवित्रकम् ॥ २९ ॥

उद(प)श्चिमेशितीर्थं कुर्याद्यथा परिवारकान् ।
पुंसां पुत्रसमृद्ध्यैः स्त्रीणां स्त्रीन(नाम)भिर्भवेत् ॥ ३० ॥

उपघातो भवेन्नित्यं पुरुषाणां तु नपुंसकैः ।
मृत्तिका स्त्रीविनाशाय गृहनाशाय वेधनम् ॥ ३१ ॥

कीला वा सन्धिपालिर्वा लिङ्गनाशाय कुर्वति ।
दग्धे गृहे यदा दारु क्रियमाणमथो कृतम् ॥ ३२ ॥

आपोऽग्रमानं युक्तं वा न्यूनसंवत्सरं स्थितम् ।
भज्यते देहनाशाय स्फुटत्यथ विभज्यते ॥ ३३ ॥

गृहं प्राग्भवत्सरं कृत्वा रवैरालिख्य चापरम् ।
मर्मैर्मर्मैः परित्यज्य पुनर्नित्यानि कारयेत् ॥ ३४ ॥

पतिते भिन्ने प्रचलिते विनते विपुला हते ।
विद्रुते दलिते सन्धे सर्वशान्तिविधिः स्मृताः ॥ ३५ ॥

शान्तयो विविधं कृत्वा ब्राह्मणान् वसिष्ठ वाचय वा ।
स्थूणिका भज्यते यस्य कीर्तिस्तस्योपहन्यते ॥ ३६ ॥

चन्द्रसूर्यौ यजेत् तत्र ततः शाम्यति पातकम् ।
लक्षितं कुम्भमानीय पुनस्तां प्रति कारयेत् ॥ ३७ ॥

एवं कृते सुखी स स्यात् कीर्तिमायुर्भवः भवेत् ।
मण्डूको भज्यते यस्य पौरुषं तस्य हन्यते ॥ ३८ ॥

इन्द्रायभस्तवरुणं शान्तिभिर्वा समाचरेत् ।
लक्षितं कुम्भमानीय प्रति कुर्वीत मण्डूकम् ॥ ३९ ॥

एवं कृत्वा सुखी स स्यात् फलं चास्याभिवर्धते ।
षड्वर्षस्य अष्टेन गृही बन्धमवाप्नुयात् ॥ ४० ॥

राजरार्थं यजेत् तत्र प्रायश्चित्तं तथाचरेत् ।
सुखी भवति तत् कृत्वा सर्वकल्याणविवर्धते ॥ ५१ ॥
सर्वेषु जनिता गौव्यरहं ब्राह्मणाः पक्षिभक्षणीः ।
पारसो भज्यते यस्तु स्त्रीणां पुत्रं स मारुन्य( … )ते ॥ ५२ ॥
इन्द्रावरं यजेत् तत्र प्रायश्चित्तं तथाचरेत् ।
तद्विधं वृक्षमानीय पुनस्तं प्रति कारयेत् ॥ ५३ ॥
सुखी भवति कृत्वैवं पुत्रेणापि विवर्धते ।
सोमहो भज्यते यस्तु कुलक्षेत्रं स मार्य( … )ते ॥ ५४ ॥
पितृन् देवान् यजेत् तत्र प्रायश्चित्तं तथाचरेत् ।
सुखी भवति कृत्वैवं प्रीयन्ते पितरस्तथा ॥ ५५ ॥
इन्धुर्णं तु भज्यते यस्य तस्य धनं बाध्यते ।
देवानेव यजेत् तत्र प्रायश्चित्तं तथाचरेत् ॥ ५६ ॥
तद्विधं वृक्षमानीय तत् स्थापयं प्रति कारयेत् ।
सुखी भवति कृत्वैवं पुत्रेणापि विवर्धते ॥ ५७ ॥
उपधी भज्यते यस्य गन्धमासक्तो विनश्यति ।
यजेत ब्राह्मणं तत्र प्रायश्चित्तं तथाचरेत् ॥ ५८ ॥
आनीय तद्विधं वृक्षमुपधिं प्रति कारयेत् ।
एवं कृते भवेत् सौख्यमभ्यत्येव विवर्धते ॥ ५९ ॥
काष्ठस्तु भज्यते यस्य प्रेष्यस्तस्योपहन्यते ।
यक्षं तत्र यजेद् देवं प्रायश्चित्तं तथाचरेत् ॥ ६० ॥
तद्विधं काष्ठमानीय काष्ठं तं प्रति कारयेत् ।
एवं कृते सुखी स स्यात् प्रेष्यैरपि विवर्धते ॥ ६१ ॥
तुला तु भज्यते यस्य स्वपतेऽस्य कुटुम्बिनी ।
यजेत मेदिनीं तत्र प्रायश्चित्तं तथाचरेत् ॥ ६२ ॥

तद्विधं वृक्षमानीय स्थापयेत् गां स्वलङ्कृताम् ।
ततस्तदन्याः क्रियाः पश्चात् कारयेत्सुमनिमान् नरः ॥ ४३ ॥
वस्त्रमिव नवैर्वस्त्रैः प्रतिष्ठाप्य स्वलङ्कृताम् ।
ब्राह्मणान् वाचयेत् स्वस्ति ततस्तां प्रति कारयेत् ॥ ४४ ॥
सुखी भवति कृत्वैवं पौत्रैर्नित्यं विवर्धते ।
कर्णिकास्कन्धरस्थूणायस्तम्भपादोऽथ भज्यते ॥ ४५ ॥
तद्गृही दुःखमाप्नोति तस्मिन्नुत्पातलक्षणे ।
आनीय स्थपतिं तत्र प्रक्षाल्यतं चतुर्गुणम् ॥ ४६ ॥
तत्र वास्तुविभागेन यो देवः स्याद् विनिश्चितः ।
तस्मै देवाय जुहुयात् प्रायश्चित्तं च कारयेत् ॥ ४७ ॥
सुखी भवति कृत्वैवं सर्वदाभिविवर्धते ।
पूर्णं तु दृश्यते यत्र तत्र स्यात् पशुपीडनम् ॥ ४८ ॥
यजेत तस्मिन्नीकायनं प्रायश्चित्तं च कारयेत् ।
तद्विधं वृक्षमानीय पूर्णं तद् प्रति कारयेत् ॥ ४९ ॥
एवं कृते सुखं तस्य पशुवृद्धिश्च जायते ।
तुल्यो भग्नोऽपि पादो यस्य प्रभज्यते ॥ ५० ॥
आयुर्हानिर्भवेत् तत्र चलदेवं प्रपूजयेत् ।
प्रायश्चित्तं ततः कृत्वा पुनस्तं प्रति कारयेत् ॥ ५१ ॥
सुखी भवति कृत्वैवं कुटुम्बी धान्यकं च तत् ।
द्वाराङ्गं यस्य माहेन्द्रं छिद्यते नवकर्मणि ॥ ५२ ॥
इन्द्रं तत्र यजेत् देवं प्रायश्चित्तं तथाचरेत् ।
गृहक्षतस्य द्वाराङ्गे पूजयेद् यममेव तत्(म्) ॥ ५३ ॥
पुष्पदन्तस्य द्वाराङ्गे वरुणं तत्र पूजयेत् ।
द्वाराङ्गं यस्य भल्लाटं छिद्यते नवकर्मणि ॥ ५४ ॥

स्तोमं तत्र यजेद् देवं प्रायश्चित्तं समाचरेत् ।
सुखी भवति कुर्वीत कुटुम्बी सान्निकं च तत् ॥ ६५ ॥
स्थूणाराजस्य मध्यांशे वर्णः संक्लिष्टो भवेत् ।
शारीरं व्यसनं तत्र प्रतिसंवत्सरं चिरम् ॥ ६६ ॥
हृदलो दीर्घशोकः स्याद्गुरुत्वेन धनक्षयः ।
पूर्णतो राजभयः स्यात् तस्मात् तत् शस्त्र पात्यते ॥ ६७ ॥
चत्वार्यङ्गानि हिंस्यन्ते शारीरं ये च वेश्मनः ।
तुला वा इन्द्रकीलो वा धारण्यौ (णी) चोत्तराम्बरः ॥ ६८ ॥
उत्पातांस्तत्र यजेत् कुर्यात् प्रायश्चित्तं तथाचरेत् ।
एवं कृत्वे शिवं पुष्टिस्वास्थ्यवृद्धिकरं भवेत् ॥ ६९ ॥
इत्थं निमित्तानि गृहाश्रितानि
        ज्ञात्वा प्रयत्नात् प्रकुर्वीत सर्वान् ।
शान्तिं प्रकुर्वन् गृहगुप्तरूपां
        प्राप्नोति कीर्तिं सुखमर्थमायुः ॥ ७० ॥

इति महाराजाधिराजश्रीश्रीबल्लालसेनदेवविरचिते अद्भुतसागरे गृहोत्पातावर्ते वास्तुद्भुते
शान्तिकर्मविधिर्नाम द्विचत्वारिंशोऽध्यायः ॥

## अथ द्वारभङ्गफलं नाम त्रिचत्वारिंशोऽध्यायः ।

नृपस्य नगरद्वारं गेह चैत्येषु गेहेषु च ।
क्षेत्रे ग्रामे पुरे वापि नगरे पत्तने तथा ॥ १ ॥
संस्थानमाकृतिर्मानं द्वारवृद्धी च वास्तुषु ।
एतामेव विजानीयात् सर्वमेव विचक्षणः ॥ २ ॥
पूर्वस्थैव निमित्तानि द्वारकर्माणि निर्दिशेत् ।
पातं चले विजानीयात् मरणं नक्षयोग च ॥ ३ ॥

पूर्वोक्तमुपमिव कुर्याद् वारणानामपि चोच्छ्रयम् ।
अंकुरं अङ्को निर्दि( र्दि )ष्टः समन्तविश्च समापितम् ॥ ४ ॥

नवकर्मणि यत् किञ्चे सुगन्धि प्रियदर्शनम् ।
गर्भोत्तरं    मनुजानां चलनं नवशिलानिर्दिशेत् ॥ ५ ॥

पुरं वा यदि वा ग्रामो गृहं वा यदि निष्क्रमम् ।
आगारमनुकूलं नहि नाट्यौर्णेश्वरी मर्थेत् ॥ ६ ॥

परिश्वस्तोपमं कथं नवकर्मणि यत् भवेत् ।
भावं नेत्रं च शोकं च तस्मिन् वेश्मनि निर्दिशेत् ॥ ७ ॥

जनेन च यथाकीर्णं निष्क्रमणेपिब कथ( क्य )ते ।
कुड्यां गच्छ वणमासाद् नाम्न जीवेत संशयः ॥ ८ ॥

नव्यवृत्तगृहस्य पश्चात्पार्श्वं वेश्म वा यदि वा पुरम् ।
सर्वकामगुणैर्युक्तं धर्न( न्यं ) नवमितिनिर्दिशेत् ॥ ९ ॥

पूर्वां नगरभागाद्य रम्यः स्यात् प्रियदर्शनः ।
प्रियभार्या भवेत्स्वामी धनं धान्यं च भूपतेः ॥ १० ॥

पूर्वदक्षिणभागोत्थ पुरस्य प्रियदर्शनः ।
भवेद् यशस्तथाऽऽरोग्यं राज्ञा द्वेष च पुष्कलम् ॥ ११ ॥

पुरस्य दक्षिणो भागो यदा रम्यतमो भवेत् ।
राज्ञः सेनापतिनाशो विघ्नं चार्थं च पुष्कलम् ॥ १२ ॥

रमणीयो यदा भागः पुरदक्षिणपश्चिमः ।
अर्थक्षयम् तदा राज्ञः प्रजानां चिन्ता जायते ॥ १३ ॥

पुरपश्चिमभागेन रमणीयेन पार्थिवः ।
पुत्रदारधनधान्याद्यैः संग्रामेऽप्युदितो परम् ॥ १४ ॥

पश्चिमोत्तरभागो तु रमणीये नराधिपः ।
प्रेष्यैः पुत्रैर्गुणैश्च वृद्धिमेत्युत्तमोत्तमाम् ॥ १५ ॥

उत्तरे रमणीये तु पुरमाणे नरेश्वरः ।
शत्रून् विजयते सर्वान् वर्धते च पुरोहितः ॥ १६ ॥
यदि पूर्वोत्तरे भागः पुरस्य त्रिपथवर्जनः ।
पचाम्बुसरणानन्दं क्षिप्रं राज्ञो विनिर्दिशेत् ॥ १७ ॥
निष्पकस्य पुराद्येषां भवनो न स्यान्मनोरमः ।
तस्य तस्यैव भागस्य परिहाणिं विनिर्दिशेत् ॥ १८ ॥
मध्ये यदि पुरद्वारे कपाटं सन्निवेशिते ।
स्त्रीनाशमथवानर्थम् वा स्त्रीणां तद् विनिर्दिशेत् ॥ १९ ॥
देवागारे पुरद्वारे मण्डपाद्यालयेषु च ।
हस्तिशालाश्वशालासु रथशालास्व(स्व)थापि वा ॥ २० ॥
कोष्ठागारायुधागारे निमित्तं तु शुभाशुभम् ।
यदि किञ्चित् प्रदृश्येत राजकार्यविनिर्दिशेत् ॥ २१ ॥
अङ्गो यथोर्ध्वकायस्य तत्र राजा विनश्यति ।
अर्गलाद्वीपिकाकुम्भीस्कन्धे च नवकर्मणि ॥ २२ ॥
यत्र नश्यन्ति चैतानि तदा यात्रो विनश्यति ।
छि(चि)शुम्भितं तु राज्ञाणां गृहार्थेषु कुटुम्बिनाम् ॥ २३ ॥
नवकर्मणि भग्नितेषु भवने यदि वा भवेत् ।
चि(च)ले वा स्फुटे वापि कुटुम्बिमरणं ध्रुवम् ॥ २४ ॥
फलं सर्वनिमित्तेषु शुभं वा यदि वाऽशुभम् ।
संवत्सरं परं यावत् नवकर्मकृते गृहे ॥ २५ ॥
यदि संवत्सरान्ते च पुराणमिति निर्दिशेत् ।
तुम्बिका भजते यत्र नवकर्मणि निहिते ॥ २६ ॥

मेढ्रा तु मद्रिका तत्र यदूर्ध्वमर्मभिर्विनश्यति ।
पशुश्चैव गर्भं यस्य सर्वं तु विनश्यति ॥ २७ ॥

मध्यवासाद्विविश्वासात् नष्टं विनाशयति ध्रुवम् ।
दृढवंशौ गतौ यस्य मध्यमर्माणि भिद्यते ॥ २८ ॥

कुकुक्षी भिद्यते तत्र पुर्ई संवासगात् गतम् ।
प्रेष्याश्चास्य विनश्यन्ति दीर्घमर्गो विशेषतः ॥ २९ ॥

स्तम्भास्तु भिद्यमानास्तु कन्यामरणमादिशेत् ।
कुण्डकेषु भिन्नेषु सुहृदस्य विनश्यति ॥ ३० ॥

आनुपूर्व्येषु भिन्नेषु पुत्राणां मरणं ध्रुवम् ।
भित्तौ कुम्भगोपानौ माता तस्य विनश्यति ॥ ३१ ॥

नागपाशकभङ्गे तु भृत्यानां मरणं भवेत् ।
कपाटे मातृमरणमर्गलायां स्त्रिया वधः ॥ ३२ ॥

कुनिस्य पार्श्वलापार्श्वे विनष्टे मरणं भवेत् ।
द्वारबन्धे विनष्टे तु क्षीणं कुर्यात् कुलक्षयम् ॥ ३३ ॥

इन्द्रकीलो हतो यस्य अनुमापयति मूलनः ।
सपुत्रपशुवर्गस्य तस्य कुर्यात् कुलक्षतिम् ॥ ३४ ॥

तोरणं भज्यते यस्य द्रव्यं तस्य विनश्यति ।
गृहभर्तुश्च मरणं विपरीतप्रचारयेत् ॥ ३५ ॥

वास्तुमध्ये विनष्टे तु कुलवृद्धो विनश्यति ।
सोपाने भिद्यते यत्र मध्यकर्माणि भिद्यते ॥ ३६ ॥

तस्य प्रेष्याश्च गावश्च हिरण्यं च विनश्यति ।
वेदिका भज्यते यस्य भार्या तस्य विनश्यति ॥ ३७ ॥

गवाक्षस्तु विनश्येत यद्यस्तम्भोऽपि वा गृहः ।
गवाक्षकुपणाद मित्रोऽन्यः कपोतात्वथवा यथा ॥ ३८ ॥
स्वपत्नीपतिकार्येण ज्येष्ठिनार्थं नवाद्दिशेत् ।
भित्तिकूल्य तुलाया वा भङ्गे जाते फलं तथा ॥ ३९ ॥
शालास्तम्भस्य वा नाशे भार्या तस्य विनश्यति ।
स्तम्भशीर्षे यदि नश्येत् स्फुटेत स्तम्भोऽपि वा गृहः ॥ ४० ॥
कम्पते प्रतिमोक्षो वा स्वामिनस्तु वधो भवेत् ।
भङ्गे तु भयवाहिन्याः कुलक्षयो भवेत् ॥ ४१ ॥
भाण्डागारालये पुत्राः प्रतिभिन्नं कुटुम्बिनः ।
विनश्येत च विनश्यन्ति षड्भिर्मासैर्न संशयः ॥ ४२ ॥
प्रासादमण्डपे भग्ने सभासु वलभीषु च ।
भार्या कुटुम्बिनस्तस्य मासमात्रान्न संशयः ॥ ४३ ॥
प्रलीनो वा विलीनो वा प्रासादो यस्य कम्पते ।
प्रलीने मृत्युमाप्नुः स्याद् विलीने तु धनक्षयः ॥ ४४ ॥
भिन्ने विनष्टे प्रासादे हीयन्ते सर्वसम्पदः ।
मरणं वा भवेत् तत्र कुलक्षयादि च निर्दिशेत् ॥ ४५ ॥
येषु स्थानेषु भग्नो वा विभक्तिर्वा प्रकीर्तिताः ।
उपद्रुतिर्विभक्तो वा तेषां फलमपीरितम् ॥ ४६ ॥
छिद्राणि यदि दृश्यन्ते तानि दारुणि भिन्नानि च ।
धनमायुश्च हर्षं च पूर्वोक्तानां नवाद्दिशेत् ॥ ४७ ॥
कर्णिकास्तम्भयन्त्री स्थूणा शालापालोऽपि हीयते ।
यदि तत् दुःखमाप्नोति गृहभर्ता न संशयः ॥ ४८ ॥

संग्रहार्थं च मेधावी कलाभ्यसनलिप्सुकः ।
निर्विशङ्कं फलमाप्नोति धनमायुर्यशस्तथा ॥ ४९ ॥

एवमाद्युक्तविधिस्तद्वुक्तिं संग्रहार्थं मतिमान् फलान्वितम् ।
स्वस्थमात्रेणानि योऽत्र चाक्रवित् कीर्तिमित्र+च( अथ ) नानि
सोऽश्नुते

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
द्वारगुणदोषं नाम त्रिचत्वारिंशोऽध्यायः ॥

---

## अथ स्थपतिलक्षणं नाम चतुश्चत्वारिंशोऽध्यायः ।

स्थपतेर्वक्ष्यतेऽस्माभिरिदानीं यत्र लक्षणम् ।
ज्ञातेन येन ज्ञायन्ते स्थपतीनां गुणागुणाः ॥ १ ॥

शास्त्रं कर्म तथा प्रज्ञा शीलं च क्रियपाभिमानम् ।
लक्षणज्ञस्तुवक्तार्थशास्त्रविज्ञो नरो भवेत् ॥ २ ॥

सामुद्रं गणितं चैव ज्योतिषं छन्द एव च ।
सिराज्ञानं तथा शिल्पं यन्त्रकर्मविधिस्तथा ॥ ३ ॥

एतान्यङ्गानि जानीयात् वास्तुशास्त्रस्य बुद्धिमान् ।
शास्त्रानुसारेणाभ्युद्य लक्षणानि च लक्षयेत् ॥ ४ ॥

प्रसिद्धसाक्षरशास्त्रैर्वास्तुज्ञानं प्रसाधयेत् ।
वास्तुज्ञः सलिलालोकैर्मनीषिभिः सुनिश्चितैः ॥ ५ ॥

शास्त्रज्ञस्तत्त्वतात् पुनः कर्मत् जानाति शास्त्रतः ।
यस्तु शास्त्रमविज्ञाय प्रयोक्ता स्थपतिर्भवेत् ॥ ६ ॥

दृश्यते स स्वयं राज्ञा वन्ध्यवत् राजहिंसकः ।
मिथ्याज्ञानमदाहङ्कारी शास्त्रे चैवाकुलश्रमः ॥ ७ ॥

जङ्घालग्नसूत्रलोकस्य विन्यसेद् वसुधातले ।
यस्तु केवलशास्त्रज्ञः कर्मस्वपरिनिष्ठितः ॥ ८ ॥
स मुह्यति क्रियाकाले दृष्ट्वा भीरुरिवाहवम् ।
केवलं कर्म यो वेत्ति शास्त्रार्थं नाधिगच्छति ॥ ९ ॥
सोऽन्धवत्सुरिव नीयेत विन्यसोऽन्धेन वर्त्मसु ।
कर्म वास्तुविदः स्थाने मामजुप्याममेव च ॥ १० ॥
शोभनानि(नि) च कर्माणि कुमतेरुत्व(म)मुर्दैना ।
तस्मात्(त्तु) यो गणितशास्त्रबोधात् कृतकर्मेषु समस्तु ॥ ११ ॥
सुखितं गणितस्थानैरध्योत्तरसंयुतम् ।
शास्त्रैस्तान्वितं युक्तं यो जानाति स कर्मवित् ॥ १२ ॥
शास्त्रकर्मसमर्थोऽपि स्थपतिः प्रज्ञया विना ।
काष्ठेषु कर्मभिस्त्यागिनः      स्याद्भिर्वेन इव द्विपः ॥ १३ ॥
सम्पूर्णप्रज्ञानिर्यैः स्यात् चाहम(कः) स्थपतिसत्तमः ।
कर्मकाले न मुह्येत् स प्रज्ञालेनोपबृंहितः ॥ १४ ॥
अप्रमेयं दुरालोकं शास्त्रार्थं बहुविस्तरम् ।
प्रज्ञायोगं समासाद्य प्राज्ञो वास्तुविदं      नयेत् ॥ १५ ॥
ज्ञानवांश्च तथा वाग्मी कर्मस्वपि च निष्ठितः ।
एवं युक्तोऽपि न श्रेयान् यदि शीलविवर्जितः ॥ १६ ॥
रोषात् द्वेषात् तथा लोभान्मोहम् रागात् तथैव च ।
अन्यथाचिन्त्यमायाति दुःशीलानामविकल्पात्      ॥ १७ ॥
शीलवान् पूजितो लोके शीलवान् साधुसम्मतः ।
शीलवान् सर्वकार्यार्हः शीलवान् प्रियदर्शनः ॥ १८ ॥
शीलस्थाने परं यत्नमाधि(ति)ष्ठेत् स्थपतिः सदा ।
ततः कर्माणि सिध्यन्ति जनयन्ति सुखानि च ॥ १९ ॥

तथाग्न्यायविधं कर्म ज्ञेयं स्थपतिना सदा ।
आलेख्यं छेद्यकार्यं च दारुकर्म यथातथा ॥ २० ॥

पाषाणमिष्टकेषां च शिल्पं कर्म तथैव च ।
एभिर्गुणैः समायुक्तः स्थपतिर्याति पूज्यताम् ॥ २१ ॥

स्थापत्यमष्टविधमस्तमिरीर्षमनुविधं वेत्ति विशुद्धबुद्धिः ।
स शिल्पिनां संसदि लब्धपूजः परां प्रतिष्ठां लभते चिरायुः ॥२२

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
स्थपतिलक्षणं नाम चतुश्चत्वारिंशोऽध्यायः ॥

## अथ अष्टाङ्गलक्षणं नाम पञ्चचत्वारिंशोऽध्यायः ।

प्रोक्तं चतुर्धा स्थापत्यं वास्तुनस्तस्य सिद्धये ।
मूलत्वेन चैतानीभिः संयुक्तमष्टभिः ॥ १ ॥

तेष्वङ्गं प्रथमं प्रोक्तं वास्तुपुंसो विकल्पना ।
पुरस्य विनिवेशस्तु द्वितीयं द्वारकर्म च ॥ २ ॥

रथ्याविभागः प्राकारविनिवेशोऽट्टालकस्य च ।
विनिवेशः प्रतोलीनां विभागस्थानकानि च ॥ ३ ॥

प्रासादश्च तृतीयं स्याच्चतुर्थं तु ध्वजोच्छ्रितिः ।
पञ्चमं नृपतेर्वेश्म स्यान्नागरशिल्पिनां च ॥ ४ ॥

चातुर्वर्ण्यविभागश्च गृहभागश्च षष्ठकम् ।
सप्तमं पञ्चभागस्य शालाग्रां मानमीरितम् ॥ ५ ॥

पञ्चवेदीप्रमाणं च कोष्ठिकोसविधिस्तथा ।
अष्टमं राजशिविरनिवेशो दुर्गकर्म च ॥ ६ ॥

यो वेत्त्यङ्गान्यमून्यष्टौ सोऽत्र स्थपतिरुत्तमः ।
यशो माने स लभते पूज्यते च नराधिपैः ॥ ७ ॥
अज्ञाताङ्गकर्माणं स्थपतिं यः प्रयोजयेत् ।
न तस्य वास्तु सिध्येत सिद्धमप्यसुखावहम् ॥ ८ ॥
तस्मात् कर्म च शास्त्रं च यो वेत्ति द्वितयं नरः ।
अष्टाङ्गमपि यो वेत्ति स राज्ञः स्थपतिर्भवेत् ॥ ९ ॥
अङ्गानि पूर्वमुक्तानि वास्तुशास्त्रोक्तविस्तरात् ।
तेषु मानादिकं यद् यद् वक्ष्यामोऽथ सविस्तरम् ॥ १० ॥
अथाद्वर्गं समर्थं भूमौ यत् तत् पदेषु युज्यते ।
निर्मिते च पुरे पूर्वं वास्तुषु सुरधामसु ॥ ११ ॥
दिशि दक्षिणपूर्वस्यां यज्ञार्थं मापयेत् शुभम् ।
निवेशं तत्र कुर्वीत चतुरश्रं समन्ततः ॥ १२ ॥
आयामेन विशालत्वे हस्तत्र्यर्धशताधिकः ।
पूर्वद्वारं विशालत्वमाविशन्त्य यजेद् बुधैः ॥ १३ ॥
तस्य पश्चिमभागे तु यजमानकुटी भवेत् ।
षोडशायामविस्तारा प्राक्कुटी सा प्रकल्पते ॥ १४ ॥
यजमानकुटीद्वारे देवता या च कीर्तिता ।
ततः पशूनि पूर्वेण प्राग्वंशो परिकल्पयेत् ॥ १५ ॥
वेदिमध्ये स्थितं तत् स्यात् प्राग्वंशं वेद्यास्तु शस्यते ।
पूर्वापरेण चतुर्विंशत् कर्तव्याः प्रक्रमा बुधैः ॥ १६ ॥
षट्त्रिंशत् कुटीभागो मध्येऽङ्गुलका कल्पयेत् ।
प्रक्रमाः स्युः शिरःस्थाने विंशतिश्चतुरुत्तरा ॥ १७ ॥
शुल्कस्य चिरस्थान प्राग्वंशो तु प्रतिष्ठितम् ।
तस्मात् पूर्वोत्तरं ज्ञेयं सर्वयज्ञेषु पूजितम् ॥ १८ ॥

वैयमलं तु कर्तव्यं वास्तवं येन गच्छति ।
नक्षत्रानुगतस्तेषां वा कार्या सम्मुखेन तु ॥ १९ ॥
द्विरष्टछायासमितास्ते होमवेद्यः कृतोऽन्य हि ।
शान्तिक्रियेण संस्कार्यं पञ्चगव्यस्य वास्तुनो ॥ २० ॥
कर्तव्यं सदा कार्यं मासिकानन्तरमपि वा ।
स्तोऽर्चनीयेन दुर्भिक्षभयमाधिका जायते ॥ २१ ॥
एवं यज्ञक्रिया प्रोक्ता कोटिहोमोऽत्र कथ्यते ।
पुरस्याभ्यन्तरे भागे कुण्डानस्य कृते तथा ॥ २२ ॥
तस्मिन् स्थाने विधातव्यः कोटिहोमः सदा पुरे ।
लक्षहोमश्च कर्तव्यो नित्यो नैमित्तिकोऽपि वा ॥ २३ ॥
अथ भूमिं समासाद्य स्थानं कदाचिदेव लभ्यते ।
सर्वतो ब्राह्मणः स्नानाद्धोमस्थानं निवेशयेत् ॥ २४ ॥
देवालयं द्विजावासमिष्ट्वा शास्त्रैर्वेदपारगैः ।
पुरस्याग्नेयदिग्भागे बहुकर्मनिरतैः सदा ॥ २५ ॥
नित्यं यज्ञपरैर्विप्रै राजा तु विजयी भवेत् ।
नोपसर्गास्तु जायन्ते न च शत्रवः पुरं व्रजेत् ॥ २६ ॥
अनावृष्टिभयं नास्ति सुभिक्षं जायते सदा ।
उक्तं यात्रिकमङ्गं तु सम्यक् शिल्पिभिः प्रकाश्यते ॥ २७ ॥
सर्वं स्थपतिना ज्ञेयं नक्षत्रैर्वास्तुभिः सह ।
एकाशीतिपदैश्चैव वास्तुभूमिं तु भावयेत् ॥ २८ ॥
विशेषं शिबिरस्थाने कथयामोऽनुपूर्वशः ।
यदा तु नृपतिः स्थानात् स्थानं यात्राभिमुखो भवेत् ॥ २९
शिबिरस्य निवेशं च तत्त्ववेत्ता परीक्षयेत् ।
सर्वकार्यविधिज्ञो वा स्थपतिर्वा प्रकल्पयेत् ॥ ३० ॥

शिबिरं चतुरश्रं स्याद् वृत्तं वृत्तायतं क्वचित् ।
चतुरश्रायतं वापि विषमं वा क्वचिद् भवेत् ॥ ३१ ॥
भूमिभागवशात् कल्प्य(ल्प्यं)मथारभ्यो यथाभिमतम् ।
शिबिरस्य तु चत्वारि कुर्याद् द्वाराणि यत्नतः ॥ ३२ ॥
रथ्या सार्धा तु सेनायाः पुरस्याश्वप्रमाणतः ।
शिवे स्थाने मरुत्तेः कार्यं पृथ्वीधरेऽपि वा ॥ ३३ ॥
आर्यम्णे वा विधातव्यं पदे वैवस्वतो(ते)ऽथवा ।
निवेशो मन्त्रिणां कार्यः पश्चिमो(मे) राजवेश्मनः ॥ ३४ ॥
पुरोहितस्योत्तरतो बलाध्यक्षस्य पूर्वतः ।
अन्तःपुरं दक्षिणतो भाण्डागारं तथैव च ॥ ३५ ॥
गृहं प्रविशतो राज्ञो न्यस्येद् दक्षिणतो द्विपान् ।
वामे च दन्तिनो न्यस्येदेवं सैन्यं निवेशयेत् ॥ ३६ ॥
चापमानः परिखां तस्य कारयेद् राजवेश्मनः ।
हस्तांस्त्रींश्चतुरो वापि पञ्चहस्तानथापि वा ॥ ३७ ॥
चतुष्षष्टिपदाख्येन विभाज्यं शिबिरं बुधैः ।
निवेशः शिबिरस्योक्तो दुर्गकर्माथ कथ्यते ॥ ३८ ॥
दुर्गं तु षड्विधं प्रोक्तं राज्ञां तु विजिगीषताम् ।
अब्दुर्गं पङ्कदुर्गं वा वनदुर्गैरिणे तथा ॥ ३९ ॥
पार्वतीयं महादुर्गमिति कल्प्यानि पार्थिवैः ।
सर्वेषामेव दुर्गाणां पार्वतीयं प्रशस्यते ॥ ४० ॥
दुर्गस्थानविभागोऽत्र षोडशाख्येन कीर्तितः ।
मध्ये तु ब्रह्मणः स्थानमसत्स्थाप्यं विधीयते ॥ ४१ ॥

प्राकारस्यान्तं समारभ्य हर्म्यं यावदथायाः स्मृताः ।
अपरस्या विहृता तु योधास्तु त्रिधापाः स्मृताः ॥ ४२ ॥

सन्निकृष्टा विचालश्चा दुर्गा(र्गे) रथ्या समन्ततः ।
द्वारं रथ्याप्रमाणेन कार्यं नालीकयन्त्रकान्वितम् ॥ ४३ ॥

परचक्रसमं (मर्दं)नार्थं सुरक्षं तत् सदा भवेत् ।
दुर्गेश्वरगृहस्थाने प्रधानः पत्तिनो भवेत् ॥ ४४ ॥

वैवस्वतेऽथवार्यम्णे मैत्रे पुष्पदन्तेऽपि वा ।
यथा पुरे पुरा प्रोक्तं स्थानं दुर्गेऽपि तत् तथा ॥ ४५ ॥

वीराः शूराः कुलीनाश्च भूमिपालस्य संमताः ।
धनुर्वेदविधिज्ञाश्च कुलीनाः शास्त्रपारगाः ॥ ४६ ॥

दुर्गे स्थाप्याः सुरूपाश्च महेच्छा वरस्त्रियः ।
अन्तःपुरं च कोशो च कुमारांश्चात्र वासयेत् ॥ ४७ ॥

एवं दुर्गविधानस्य समासोऽयमुदाहृतः ।
इत्यत्राङ्गो वास्तुशास्त्रस्य सारः संक्षेपेण स्पष्टमस्माभिरुक्तः ।
यत्र ज्ञाते शिल्पिवद् वास्तुविद्यापाथोनाथं सन्तरन्त्यप्रयासात्
॥ ४.

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे

शहाङ्गुलकर्म नाम पञ्चचत्वारिंशोऽध्यायः ॥

## अथ तोरणभङ्गादिशान्तिको नाम षट्चत्वारिंशोऽध्यायः ।

पुरातनं नवं चापि दुर्गे वाथार्थनिर्मितम् ।
देवानां द्वाराणां च तोरणं निपतेद् यदि ॥ १ ॥

भज्यते दह्यते वाथ नमते सज्यतेऽथवा ।
यद्यशनिप्रपातोल्काद्यैर्वा हन्यते तद् कथयामि ॥ २ ॥
तत्र दोषान् प्रवक्ष्यामो दोषप्रशमनानि च ।
तोरणं निपतेत् सर्वं शिरो वास्य कथञ्चन ॥ ३ ॥
राज्ञां सेनापतीनां च प्रतीहारपुरोधसाम् ।
प्रधानाश्वगजानां च विपत्तिरभयस्य च ॥ ४ ॥
तत्र मृत्युभयं विद्याद् दुर्भिक्षं चापि निर्दिशेत् ।
तस्मात् प्रशमहेत्वर्थं विधिं कुर्यादिमं बुधः ॥ ५ ॥
शान्तिवारिमार्जनैर्धीरः स्थपतिः सपुरोहितैः ।
रात्रौ होमबलिं कुर्यान्नगरे तु चतुर्दिशम् ॥ ६ ॥
कर्णिकाम्बरशृङ्गाटेष्वथ नीराजनेऽहनि ।
स्थानेष्वेतेषु विप्राद्यैर्बलिं निष्पाद्य साधनात् ॥ ७ ॥
कलशैर्धूपगन्धैश्च श्वेतमाल्याम्बरैर्युतम् ।
ततो होमं प्रकुर्वीत शान्तिकं बलिमेव च ॥ ८ ॥
एवं प्रशमयेत् सर्वं यत्किञ्चिद् दुरितोत्थितम् ।
तोरणं भज्यते चेत् तद्राष्ट्रभङ्गं विनिर्दिशेत् ॥ ९ ॥
अस्य प्रशमहेत्वर्थं पूर्वोक्तं कारयेद् विधिम् ।
तदेवैकं प्रदग्धेन तोरणे नगरे षे(च)क्षि ॥ १० ॥
तदा वह्निभयं ब्रूयात् राष्ट्रस्य नगरस्य च ।
स्वाद्याभ्यन्तरं विप्रैर्विधिमिमं प्रयोजयेत् ॥ ११ ॥
नते च शीर्णभग्ने वा व्याधिपीडां विनिर्दिशेत् ।
होमं बलिं च कुर्वीत पुनःसंस्कारमस्य च ॥ १२ ॥
वातेन विधुना वापि तोरणं यदि भज्यते ।
तस्मिन् रोगाः प्रवर्तन्ते कुक्षिकामलकक्षयाः ॥ १३ ॥

शान्तिकर्म प्रकुर्वीत ततः शान्तिकरं जपम् ।
एवमादौ कृते पश्चात् पुनः संस्कारयेद् बुधः ॥ १४ ॥

पूर्वाध्यायनिर्माणाद् विशिष्टं रचयेत् पुनः ।
दृढसन्धिनिरूढं च दृढद्रव्यसमन्वितम् ॥ १५ ॥

विचित्रं रूपकर्माढ्यं सुसंस्थानं मनोरमम् ।
बाहुल्यमधिकं चैव पूर्वोक्तादुन्नतं तथा ॥ १६ ॥

विपुले तु पुनः शान्तिं ब्राह्मणान् वाचयेत् ततः ।
पुराणे वा नवे वाथ कृते चार्धकृतेऽथवा ॥ १७ ॥

प्रासादे वा गृहे वापि कपोतः प्रविशेद् यदि ।
तत्र दोषाः प्रवक्ष्यन्ते शान्तिकर्म तथैव च ॥ १८ ॥

कालमूर्तिः कपोतश्च पापमूलकरस्तथा ।
विद्युत्पताको दीनः कृष्णपादो विजिह्मगः ॥ १९ ॥

चतुर्विधः समाख्यातो मुनिभिः स तपोधनैः ।
श्वेतो विचित्रकण्ठश्च चित्रितोऽन्योऽपि कृष्णकः ॥ २० ॥

कपोतो भवने यस्य श्वेतवर्णो विशेत् क्वचित् ।
कीर्तिविध्वंसनं पुण्यं क्षीणं च जायते भयम् ॥ २१ ॥

नित्यं रोगाः प्रवर्धन्ते शिशुपीडा च जायते ।
चित्रकण्ठो हरेद्भार्यां पुत्रान् सर्वान् विचित्रकः ॥ २२ ॥

सर्वाः श्रियश्च कृष्णाङ्गः प्रभुत्वं च कुलं हरेत् ।
रोगाः सर्वेऽपि वर्धन्ते विपदो व्यसनानि च ॥ २३ ॥

बन्धनानि च जायन्ते प्रविष्टे तु कपोतके ।
तस्माद् यत्नपरो भूत्वा प्रायश्चित्तं समाचरेत् ॥ २४ ॥

स्नानत्रिकालशुद्धात्मा सोपवासो जितेन्द्रियः ।
देवपूजार्चनरतो नित्यं ध्यानपरः शुचिः ॥ २५ ॥

पञ्चगव्याशनो मौनी च नित्यं होमपरायणः ।
गुरुविप्ररतश्चैव श्वेतमाल्याम्बरस्तथा ॥ २६ ॥
षष्ठी सप्ताहिणीकस्तु ध्यानमेतत् समाचरेत् ।
श्वेतके पञ्चरत्नं च निम्बकुण्डे ददीत तत् ॥ २७ ॥
निम्बे पञ्चपल्लवानि कुम्भे विन्यस्य वैदिकैः ।
मालत्येन तु कर्तव्यमभिषेकं मनोरमम् ॥ २८ ॥
यथालाभं समादाय तत्र देवं सविष्णुकम् ।
निकुम्भेन् ... विभागाद्दर्शनानि तत्र ॥ २९ ॥
सुगन्धपुष्पाणि सुगन्धीनि मधुलाजान्वितानि च ।
पञ्चकलशसंयोगेन शान्तिकार्ये कुलोद्भवैः ॥ ३० ॥
ततश्च घोरं ... मन्त्रवित् ।
हुते कलशे ततः क्षीरं दधिमध्वाज्ययुतैश्च च ॥ ३१ ॥
संपूजयेत् ब्राह्मणान् सर्वान् ब्राह्मणान् वाचयेत् ततः ।
स्वस्तिवाचनं श्वेते तु विप्रेभ्यः प्रतिपादयेत् ॥ ३२ ॥
शिलायं निम्बकण्ठे तु पायोर्थं सर्वनिम्बके ।
कुण्डे सर्वसमस्तानां कर्तव्यो ब्राह्मणात् गुरुः ॥ ३३ ॥
एवं शान्तिर्भवेद् गेहे सर्वदोषक्षयावहा ।
सद्यो निवृत्तिमाप्नोति मङ्गलाश्च जायते ॥ ३४ ॥
पुत्रान् पौत्रान् धनं ... आयुर्दीर्घं प्राप्नुयात् संपदास्तथा ।
एतत् कृत्वा मुच्यते सर्वपापैः ... श्रीमान् ... ॥ ३५ ॥

इति महामहोपाध्याय... विरचिते ...
गोधामधुकपोतप्रवेशादौ शान्तिर्नाम षट्चत्वारिंशोऽध्यायः ॥

## अथ वेदीलक्षणं नाम सप्तचत्वारिंशोऽध्यायः ।

वेद्यश्चतस्रो विज्ञेया या पुरा ब्रह्मणोदिताः ।
रूपं तासां संप्रवक्ष्यामो नामसंस्थानमानतः ॥ १ ॥

प्रथमा चतुरश्रा स्यात् सर्वभद्रा च द्वितीयका ।
तृतीया श्रीधरी नाम चतुर्थी पद्मिनी स्मृता ॥ २ ॥

यज्ञकाले तथोद्वाहे देवतास्थापनेषु च ।
नीराजनेषु सर्वेषु वह्निहोमे च नित्यशः ॥ ३ ॥

नृपाभिषेचने चैव शक्रध्वजनिवेशने ।
उपयोग्या भवन्त्येता वर्णानामनुपूर्वशः ॥ ४ ॥

चतुरश्रा तु या वेदिः सप्तहस्ता समन्ततः ।
अष्टहस्ता प्रमाणेन सर्वभद्रा प्रकीर्तिता ॥ ५ ॥

श्रीधरी सप्त विज्ञेया हस्तान् मानेन वेदिका ।
पद्मिनी चैव शास्त्रज्ञैर्नवभिरिह विधीयते ॥ ६ ॥

चतुरश्रा तु कर्तव्या चतुरश्रा समन्ततः ।
भद्रैस्तु सर्वतोभद्रा भूषणीया चतुर्दिशम् ॥ ७ ॥

श्रीधरी चापि विज्ञेया कोणविंशतिसंयुता ।
पद्मिनीति च विज्ञेया पद्मसंस्थानधारिणी ॥ ८ ॥

कर्तव्याः सप्तविस्तारादुच्छ्रयेण त्रिभागिकाः ।
कुर्याद्व्यङ्गुलकीलिता इष्टकाभिस्तु चाय(चि)ताः ॥ ९ ॥

चतुरश्रा यज्ञकाले विवाहे श्रीधरी स्मृता ।
देवतास्थापने वेदीं सर्वभद्रां निवेशयेत् ॥ १० ॥

नीराजने शान्तिकार्ये तथा राज्याभिषेचने ।
वेदी पद्मवती या च तथा शक्रध्वजोच्छ्रये ॥ ११ ॥

चतुर्भुजा तु कर्तव्या सोपानैश्च चतुर्दिशम् ।
पत्नीहारसमायुक्ता पार्श्वचन्द्रोपशोभिता ॥ १२ ॥
चतुःस्तम्भसमायुक्ता चतुष्कुम्भविराजिता ।
काञ्चनै राजतैस्ताम्रैर्वस्त्रैः कदलीस्तम्भकैः ॥ १३ ॥
कोणे कोणे तु विन्यस्तैर्वलयाकारसूचिभिः ।
स्तम्भस्थापनं वेदीनां कार्यं काचकेन च ॥ १४ ॥
एकेन द्वित्रिभिर्वापि कलशैः सामलसारिकैः ।
स्तम्भमूलानि चारुचन्द्र पुष्पेण मधुसर्पिषा ॥ १५ ॥
परमान्नेन चान्येन नानं विन्यसेद् यथाक्रमम् ।
ईशानः पूजयित्वा तु आवाहन् स्वस्ति वाचयेत् ॥ १६ ॥
चतुर्विधविनीरितं यदिह वेदिकालक्षणं
ममाप्यपि कर्ते मनसि यस्य नचिन्तितः ।
स याति भुवि पुत्रदारधनभोगसौख्यानि च
चिरं स्वयमिदं मपि स्फुरति चास्य शुभं यशः ॥ १७ ॥

इति महाकालसंहितायां श्रीवेदीविनिर्मितौ ... कालिकाख्याने
वेदीलक्षणं नाम सप्तचत्वारिंशोऽध्यायः ।

# अथ गृहदोषनिरूपणं नामाष्टचत्वारिंशोऽध्यायः ।

अतः परं गृहादीनामग्रतास्तम्भशुद्धिकम् ।
लिख्यते कथितं यत्नात् सुलभं भवेत् ॥ १ ॥
रक्षोऽम्बुनाकलीनाद्यास्वकक्ष्यस्य चित्रकृता ।
मध्यवृद्धा च सूर्याभिवादिसिमरकाष्ठका ॥ २ ॥
वह्निवृद्धा वह्निदिशये नृपये दक्षिणवृद्धा ।
कुबेरे रक्षःवृद्धा ग्रामपदवृद्धा चामण्यवसंबिन्दे ॥ ३ ॥

कलहाय प्रवासाय रोगाय च मध्यकृशा ।
मध्यदृढा तु भूमिर्या सर्वनाशाय सा भवेत् ॥ ४ ॥
तुषास्थिकेशाकीर्णच(क)शल्यभस्मोपलान्विताम् ।
कर्करादिमेषां दुःखसन्तापफलदां त्यजेत् ॥ ५ ॥
चैत्रे शोककरं वेश्म ज्येष्ठे मृत्युप्रदायकम् ।
पशुनाशाय चाषाढे शून्यं भाद्रपदे शुभम् ॥ ६ ॥
आश्विने कलहाय स्यात् कार्तिके भृत्यनाशनम् ।
माघे चाग्निभयाय स्यात् मासेष्वेषु न कारयेत् ॥ ७ ॥
पावकस्य पदे दुष्कर्मवाप्यापि च पश्चिमे ।
पुरमासायकर्णे च कीलानि यदि प्रयोजयेत् ॥ ८ ॥
पूर्वपश्चिमदिङ्मूढं वास्तु क्षीणायकृद् भवेत् ।
उदङ्मूढं न निष्पत्तिं याति सर्वं च नाशयेत् ॥ ९ ॥
यत्तु दक्षिणदिङ्मूढं जायते मरणाय तत् ।
सौम्यवास्तुनि (तु) कुर्वीत प्रासादं मन्दिरं पुरे ॥ १० ॥
वलितं चलितं भ्रान्तं विसूत्रं च समुत्सृजेत् ।
यत् स्यान्मुखभित्तिविभ्रान्तं वलितं तत् प्रकीर्तितम् ॥ ११ ॥
चलितं पृथग्दिग्भ्रान्तं दिङ्मूढं भ्रान्तमुच्यते ।
विसूत्रं कर्महीनं स्यात् फलमेषां प्रचक्ष्महे ॥ १२ ॥
वलिते चलति स्थानं चलिते विग्रहो भवेत् ।
भ्रान्ते पोषितृविनाशाय विसूत्रे भूरिव्याकुलम् ॥ १३ ॥
मूषकोत्करवल्मीकखात्या यत्र शुभप्रदम् ।
शिला भित्ति विकर्णा च न वास्तुनि शुभा क्षितिः ॥ १४ ॥
मूषकोत्करमर्थं हन्ति वल्मीकिनी सुतम् ।
विकर्णा कुरुते कर्णरोगं शिला शिलाशिनी ।
भित्ता भेदं करोत्युर्वी कुटिला मलिनकारणम् ॥ १५ ॥

सपार्श्वं सन्निधाने वा सार्धं द्विगुणमेव च ।
यत् स्यात्कूर्मपृष्ठं वेश्म तदनिष्टफलप्रदम् ॥ १६ ॥
यद् द्विशालं त्रिशालं वा चतुःशालमथापि वा ।
शून्यया रहितं वेश्म तदनिष्टफलप्रदम् ॥ १७ ॥
पुरतः पृष्ठतः पार्श्वे यदि चालिन्दवर्जिता ।
गृहे न शस्यते शाला देवागारे तु शस्यते ॥ १८ ॥
अन्यगृहाश्रितद्वारं वेश्म पापकमुच्यते ।
परस्परविरोधाय तद् वेश्म गृहिणोस्तयोः ॥ १९ ॥
समाप्त्यं पादहीनं च सफलमपि शिरोगुरु ।
वेश्मवास्तिवशुद्धिश्च सर्वदोषचतुष्टयम् ॥ २० ॥
वास्तुवेधस्य यत्राङ्गे यस्य वर्णं प्रवर्तते ।
तदङ्गे वास्तुनस्तस्य विद्धं वेधेति निर्दिशेत् ॥ २१ ॥
विद्धाङ्गे विकलं तत् स्याद् वीक्षितं सर्वदोषकृत् ।
तदङ्गुसंकलीभूते तद् वेधस्त्याज्यकोऽन्यथा ॥ २२ ॥
स्वगृहद्वयमध्येन निर्वाहो यदि वर्त्मनः ।
द्वारवेधोदितान् दोषांस्तदा प्राप्नोति निश्चितम् ॥ २३ ॥
मार्गवेधो यदा गच्छेदुभयोर्गृहपार्श्वयोः ।
मार्गवेधस्तदा स स्याच्छोकसन्तापकारकः ॥ २४ ॥
उत्सङ्गः पूर्णबाहुश्च हीनबाहुस्तथापरः ।
प्रत्यक्षाय इति प्रोक्तं प्रवेशानां चतुष्टयम् ॥ २५ ॥
गृहस्य सम्मुखं यत्र द्वारं भवति वास्तुनः ।
उत्सङ्ग इति स प्रोक्तः पूर्णबाहुः प्रदक्षिणः ॥ २६ ॥
वामतो हीनबाहुः स्यात् प्रत्यक्षो वा(को य)स्तु पृष्ठतः ।
चतुर्थो ऽयं समुद्दिष्टः प्रवेशो वास्तुनो बुधैः ॥ २७ ॥

उदक्स्रवाख्ये प्रवेशो स्यात् प्रजाहानिः कुटुम्बिनाम् ।
प्रभवान्यवप्लवो वास्य मरणं वा ध्रुवं भवेत् ॥ २८ ॥
पूर्वेशाद्यैः पुरःशाला प्रभवान्यवप्लुतानि च ।
भवन्ति वसतो नित्यं सुखितास्तत्र वास्तुनि ॥ २९ ॥
अल्पवित्तो यदि ह्रीनप्राक्प्लवप्रत्यक्प्लवान्वयः ।
स्याद् वास्तवित्तो जीवेत् स्त्रीभिः पीडयेत वान्धवैः ॥ ३० ॥
प्राग्प्लवाख्य प्रवेशस्तु विहितो यत्र वेश्मनि ।
तस्मिन् निवसतां पुंसां निर्धनः स्याद् धनक्षयः ॥ ३१ ॥
पृष्ठस्थवध्यानमुखास्तु शालाभेद इति स्मृतः ।
प्राप्नोति तत्र निवसन् मृत्युं दुःखं सरोगताम् ॥ ३२ ॥
उदग्दक्षिणशालासु पूर्वपश्चिमगासु च ।
अन्यथा वा स्थितं द्वारं धनधान्यक्षयकारकम् ॥ ३३ ॥
सुखागमान् प्रमाणं कुर्याद् शालां प्रतिषेधयेत् ।
प्रागुदक्प्रत्यक् शालासु विपर्यासे कुटुम्बिनः ॥ ३४ ॥
शालाभेदो भवेद् यत्र पृष्ठतः पार्श्वतोऽपि वा ।
धनधान्यक्षयस्तत्र स्त्रियो जायते ध्रुवम् ॥ ३५ ॥
यत्र मध्यमकुले चान्ये गृहं तत् स्याद् विकोणिकम् ।
आयुर्धनक्षयं धान्यं वसतां तत्र नश्यति ॥ ३६ ॥
सीमाशालावर्जितस्य प्रासादस्य गृहस्य च ।
अकिञ्चना जायते भर्तुः स्थितिश्च न भवेच्चिरम् ॥ ३७ ॥
सर्वतोभद्रके ज्ञेया गर्भे चन्द्रावलोकिता ।
सूर्या स्थिता निरालोका कार्मोक्तिकस्यै गवाक्षकः ॥ ३८ ॥
यथा गवाक्षोऽन्यथा कुक्षिः पृष्ठे कथाय क्रियते ।
वाधयं जायते मर्तुसर्वाभीष्टसुखक्षयम् ॥ ३९ ॥

गर्भांशुभयतो गच्छेत् कक्षे स्तम्भः कर्णभित्तिगो ।
दक्षिणोत्तरयोः कुक्षौ मध्यमः पृष्ठमाश्रयेत् ॥ ४० ॥

स्याच्छिद्रद्वारसंरोधे गृहिणो आपदेऽहनी ।
द्वारे तु विहिते नाभिमर्मणि तस्य जायते ॥ ४१ ॥

पूर्वद्वारनिरोधे तु मध्यमार्गे कदाचन ।
स्रोतरोधेऽग्रमीदोषः कुलभोगक्षयस्तथा ॥ ४२ ॥

कूलानि यत्र वीयन्ते गवाक्षालोकनानि च ।
तत्र प्रसूतिनं भवेत्सिप्रकाणि विनश्यन्ति ॥ ४३ ॥

वीयमाना यदा भित्तिर्दक्षिणा स्याद् बहिर्मुखी ।
तदा व्याधिभयं विद्यान्नृपदण्डभयं तथा ॥ ४४ ॥

यदा तु पश्चिमं कुड्यं प्रयाति बहिरन्ततः ।
धनहानिं विजानीयाच्चौरेभ्यश्च भयं तथा ॥ ४५ ॥

उत्तरं तु यदा कुड्यं वीयमानं बहिर्व्रजेत् ।
गृहभर्तुश्च कर्तुश्च व्यसनं स्यात् तदा महत् ॥ ४६ ॥

यदायं वीयमानायाः पूर्वभित्तिर्बहिर्व्रजेत् ।
तदा गृहपतेस्तीव्रं राजदण्डभयं भवेत् ॥ ४७ ॥

प्राग्दक्षिणे यदा कर्णो वीयमानो बहिर्व्रजेत् ।
तदाग्निभीतिरतुला संतापश्च प्रभोर्भवेत् ॥ ४८ ॥

बहिर्मुखो यदा गच्छेत् कर्णो दक्षिणपश्चिमः ।
कलहोपद्रवस्तत्र स्यात् भार्यायाश्च संतापः ॥ ४९ ॥

पश्चोत्तरापरः कर्णो वीयमानो व्रजेद् बहिः ।
पुत्रदारधनस्थानां भवेत् तस्मिन्नुपद्रवः ॥ ५० ॥

यदा प्रागुत्तरः कर्णो बहिर्निष्क्रामति वेश्मनः ।
तदा गवां वृषाणां च पुरुषाणां च क्षयो भवेत् ॥ ५१ ॥

वारुणो भित्तयो यस्य बहिर्निर्याति वेश्मनः ।
वीयमानालयजोर्कं मन्दिरं वह्निकाकृति ॥ ५२ ॥

तादृग् गृहे न सन्तापो व्ययो भवति यादृशः ।
कर्णिनोऽप्येव दोषेण तस्य भर्ता प्रजायते ॥ ५३ ॥

संक्षिप्यते तु यद् वेश्म क्षीयमाणे समन्ततः ।
संक्षिप्तमिति तज्ज्ञेयं तत्र राजभयं भवेत् ॥ ५४ ॥

यत् स्यादग्रेषु संक्षिप्तं विस्तृतं चापि मध्यतः ।
मृदङ्गाकृतिसंस्थानं तत्र व्याधिभयं भवेत् ॥ ५५ ॥

आद्यन्तविस्तृतं यत् स्यात् संक्षिप्तं चापि मध्यतः ।
वज्रमध्यं तदुद्दिष्टं क्षुद्भयं तत्र जायते ॥ ५६ ॥

विषमैकर्णैः कर्णैर्यवनवक्त्रं गृहम् ।
भित्तिष्वपि कर्णेषु मातृकं फलमादिशेत् ॥ ५७ ॥

मध्ये द्वारं न कर्तव्यं मनुजानां कदाचन ।
मध्ये द्वारे कृते तत्र कुलनाशः प्रजायते ॥ ५८ ॥

द्वारं द्वारेण वा विद्धमप्यशुभायोपपद्यते ।
अतिह्रस्वसंयुक्तं धनधान्यविनाशनम् ॥ ५९ ॥

नवं पुराणसंयुक्तमन्यं स्वामिनमिच्छति ।
यतोऽर्थं राजदण्डाय विद्धं द्वारं विवर्जितम् ॥ ६० ॥

नवं पुराणसंयुक्तं द्रव्यं तु कलिकारकम् ।
न मिश्रजातिद्रव्योत्थं द्वारं वा वेश्म वा शुभम् ॥ ६१ ॥

पादस्थानेषु यद् द्रव्यमविचार्य प्रतिष्ठितम् ।
तत्कालेन चलनं गृहभर्तुः प्रजायते ॥ ६२ ॥

अन्यवास्तुच्युतं द्रव्यमन्यवास्तौ न योजयेत् ।
प्रासादे न भवेत् पूजा गृहे च न वसेद् गृही ॥ ६३ ॥
दूषणेन देवद्रव्येण भवनं यद् विधीयते ।
न तत्र वसति स्वामी वसन्नपि विनश्यति ॥ ६४ ॥
शूर्पाकृता मुसलकाख्या ध्वजकाख्या च गर्हिता ।
द्वारालिन्दकवातायनाः [illegible] ॥ ६५ ॥
प्रासादशिखरच्छाया ध्वजच्छायापि गर्हिता ।
द्विप्रहरसमी [illegible] न दोषदा ॥ ६६ ॥
[illegible] करालं च सम्मुखं वृक्षवेशनम् ।
वामावर्तं च न शुभं द्वारमध्यनरं गृहे ॥ ६७ ॥
निःस्वं स्यात् कीलितो भर्ता दुर्जनस्थितिरुच्यते ।
सङ्कुले मूलपीडा स्यात् गृहे चपलाः स्त्रियः ६८ ॥
वामे वित्तक्षयो द्वारि(रे) [illegible] प्रभोः ।
द्वारं [illegible] विचक्षणैः ॥ ६९ ॥
[illegible] ।
द्वारलग्ने न [illegible] विषमस्थिताः ॥ ७० ॥
इतिहासपुराणोक्तं [illegible] ।
निम्बवृक्षं च गृहे नेष्टं [illegible] नयेत् ॥ ७१ ॥
[illegible] यानि [illegible] च ।
भीषणानि च यानि स्युर्न कुर्यात् तानि वेश्मसु ॥ ७२ ॥
स्वयमुद्घाटितं द्वारमुद्घाटनकरं भवेत् ।
धनहृत् बन्धुवैरं स्यात् [illegible] कलिकारकम् ॥ ७३ ॥
स्वयं यत् पिहितं द्वारं तद् भवेद् बहुदुःखदम् ।
[illegible] गर्भपातनम् ॥ ७४ ॥

कुड्यं नाधोमुखं कार्यं मस्तकस्याकपालकं न च ।
पश्चिमांशे परिक्षिप्तो दक्षिणांशे तु सुन्दरा ॥ ७५ ॥
एकस्यद्वारं च भित्तिं च विपरीतं न कारयेत् ।
अनयोर्वैपरीत्येन दोषाः स्युर्बहवो नृणाम् ॥ ७६ ॥
मूलसूत्रानुसारेण कर्तव्या भूमिकोपरि ।
उपर्युपरि यद् वेश्म सर्वं शोभाप्रकारकम् ॥ ७७ ॥
अधोभूमौ कृता ये स्युस्तत्स्तम्भास्त्वोर्ध्वभूमिषु ।
परित्यज्य कपट्टिका न कुर्वीत यथोत्तरम् ॥ ७८ ॥
शाला भिन्ना भवेद् यस्मिन्नलिन्दस्त्वधिको भवेत् ।
निधनं जायते तत्र तथा चोक्तभयानि च ॥ ७९ ॥
मूलद्वारानुसारेण द्वाराण्युपरिभूमिषु ।
कुर्याद् भयप्रदानि स्युर्विभिन्नान्यन्यथा पुनः ॥ ८० ॥
द्वारप्रमाणमाम्नातं(नं) कुब्जं कुलविनाशनम् ।
अल्पार्थं पीडितं पीडां करोत्यन्नगतं भयम् ॥ ८१ ॥
प्रवासो बाह्यविनते चिरक्रान्ते वस्तुनो भयम् ।
मूलद्वारं क्षयं कुर्याद् भिन्नं द्वारान्तरेण यत् ॥ ८२ ॥
प्रवासो मृत्युजो द्वेषो भिन्ने चान्तररथ्यया ।
नाशं द्रव्यं च्छायाभिन्ने वृक्षेण शिशुदूषकम् ॥ ८३ ॥
पङ्कभिन्ने भवेच्छोकः सलिलस्राविणि व्ययः ।
कूपेन विद्धेऽपस्मारो विनाशो दैवतेन च ॥ ८४ ॥
स्तम्भेन दूषणं स्त्रीणां भ्रमणेन तु कुलक्षयः ।
मानादभ्यधिके द्वारे राजतो जायते भयम् ॥ ८५ ॥
न्यूने मानतो हीने चौरेभ्यश्च भयं भवेत् ।
व्याधयः श्वभ्रविद्धेन भवत्य च परिक्षया ॥ ८६ ॥

ईशानकोणेन बन्धः स्यात् समग्रैश्वर्यसंक्षयः ।
सन्निपातभयं वाम्या तुल्या दक्षिणमाकृते ॥ ८७ ॥
इत्युक् कुलालचक्रेण दारिद्र्यं वारिणा भवेत् ।
व्याधिरुक् किञ्चकूटेन आपाकेन कुलक्षयः ॥ ८८ ॥
मिश्र(स्र)नोदूखलेन व्याधिरल्पा वाडमरी भवेत् ।
मोषभाण्डेन दुर्मन्त्री भक्षमा वार्क्षीसो गृही ॥ ८९ ॥
दारिद्र्यं छायया विद्धे भवेद् द्वारे कुटुम्बिनः ।
स्थलाद्यन्वलवल्मीकैर्विद्धे नागभयं भवेत् ॥ ९० ॥
कूपो विद्रुतमस्पृष्टं करालं शिथिलं पशु ।
बकं विकारलम्बुत्वानं स्र(स्व)लाभं दुःखकुक्षिकम् ॥ ९१ ॥
स्वपाकचलितं दृश्यं हीनकर्णं मुखामलम् ।
पार्श्वगं सूत्रमार्गाच्च भ्रष्टं द्वारं न शोभनम् ॥ ९२ ॥
तत् करोति भयं घोरं विनाशं स्वामिसम्पदः ।
वसतां कलहं नित्यमतस्तत् परिवर्जयेत् ॥ ९३ ॥
अन्तर्द्वारात् बहिर्द्वारं नोच्चं कुर्यात् सङ्कटम् ।
उच्चं विसङ्कटं वापि लक्ष्मीर्वाप न जायते ॥ ९४ ॥
पट्टस्त्रिपर्पिका मध्ये द्वारस्य स्यात् कथञ्चन ।
कर्तुस्तथा विनाशः स्यात् कुलस्य च परिक्षयः ॥ ९५ ॥
तुला उपतुला वा स्युरूर्ध्वे विषमा यदा तुलाः ।
दारिद्र्यव्याधिसन्तापा भवन्ति स्वामिनस्तथा ॥ ९६ ॥
अनुवंशमनुप्रासा व्यत्ययो यदि मन्दिरे ।
वित्तायुर्योत्सवादपत्यमनारोग्यं च जायते ॥ ९७ ॥
उदुम्बरे(रि)निहिता(मि ?)लखादी नाम सा तुला ।
दुःखं मरणं चापि कन्यानां दिशयति सा ॥ ९८ ॥

तलराङ्कोपरे न्यस्ता लतादेव समा यदि ।
तुला तलारिका तापि कुलक्षयकरी भवेत् ॥ ९९ ॥
तुलाधिवेधेन विन्यस्ता ज्ञेया पक्षोपवीतिनी ।
पक्षतो व्यत्ययं कुर्यात् कुटुम्बस्यासुखं च सा ॥ १०० ॥
यदि मातुलिङ्गापि मध्ये छिद्रा कथञ्चन ।
तदा नराह्ने भयेन मर्म च परिहीयते ॥ १०१ ॥
भित्तिभेदो न कर्तव्यस्तुलाभिश्चलितैरपि ।
कुर्याद् मध्यपन्यस्तो भारपट्टः कुलक्षयम् ॥ १०२ ॥
अयुक्तयोर्युक्तयोर्वा सन्धिवेधं भारपट्टे ।
सन्धौ स्यात् तत् सुतो ज्येष्ठः कर्तुश्चापि विनश्यति ॥ १०३ ॥
अनुवंशं न भुञ्जीत न शयीत कदाचन ।
तुलानामधोभागाः स्यात्कक्षासनस्य महद्भयः ॥ १०४ ॥
नागोऽनुवंशं रोगाः स्युस्तिर्यग्वंशे रक्षसो भयम् ।
छायामासारविन्यस्ते मरणं नागदन्तके ॥ १०५ ॥
कर्णाधात् पक्षिराट्सप्तदाक्षजवक्षकुमारकान् ।
सिंहकर्णकपोतालिं गृहेषु परिवर्जयेत् ॥ १०६ ॥
इन्द्रकीलं शूलं तु स्थूलैर्वंशैश्च वेश्मनि ।
न कुर्यात् तत्र विद्धानाः सर्वदोषावहा यतः ॥ १०७ ॥
अनिष्टिमधिरोपितं कृत्वाप्यपवादितम् ।
अप्रतिष्ठितसंस्थानं गृहं नश्यति सर्वथा ॥ १०८ ॥
अनिष्टदेहेन हृदयेन शरीरेण यथा नरः ।
विरूपो दुःखदश्च तथा द्रव्येण मन्दिरम् ॥ १०९ ॥
जीर्णं दुष्क(क्क)र्णे विवर्णं हीनं वक्रं विशीर्णगुणम् ।
पक्वं दुष्टं वास्तुयोगे सन्धिविद्धारपमूलके ॥ ११० ॥

घनमध्यं स्थूलमूलं कुक्षिछिद्रं च दारु यत् ।
शिरामूलं कूर्मपृष्ठं पत्रहीनं च वर्जयेत् ॥ १११ ॥
पातितान् वर्जयेद् वृक्षान् द्विपाद्यैरनिलादिभिः ।
प्रसूनफलिनिष्पन्नान् काकगृध्रादिसेवितान् ॥ ११२ ॥
मधुमक्षिपिपीलिकादिदुर्वासैः कृमिजालजान् ।
चतुष्पथस्थितश्मशानदेवालयसमासंस्थितान् ॥ ११३ ॥
देवालयान्तिकोत्पन्नान् शुष्काग्रान् कण्टकाकुलान् ।
वल्लीपिनद्धान् सुषिरकोटरग्रन्थिसङ्कुलान् ॥ ११४ ॥
ग्राम्यारण्यवनस्थानांस्त्यजेत् कण्टकिनोऽपि च ।
कपित्थोदुम्बराश्वत्थक्षीरीवटनक्तमालकान् ॥ ११५ ॥
कोविदारवनारिष्टशुभ्रशालकनिम्बकान् ।
किञ्च समस्ताश्मीरिकल्पांश्च दुर्मांस्त्यजेत् ॥ ११६ ॥
मर्माणि यत्र दृश्यन्ते दारौ शितिशिरैश्च वा ।
दारितं कुलहानिं वा वृक्षस्तत्र विवर्जयेत् ॥ ११७ ॥
स्तम्भैर्विमृदापति स्वामी तुलाभिः क्षीयते गृहम् ।
सप्तमीभिश्च गावः स्युः व्याघ्रपत्नीभिः सुवाचका ॥ ११८ ॥
मर्मस्थानस्थितैः कार्यैर्मृत्युः कापो विधीयते ।
मर्मस्थैः सन्धिपादैस्तु वास्तुमध्यस्थमाविशेत् ॥ ११९ ॥
पशुपीडा नागदन्तैर्वातायनैर्धनक्षयः ।
कपिशीर्षैस्तु शिष्याणां क्षयं मर्मस्थितैर्वदेत् ॥ १२० ॥
वज्रस्तम्भाम्बुजस्तम्भयागाश्च लोहकानि च ।
मर्मस्थानविनिविष्टानि जनयन्ति महाभयम् ॥ १२१ ॥
स्तम्भैर्वा द्वारमध्यैर्वा युक्ताभिर्मर्मपादकैः ।
वातायनैर्गवाक्षैर्वा द्वारमध्ये निवेशिते ॥ १२२ ॥

व्याधयः संभवन्त्यस्मिन् धननाशः कुलक्षयः ।
राजदण्डभयं च स्यादपत्यानां च पीडनम् ॥ १२३ ॥
षड्दारुकाणां मध्येषु द्वारमध्येषु वा पुनः ।
कर्णसूत्रादिभिर्विद्धेष्वेतेष्वेवादिशेत् फलम् ॥ १२४ ॥
संविद्धा मार्गवृक्षैर्वा स्तम्भैर्वाप्यपरैस्तथा ।
शाल्या जनाद् भयं कर्तुः कुर्वीत् तस्करतोऽपि वा ॥ १२५ ॥
गृहमध्ये कृतं द्वारं द्रव्यकोशविनाशनम् ।
आवहेत् कलहं भर्तुर्भार्यां चास्य प्रदूषयेत् ॥ १२६ ॥
द्वयोरेकोत्तरेणापि महामर्माणि पीडिते ।
सर्वस्वनाशो गृहिणो मरणं वा ध्रुवं भवेत् ॥ १२७ ॥
द्वारान्तकमनुल्लिङ्घ्य श(च)यवीथैः समीरितैः ।
विस्तृतं नगरस्थेऽपि लब्धरूपं शास्यते गृहम् ॥ १२८ ॥
विभागमर्थहीनेषु रूपन्यासेषु वास्तुषु ।
पञ्चलाङ्गूलिकर्णेषु रोगान्मृत्युं संशयः १२९ ॥
कटुकण्टकिदुर्गन्धिदुग्धकापथ्यपान् द्रुमान् ।
न धारयेत् समीपस्थान् पुरप्रासादवेश्मनाम् ॥ १३० ॥
बदरी कदली चैव दाडिमी बीजपूरिका ।
प्ररोहन्ति गृहे यत्र तद् गृहं न प्ररोहति ॥ १३१ ॥
प्लक्षं द्रव्यापहं हन्ति कुलमायामतोऽधिकम् ।
उदुम्बराभ्यधिकं पुत्रां सम्पत्तिं चित्तराधिकम् ॥ १३२ ॥
स्तम्भाद्यैर्भित्तिभिः पट्टैः शीर्षैर्बन्धैस्तथा ।
आलोकनातोरणाद्यैस्तथान्यैः कन्दकूटकैः ॥ १३३ ॥
हीरस्तम्भोत्तरनाद्यैश्च तुलाभिः सन्धिपालकैः ।
भार्गकाभिर्वेदिकाभिश्च कपोतिजालिकैः तृणैः ॥ १३४ ॥

घटितैः पातितैर्नीडैर्जायते कुट्टिमो ध्रुवम् ।
व्याधिचारिमृगुव्यालैर्निर्धनत्वं च जायते ॥ १६५ ॥
उदक्प्लाव्यं त्रिमूलगर्भं क्षमितं चमितं कुले ।
हीनमध्यं नहसूचं शल्यविद्धं शिरोगुरु ॥ १६६ ॥
शाखासंस्पर्शकोणं च विषमस्थं तुलानलम् ।
अन्योन्यप्रत्यपविद्धं च कूपवप्रविभाजिनम् ॥ १६७ ॥
हीनविस्तुलमाङ्गं च विमाङ्गं छन्दसंस्थितम् ।
भिन्नवासं व्यककर्णं भित्तिहर्म्यं मानवर्जितम् ॥ १६८ ॥
विकूलं च गृहं भर्तुरनिष्टफलदायकम् ।
तस्माद् दोषानिमांस्त्यक्त्वा गृहं कुर्याच्छुभावहम् ॥ १६९ ॥
एवंविधं दोषकरं गृहं स्याद् भर्तुश्च कर्तुश्च यतस्तदेते ।
श्रेयः सदा शिल्पिभिरप्रमत्तैस्त्याज्याश्च दोषाः शुभकीर्तिकामैः
॥ १७० ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
गृहदोषनिरूपणं नामाष्टचत्वारिंशोऽध्यायः ॥

## अथ रुचकादिप्रासादलक्षणं नामैकोनपञ्चाशोऽध्यायः ।

त्रिदशानां नृपाणां च वर्णिनां च विशेषतः ।
उत्पत्तिमष्टभिर्ब्रूमः प्रासादा यस्य वै मताः ॥ १ ॥
पुरा ब्रह्मासृजत् पञ्च विमानान्यसुरद्विषाम् ।
विभूत्यै सर्वरत्नानि श्रीमन्ति च महान्ति च ॥ २ ॥
तानि वैराजकैलासे पुष्पकं मणिकमित्यथ ।
इमानि मणिविमानानि पञ्चमं च त्रिविष्टपम् ॥ ३ ॥

आत्मनः स्थूलसूक्ष्मस्य पञ्चाव्यक्तस्य पार्थिवः ।
सुरेशितो च निर्मोकतो विमानानि यथाक्रमम् ॥ ४ ॥
चतुर्भ्यस्त्वपि चैकं स सूर्याद्यैरवकल्पयत् ।
विमोचाय पञ्चैतत्स्याकारा यतिर्दैवतम् ॥ ५ ॥
प्रासादांश्च महाकारान् शिलापक्वेष्टकादिभिः ।
नगराणामलङ्कारहेतवे समकल्पयत् ॥ ६ ॥
वैराजं चतुरस्रं स्याद् वृत्तं कैलाससंज्ञितम् ।
चतुरस्रायताकारं विमानं पुष्पकं भवेत् ॥ ७ ॥
वृत्तायतं च मणिकमष्टाश्रि स्यात् त्रिविष्टपम् ।
तेभ्यश्चान् श्रीमतोऽन्यांश्च विविधानसृजत् प्रभुः ॥ ८ ॥
ये पञ्च विहिता भेदाः पूर्वं कमलयोनिना ।
सर्वांस्तानभिधास्यामो नामसंस्थानमानतः ॥ ९ ॥
रुचकश्चित्रकूटश्च तृतीयः सिंहपञ्जरः ।
भद्रः श्रीकूट उष्णीषः शालाक्षो गजयूथपः ॥ १० ॥
नन्द्यावर्तोऽवतंसाख्यः स्वस्तिकः क्षितिभूषणः ।
भूजयो विजयो नन्दी श्रीतरुः प्रमदाप्रियः ॥ ११ ॥
व्यामिश्रो हस्तिजातीयः कुबेरो वसुधाधरः ।
सर्वभद्रो विमानाख्यो मुक्तकोणश्च नामतः ॥ १२ ॥
चतुर्विंशतिरुद्दिष्टा चतुरस्राः समासतः ।
वृत्तांस्त्वथाभिधास्यामः प्रासादानपरानपि ॥ १३ ॥
वलयो दुन्दुभिः प्रान्तः पद्मः कान्तश्चतुर्मुखः ।
माण्डूकाख्योऽथ कूर्मश्च तालीगृह उडुपिकः ॥ १४ ॥

इति वृत्ताः समासेन प्रासादा यत्र कीर्तिताः ।
चतुरश्रायता ये स्युः कथ्यन्ते तेऽपि नामतः ॥ १५ ॥
भद्रो विशालः साम्मुख्यः प्रभवा शिबिकागृहः ।
मुखशालो द्विशालश्च गृहराजोऽमलो विभुः ॥ १६ ॥
एवमेते समुद्दिष्टाश्चतुरश्रायता दश ।
अथ वृत्तायतान् ब्रूमः प्रासादानभिधानतः ॥ १७ ॥
आमोदो रैतिकस्तुङ्गाकर्षन्निर्वेधकः ।
तथा निषेधः सिंहास्यः सुप्रभो लोचनोत्सवः ॥ १८ ॥
एते वृत्तायताः प्रोक्ताः प्रासादा नामतो दश ।
अष्टाश्रीणां च नामानि कथयामि समासतः ॥ १९ ॥
वज्रको नन्दनः शङ्कुर्मेखलो वामनो लयः ।
महापद्मश्च हंसश्च व्योमचन्द्रोदयावपि ॥ २० ॥
अष्टाश्रय इमे प्रोक्ताः प्रासादा दश संख्यया ।
अथान्येषां चतुष्षष्टिसंख्यानामनुकीर्त्यते ॥ २१ ॥
संस्थानमानविन्यासैर्भ्रमणकाद्यैश्च संयुताः ।
एषां विशेषा वक्ष्यन्ते पृथक् पृथगनुक्रमात् ॥ २२ ॥
ज्येष्ठो भागचतुर्हस्तः सार्धहस्तत्रयोऽपरः ।
कन्यसीयः कनीयांस्तु हस्तत्रितयसम्मितः ॥ २३ ॥
ज्येष्ठमध्यकनीयोभिर्भेदैर्भागैर्विभाजिताः ।
भवन्ति सर्वप्रासादाः ज्येष्ठमध्यावमक्रमात् ॥ २४ ॥
चतुरश्रीकृते क्षेत्रे चतुर्भागविभाजिते ।
कुर्यात् स्थारोहकांश्चांशे पीठबन्धसमुन्नतम् ॥ २५ ॥
तथा तस्योपरि स्थाप्या हंसपङ्क्तिः समन्ततः ।
हस्तमात्रोच्छ्रिता भूत्वा जगतीमसूरिका ॥ २६ ॥

ततः पीठस्य तस्यान्तर्द्विभागाय(या)मविस्तृतिः ।
प्रासादो रुचकः कार्यो भागभित्तिचतुष्कितः ॥ ९७ ॥
सार्धभागेन लेखा स्यात् सार्धभागस्तु योऽपरः ।
भाग(ग)मर्धं सकर्णं स्यात् तेन सामलसारकम् ॥ ९८ ॥
द्वारं भागोच्छ्रितं तस्य कार्यं भागार्धविस्तृतम् ।
समग्रीवः स कर्तव्यश्चतुर्घण्टावरावृतः ॥ ९९ ॥
सतोरणालिन्दकस्याष्टकर्णाण्डकयोषकर्णयात् ।
क्रियतेऽत्र यदा सम्य(ग्भैः)र्गुर्विकाख्या समावृतः ॥ १०० ॥
समग्रीवपरिष्कारो मणिकालिन्दशोभितः ।
मध्यमश्रेष्ठो रुचकः प्रासादः परिकीर्तितः ॥ १०१ ॥

रुचकः ।

कर्णग्रीवाके चित्रैः समग्रीवश्च यो युतः ।
द्वाभ्यां द्वाभ्यां गवाक्षाभ्यां चतुर्दिशमलङ्कृतः ॥ १०२ ॥
कपोतालीपरिक्षिप्तः शोभितो द्वारसम्पदा ।
तदाऽसौ चित्रकूटाख्यः प्रासादः सोऽभिधीयते ॥ १०३ ॥

चित्रकूटः ।

अयमेव पुनः पञ्चभिः स्तम्भैरपि चितो यदा ।
ग्रीवाकर्णविहीनश्च स भवेज्जालरूपकः ॥ १०४ ॥
सिंहपञ्जर इत्युक्तः प्रासादः स तदा शुभः ।

सिंहपञ्जरः ।

कर्णग्रीवाकौ द्विगुणश्चैव भवतो यदा ॥ १०५ ॥
अलिन्दकरणिशिखरा तदा भद्रः प्रकीर्तितः ।

भद्रः ।

स्याच्चित्रकूट ग्रीवाभिश्चतुर्भिर्दिक्चतुष्टये ॥ १०६ ॥

वहिर्भद्रसमायुक्तः कौमुद इति नामतः।

कौमुदः।

चतुःशालकसमायुक्तप्रागुत्तरस्यपरौ च चेत् ॥ ३७ ॥
शालाद्वारक्रमाद्गर्भः स्यात् नन्द्यावर्तोऽभिधीयते।

उत्पलः।

चतुरंशकविस्तीर्णं षडंशायतिविनायति ॥ ३८ ॥
पीठं शालाद्वयस्योर्ध्वं सकलाशिनिर्मितं शुभम्।
मध्याद्वयपरसलस्य द्विभागायतविस्तृतम् ॥ ३९ ॥
विधेयं गर्भमण्डपमध्ये तिन्दुकपरिष्कृतम्।
कार्या तत्पार्श्वतः सीमा भागद्वितयमायता ॥ ४० ॥
भागमेकं च विस्तीर्णा चतुःस्तम्भोपशोभिता।
तत्पश्चतोऽपरा सीमा कार्या भागात् चतुरायता ॥ ४१ ॥
तिर्यक्पृथ्वी भागविस्तीर्णा प्रवेशादुपशोभिता।
एष शालाद्वयः सकर्णकार्धविस्तृता समायुतः ॥ ४२ ॥
प्राचीप्रतीचिककालसपकसोपानकैः शुभैः।

वामनः।

चतुर्भागोऽभितः पार्श्वे क्षेत्रमानस्य कल्पते ॥ ४३ ॥
पीठं कुर्यात्तु मध्यतः सम्यक् शिलाविनिर्मितम्।
मध्ये चतुर्भागोऽस्य द्विभागान्तरं निवेशयेत् ॥ ४४ ॥
त्रि(द्वि)भागायामविस्तारं चतुरस्रं सुशोभितम्।
पार्श्वे भागविस्तारमध्यर्धं भागमुच्छ्रितम् ॥ ४५ ॥
तस्य कार्यं तथा मध्ये पार्श्वेऽपि पक्षोपशोभितम्।
तत्पश्चात् निर्मिता सीमा द्वौ भागौ शीलपादका(का) ॥ ४६ ॥

चतुरस्रा चतुःस्तम्भा तन्मध्ये भागविस्तृता ।
पञ्चभागायता सिंहक् कार्या सीमा तथापरा ॥ ४७ ॥
द्वारभित्त्यश्च कर्तव्याः स्तम्भाः सर्वत्रसंयुताः ।
बहिःपरिकरो गर्भात् समीतो भागविस्तृतः ॥ ४८ ॥
एवं स्याद् वेदिकाजालकपोतादिभिरलङ्कृतः ।
बहिर्व( म )पोभिर्भूषितश्च प्रासादो गजपृष्ठकः ॥ ४९ ॥

गजपृष्ठः ।

षड्भागभाजिते क्षेत्रे चतुरस्रे समन्ततः ।
गर्भो द्विभागिकः कार्यो द्वारं भागसमुच्छ्रितम् ॥ ५० ॥
भागार्धे द्वारविस्तारः प्रासादस्योच्छ्रितिं पुनः ।
कुर्वीत चतुरो भागान् कार्येर्विस्तृतकम् ॥ ५१ ॥
कार्या द्विभागिकाः शालाः भासिन्यास्तस्य भागतः ।
बहिर्भित्तिपरिक्षिप्ताश्चतुर्भागायताः शुभाः ॥ ५२ ॥
द्वौ द्वौ गवाक्षकौ स्तम्भाः प्रतिशालं भवन्ति षट् ।
चतुःस्तम्भयुतैर्युक्ताः कार्या वा पार्श्वकालयैः ॥ ५३ ॥
नन्द्यावर्तोऽप्यमेवं स्यात् समापीपचतुष्टयः ।
प्रतु द्वारशोभेन: प्रासादः शुभलक्षणः ॥ ५४ ॥

नन्द्यावर्तः ।

क्षेत्र( त्रे )षड्भागविस्तारे द्व्याभागकृतायती ।
मध्यावरमध्ये ऽरुप देवकोष्ठे निवेशयेत् ॥ ५५ ॥
चतुरस्रायतिन्यासं चतुरस्रं समन्ततः ।
द्वारं तस्य विधातव्यं भागमध्यर्धमुच्छ्रितम् ॥ ५६ ॥
पादोनं भागविस्तारं सिंहकर्णविभूषितम् ।
वीथिका तस्यायतः कार्या देवकोष्ठेन सम्मिता ॥ ५७ ॥

स्तम्भैः षोडशभिर्युक्ता भागद्वितयभूषितैः ।
ससीमो देवकोष्ठस्य समन्तात् भित्तिवेष्टितः ॥ ५८ ॥
भद्रिकाभ्यो भागिकः कार्यो गवाक्षैरुपशोभितः ।
(वस्तु)श्रीवृक्षोऽथ यमः पार्श्वे चतुःस्तम्भयुता बहिः ॥ ५९ ॥
कार्या द्विरंशाः प्राग्रीवा भागिकालिन्दवेष्टिताः ।
द्विद्विस्तम्भयुताः सर्वे पार्श्वेनाग्रपतोऽभितः ॥ ६० ॥
अलिन्दास्तु चतुःस्तम्भाः कार्याः प्राग्रीवकान्वितः ।
अपराजित इत्येष सर्वलक्षणसंयुतः ॥ ६१ ॥
प्रासादः कथितः सम्यक्

अवतंसः ।

स्वस्तिकः प्रोच्यतेऽधुना ।
चतुरस्रीकृते क्षेत्रे चतुर्भागविभाजिते ॥ ६२ ॥
प्रासादं कल्पयेन्मध्ये द्विभागायामविस्तृतम् ।
शुकनासोऽस्य भागार्धविस्तृतो भागिकोदयः ॥ ६३ ॥
गर्भेणास्य चतुःस्तम्भयालिन्दो भागिको बहिः ।
तस्य स्युर्द्वादश स्तम्भा भागिकोऽलिन्दकोऽपरः ॥ ६४ ॥
विंशतिस्तम्भसंयुक्तो विमानस्य समन्ततः ।
चतुर्भूमिका द्वारे भद्रो बाह्यपरान्वितः ॥ ६५ ॥
भागमेकमनुस्मृत्य कर्णाभ्यां भागविस्तृतौ ।
भागिकोत्सेधनिष्कासौ कार्यौ प्राग्रीवकौ पुनः ॥ ६६ ॥
चतस्रो भित्तिसंश्लिष्टौ भित्ति यो सुराग्रावकौ ।
स्वस्तिकोऽयं समाख्यातः प्रासादः सर्वकामदः ॥ ६७ ॥

स्वस्तिकः ।

कर्णाभिर्वीथिकोऽमुष्य प्रासादः श्रीवृक्षलक्षणः ।
षड्भागभाजिते क्षेत्रे चतुरश्रे समन्ततः ॥ ६८ ॥

द्विभागायामविस्तारं मध्ये गर्भगृहं भवेत् ।
भागद्वयोच्छ्रितौ स्तम्भैर्युक्तं स्पर्शैः सलक्षणैः ॥ ६९ ॥

भित्त्यन्तेषु बहिर्भागे गर्भपादेषु योजयेत् ।
तोरणानि मनोज्ञानि कक्षकूटेषु चाप्यपि ॥ ७० ॥

गर्भस्तम्भप्रमाणेन तानि स्तम्भद्वयेन वा ।
समुच्छ्रितानि कुर्वाणि कलशैः रत्नमण्डितैः ॥ ७१ ॥

पञ्चभिः पञ्जरस्थानैर्भिन्नार्धैश्चाप्यनेकधा ।
भूषितास्ये पुनर्भूमिं मकराभ्यां युतैरपि ॥ ७२ ॥

स्तम्भयोरन्तरे एवामुं नीं मकरपङ्क्तिभिः ।
अन्योन्याभिमुखे द्विष्ठे कुर्यान्मकरयोर्मुखे ॥ ७३ ॥

चतुर्णामपि निर्दिष्टस्तोरणानां मया विधिः ।
अलिन्दौ भागिकावस्यो बहिर्भागे प्रकीर्तितः ॥ ७४ ॥

स्थूलाभिकान्यलिन्दान्ते धार्मिकायतनानि च ।
वेदिकानि बहिर्भित्त्या सम्मुखानि परस्परम् ॥ ७५ ॥

धार्मिकालयविस्तीर्णां भूमिस्थां चापरां भवेत् ।
तस्याः पट्टपालकानि स्थूलमानाभोच्छ्रितानि च ॥ ७६ ॥

प्राग्ग्रीवकैः ससोपानैर्विचित्रैस्तानि भूषयेत् ।
अपरस्याः पुनर्भित्तेर्भागद्वयविनिःसृतम् ॥ ७७ ॥

मध्ये द्विभागविस्तीर्णं देवकोष्ठं निवेशयेत् ।
द्वारशाखां च कुर्वीत तस्योर्ध्व( र्ध्वं ) भागद्वयोच्छ्रितम् ॥ ७८ ॥

तथा भागार्धविस्तारमित्येष क्षितिभूषणः ।
प्रासादः कीर्तितः सम्यक् सर्वलक्षणलक्षितः ॥ ७९ ॥

क्षितिभूषणः ।

क्षेत्रस्य चतुरस्रस्य भागान् द्वादश कल्पयेत् ।
मध्ये गर्भं चतुःस्तम्भं तस्य कुर्याद् द्विभागिकम् ॥ ८० ॥
तद्बहिर्भागिकोऽलिन्दो द्वारतःस्तम्भमानतः भवेत् ।
मध्येऽपरस्यां यौ स्तम्भौ ताभ्यां कुर्वीत तोरणम् ॥ ८१ ॥
अलिन्दो भागिकः कार्यो भित्त्या भागिकया युतः ।
ताभ्यां चतुष्कं मध्ये गर्भस्यास्तोभितस्तथा ॥ ८२ ॥
तृतीयो भागिकोऽलिन्दः स्याद् भित्त्या परिवेष्टितः ।
चतुर्भागायतं पूर्वस्यां चतुष्कं भवेत् ॥ ८३ ॥
भद्रीयं भागविष्कम्भं कुर्याद् भागद्वयायतम् ।
अग्रतः स्तोभितं स्तम्भैर्भागान्तस्थपतलम् ॥ ८४ ॥
यथा प्राच्यां तथोदीच्यां याम्यायामपि कीर्तितम् ।
त्रिभिः प्रतीच्यां तु तुर्यद्वितीयालिन्दकाद् बहिः ॥ ८५ ॥
द्विभागायामविष्कम्भं रेखकोष्ठं निवेशयेत् ।
सपक्षद्वारकं श्रीमद् द्वारपालोपशोभितम् ॥ ८६ ॥
भागिकोऽलिन्दकस्तस्माद् बहिर्भित्त्या परिवेष्टितः ।
चरित्रपाचुनो वा स्याद् गवाक्षैर्वा विभूषितः ॥ ८७ ॥
कूटौ विजयते यस्मात् तेनासौ पृथिवीजयः ।

भूधरः ।

यथा पृथ्वीजयस्यैव कर्णप्रासादकाङ्क्षिणौ ॥ ८८ ॥
कोणेषु भागिकौ स्यातां विज्ञेयो विजयस्तथा ।

विजयः ।

अग्रे समन्तात् द्विशालो भद्राशालं विना यथा ॥ ८९ ॥
मध्यभागिकलीयार्ध( व )कर्णप्रासादवेष्टितः ।
भद्रप्रालिन्दगर्भौ च सद्वारिकान्तरी तथा ॥ ९० ॥
स्यातां प्राग्द्वारपक्षौ तथा भद्रोऽभिधीयते ।

मन्दः ।

चतुरश्रीकृते क्षेत्रे दशभागविभाजिते ॥ ९१ ॥

चतुरश्रो भवेन्मध्ये वेदकोष्ठो द्विभागिकः ।
पुरस्तम्भोऽस्य भागोनः कार्यो भागार्धविस्तृतः ॥ ९२ ॥

स्याद् बहिर्द्विविभागपरोऽलिन्दको वेदकोष्ठगः ।
भागिकः स च विज्ञेयो भित्तियुक्तस्ततोऽपरः ॥ ९३ ॥

अयं द्विभागिकैर्युक्तः प्राग्ग्रीवैर्भागनिर्गतैः ।
तथा तृतीयोऽलिन्दः स्यात् समन्ताद् भित्तिवेष्टितः ॥ ९४

प्राग्ग्रीवैश्चतुःस्तम्भैः सप्रवेशैर्विभूषितः ।
भागिकी स्याद् बहिर्भित्तिस्तिस्रस्तु पदैः समा ॥ ९५ ॥

इत्येष शीतकर्नाम प्रासादः परिकीर्तितः ।

शीतकः ।

अस्यैव स्तम्भगर्भस्य द्वितीयालिन्दभित्तिषु ॥ ९६ ॥

चतुःशालानि विधेयानि पूर्वरूपव्यवस्थिते ।
द्वौ द्वौ प्राग्ग्रीवकौ कार्यौ तृतीयालिन्दकाद् बहिः ॥ ९७ ॥

तौ च द्वि(भागा)न्तरितौ सर्वतो भागनिर्गतौ ।
एवं पञ्चाशता स्तम्भैर्द्वाभ्यां च परिवेष्टितः ॥ ९८ ॥

चतुःस्तम्भैः सप्रवेशैः समन्तात्प्रतिनिर्गतैः ।
प्रासादोऽयं समाख्यातो नामतः प्रमदाप्रियः ॥ ९९ ॥

प्रमदाप्रियः ।

भागविस्तारविष्कम्भमस्य प्राग्ग्रीवकं यथा ।
भित्त्यालिन्दावसानस्थितिर्भेद्यं द्वे पार्श्वे तन्मुखं शुभम् ॥ १००

द्वितीयालिन्दकस्थाने कर्णप्रासादकैर्युतः ।
एवं यथाभिमतसंज्ञोऽन्यो प्रासादः परिकीर्तितः ॥ १०१ ॥

स्वस्तिकः ।

चित्रपक्षस्य च यथा कर्णोलाङ्गलकैर्युता ।
भवेद् विचित्रवस्था हस्तिजातीय इति कथ्यते ॥ १०२ ॥

हस्तिजातीयः ।

सीमायामीषकूटेषु यथा स्युः पृथिवीजये ।
द्विभागाभागविनोऽर्धभित्तिवृतैर्वृत्तालसुकोष्ठु च ॥ १०३ ॥
अलिन्दे पञ्चिमा शाला सर्वं(र्वा)शालोऽथवा शुभा ।
चतुरश्रकं तथैवात्र चतुर्धामापन्नं भवेत् ॥ १०४ ॥
पूर्ववत् सर्वमन्यत्र कुबेरः स तथा भवेत् ।

कुबेरः ।

प्रासादः कथ्यतेऽन्यश्च सम्प्रतीह चराचरः ॥ १०५ ॥
कुबेरोपसरोऽभिन्नः कर्णप्रासादभूषितः ।
षट्चन्द्रशालिकः श्रीमान् चराचर इति स्मृतः ॥ १०६ ॥

चराचरः ।

पद्माण्डकविभक्ताङ्गाद् यः सर्वतोदिशम् ।
चराचरसदृक्प्रासः सर्वतोभद्र उच्यते ॥ १०७ ॥

सर्वतोभद्रः ।

कर्णभागीयको द्वौ द्वौ शालाभागीयकाव(च)पि ।
स्यातां पदानि प्रोक्तोऽसौ विमानाच्छन्दसस्तथा शुभः ॥ १०८ ॥

विमानाख्यः ।

विमानपीठे निर्युक्तः शालाभिः सर्वतो वृतः ।
अन्योन्यशालासम्बन्धो विमानो न्यस्यते यथा ॥ १०९ ॥
कर्णप्रासादसंक्षेपैः कोष्ठैः शालोर्ध्वनिर्गमैः ।
स चित्रकूटकोणः स्यात् प्रासादोऽन्यर्पिसोऽभिन्नः ॥ ११० ॥

गुरुकीलः ।

प्रासादश्चतुरश्रः स्वैर्विविधैर्वेदिकान्वितः शुभम् ।
इत्यादीनभिधीयन्ते कृताः स्वैः स्वैर्विभक्तिभिः ॥ १११ ॥
तथाद्यौ वलयाकारो वलयः स च कथ्यते ।
समन्ताद् वर्तिते क्षेत्रे चतुर्भागविभाजिते ॥ ११२ ॥
कुर्वीत सालोऽर्धं पीठं सार्धं भागोऽभिमूलं शुभम् ।
परिक्षिप्तं गजपृष्ठैर्भवन(रा)त्मास्तुर्निर्गतम् ॥ ११३ ॥
बहिर्भागसमोपेतमलिन्दं कार्यं कूटानकपः ।
पादोनविस्तृतिर्दिक्षु द्वाराश्चोर्ध्वपादविभूषितः ॥ ११४ ॥
तथार्धहस्तन्यकोऽलिन्दो बहिर्भौमश्च इत्यसौ ।
कुलत्रयाय सिंहकर्णास्तथा आलकलशकान् ॥ ११५ ॥

भूधरः ।

प्राग्ग्रीवकाः(कृतः) स स्यात् पत्नु शिखरकोऽष्टधाङ्गकः ।
तथैव [1]सुन्दुभिः प्रोक्तश्चिन्तितैः प्रासाद उच्यते ॥ ११६ ॥
अयमेव चतुर्भिः स्यात् यदा प्राग्ग्रीवकैः शुभैः ।
स्तम्भैश्चतुर्भिर्वास्यैव यदा पद्मावतीच्यते ॥ ११७ ॥
मध्यवृत्तो गर्भकोष्ठो चित्रितोऽभ्यन्तः स्थिता ।
स कान्त इति विख्यातः प्रासादो वर्तुलाकृतिः ॥ ११८ ॥
चत्वारि वलयान्येव यत्र द्वाराण्यलिन्दकः ।
स्तम्भचतुर्भिस्तानि सहकर्णैस्त्रीतीयो भागलम्बितः ॥ ११९ ॥
प्राग्ग्रीवकाश्च स्तम्भाभ्यां द्वाभ्यां द्वाभ्यां समन्विताः ।
चत्वारो यत्र स प्रोक्तः प्रासादोऽत्र चतुर्मुखः ॥ १२० ॥

अस्यैवैकं यदा शृङ्गं प्राग्ग्रीवोऽभिनिवेशितः ।
एक एव तदाख्यातः प्राग्ग्रीवस्तस्य नामतः ॥ १०१ ॥
कपोतौ भागभूतश्च इत्येव पूर्वप्रासादलक्षणः (णम् ?) ।
त्रिकोणेषु यदास्यैव भवेत् प्राग्ग्रीवकस्तदा ॥ १०२ ॥
प्रासादोऽयं तदा कूर्मसंज्ञः स्यात्परकीर्तितः ।
कूर्मस्यैव यदा त्रिषु स्तम्भैरष्टाभिरर्चिता ॥ १०३ ॥
प्राग्ग्रीवका भवन्त्यस्मिं चत्वारोऽभिनिवेशिताः ।
स वीतकाशितयाके भवत्यस्मिंस्तदा ततः ॥ १०४ ॥
चोत्पलाख्यमनुकल्प मध्यभागे यदा भवेत् ।
† काकीपादोपविनिर्गतः प्राग्ग्रीवकृतिलोत्तमा ॥ १०५ ॥
इति पुष्टाः समाख्याताः प्रासादा नामतश्च ये ।
चतुरश्रायताद् भूमः प्रासादानिह साम्प्रतम् ॥ १०६ ॥
अष्टभागायते क्षेत्रे चतुर्भागविस्तृते ।
द्विभागस्तार्धभागिकभागोऽस्य पीठ इष्यते ॥ १०७ ॥
पश्चिमे भागतुल्यश्च रेचकोऽत्र द्विभागिकम् ।
तस्मिन् विनिवेशयेत् सीमा स्यादस्यामेकभागिभिः ॥ १०८ ॥
ससीमो रेचकोऽस्य भागिकोऽभिन्यसो बहिः ।
शुक्लौ पराणां विस्तारा वेदिकाभागकैर्भिन्नः ॥ १०९ ॥
प्राग्ग्रीवकस्य तस्यार्धे स्तम्भैर्द्विगुणभूषितः ।
द्विभागायतनाद्विनः श्रीमान् सिंहकर्णैरलंकृतः ॥ ११० ॥
प्रासादोऽयं यतो नाम विमानः कथ्यतेऽधुना ।
यदास्यैव तथिस्कान्तो सीमायामे च वर्ध(र्धि)ते ॥ १११ ॥

वलभ्यौ पार्श्वयोः स्यातां विशालाख्यालये भवेत् ।
विशालस्य यथा गर्भे भित्तिर्भवति दिङ्मये ॥ १३२ ॥
द्वौ द्वौ गवाक्षकौ चापि साम्मुख्यः स भवेत् तदा ।
प्राग्ग्रीवाद्विविर्ता तस्य गर्भकोष्ठायता यदा ॥ १३३ ॥
छित्त्वा वलभ्यौ प्राग्ग्रीवौ विधीयेते तथापरौ ।
कर्णेषु भागमेकैकं त्यक्त्वा स्यात् प्रजयवहा ॥ १३४ ॥
एतस्यैव मुखे स्यातां यदा प्राग्ग्रीवकावुभौ ।
पार्श्वयोरपरौ द्वौ द्वौ प्राग्ग्रीवौ भवतो यदा ॥ १३५ ॥
कर्णेषु भित्तयश्च स्युस्तदा स्याच्छिबिराश्रयः ।
यदास्यैव मुखे शाला भागहीनाभिविस्तृता ॥ १३६ ॥
भागार्धेन च वर्धमाना प्राग्ग्रीवौ द्वौ तदग्रतः ।
द्वौ द्वौ गवाक्षकौ स्यातां तद्भित्त्योरुभयोरपि ॥ १३७ ॥
सीमायां द्वारशालम्बा मुखशालास्तदा भवेत् ।
अलिन्दो मालिकः कार्यो विशालस्यैव बाह्यतः ॥ १३८ ॥
प्राग्ग्रीवभूमिषु कृतो भित्त्या च समवायकः ।
जघना सहितैः स्तम्भैः बहुभिश्च क्रियते यदा ॥ १३९ ॥
द्विशाल इति विख्यातः प्रासादो जायते तदा ।
यदास्यैव विधीयन्ते स्तम्भाः सर्वे समन्ततः ॥ १४० ॥
प्राग्ग्रीवकौ चोभयतो गृहराजस्तदा भवेत् ।
सर्वस्यैव यदालिन्दा स्यादन्यो भागविस्तृतः ॥ १४१ ॥
सीमाभागविस्तृते स्यातां वलभ्यौ भागविस्तृते ।
भित्तिर्विधीयते शोभा गवाक्षैरुपशोभिता ॥ १४२ ॥
मुखे पट्टशालके च स्यात् तदा स्याद्गजशालिकः ।
एकाङ्गवायते क्षेत्रे तथा षड्भागविस्तृते ॥ १४३ ॥

मुक्त्वा भागद्वयं पश्चाद् देवकोष्ठं निवेशयेत् ।
भागं मुक्त्वाग्रतः कुर्यात् सीमां भागचतुष्टयम् ॥ १४४ ॥
अष्टतालान्मालतोऽलिन्दं पञ्चनिर्गमभागिकाः ।
भागिकः परितोऽलिन्दोऽप्यर्धिकातिपरोऽपरः ॥ १४५ ॥
द्विद्विस्तम्भयुताः कार्याः प्राग्ग्रीवाः कोष्ठकास्त्रयः ।
सीमान्तके चतस्रो च प्राग्ग्रीवा मध्यतस्तयोः ॥ १४६ ॥
द्विद्विस्तम्भौ पुरस्तान्यौ वेदिकाजालकान्वितौ ।
वेदिकाजालकस्थानैः सिंहकर्णाद्यशोभितः ॥ १४७ ॥
प्रासादोऽयं विष्णुर्नाम कथितो मनुनन्दनः ।
एवमेते समाख्याताश्चतुरश्राष्टका यथा ॥ १४८ ॥
चतुरश्रायतानीतिर्निर्गमाद्यस्याश्चापरानपि ।
प्रासादानभिधास्यामो मानसंस्थानलक्षणैः ॥ १४९ ॥
द्विभागं विस्तृतिर्दैर्घ्यं द्विगुणा निर्गमायतिः ।
मध्ये भागोच्छ्रितं द्वारं तदर्धेन तु विस्तृतम् ॥ १५० ॥
स्तम्भचतुर्भिः संयुक्ता सीमा द्वारस्य चाग्रतः ।
द्विभागायामविस्तारा तावन्मात्रसमुच्छ्रितिः ॥ १५१ ॥
तां सीमां गर्भसहितां भागैकांशेन वेष्टयेत् ।
भित्तिस्तत्र विधातव्या सपञ्चाशा चतुर्विधाम् ॥ १५२ ॥
षड्वारकचतुष्को ऽयं एष प्रासादो मय कथ्यते ।
तस्यैव भागनिष्क्रान्ता शाला मुखचतुष्टये ॥ १५३ ॥
यत्र षड्वारकोपेता विशालः स निगद्यते ।
स्तम्भैर्युक्तैर्मुखे षड्भिर्वर्णितैः साम्मुख्य इत्यसौ ॥ १५४ ॥
तस्यैव तु सा कर्णस्था द्विद्विस्तम्भयुता यदा ।
प्राग्ग्रीवसंगनिष्क्रान्ता चक्रिका मण्डपस्तदा ॥ १५५ ॥

सौम्योऽग्रतो यदास्यैव स्तम्भद्वययुतो भवेत् ।
प्राग्ग्रीवो भागविष्कम्भस्तदा स्वस्तिकसंज्ञकः ॥ १५६ ॥

विस्तारसन्निवेशस्य तुल्ये शालके भवेद् यदा ।
पार्श्वयोश्चोभयोः शाले प्राग्ग्रीवाख्ये यशो यदा ॥ १५७ ॥

निष्क्रमस्त्रभाग एकैकः स्तम्भद्वितयसंयुतः ।
प्रासादः स तदा ज्ञेयो शुभशालोऽभिधानतः ॥ १५८ ॥

शुभशालाभिशालायाः यदा स्तम्भाश्चतुर्भवेत् ।
प्राग्ग्रीवो द्विविधस्तस्मिन् द्विशालः स तदा भवेत् ॥ १५९ ॥

[1]त्रिशिलितमुखाग्रं प्रासादो वृहद्राजः प्रजायते ।
गर्भपादसमायामश्चतुरो भागविस्तृतौ ॥ १६० ॥

चतुश्चतुष्करौ यस्य प्राग्ग्रीवौ द्वौ च पार्श्वयोः ।
तौ तु द्विद्विकरौ गर्भविस्तारेण तु सम्मितौ ॥ १६१ ॥

कमलो नाम स प्रोक्तः प्रासादः शुभलक्षणः ।
अस्यैव पार्श्वे पृष्ठे च द्विद्विस्तम्भयुतौ यदा ॥ १६२ ॥

प्राग्ग्रीवौ स तदा प्रोक्तः प्रासादो कमलो विभुः ।
प्रासादात् कमलाभोऽन्यात् वस्त सुखावनात् पुनः ॥ १६३ ॥

भद्रभागानुमापान्या विस्तृता चतुरन्वितम् ।
युक्तायते प्रकुर्वीत समाकाण्डलतं ततः ॥ १६४ ॥

गर्भं पश्चिमभागेऽस्य चतुर्भागं समन्ततः ।
कुर्यात् तस्याग्रतः श्रीवां भागद्वितयविस्तृताम् ॥ १६५ ॥

भागत्रयमितां क्षोभैकेनाप्यन्तरितां च ताम् ।
संयुक्तां स्तम्भैः सुवर्णाभरणैः ॥ १६६ ॥

अलिन्देन परिक्षिप्तां सर्वतो द्वैककोष्ठकाम् ।
षोडशस्तम्भयुक्तेन कुर्यात् प्राग्ग्रीवमग्रतः ॥ १६७ ॥

ज्याद्भक्तावडूर्वेवायमामोष इति कीर्तितः ।
वृत्तायतेषु प्रथमः प्रासादः कथितो द्विजाः ॥ १६८ ॥

समाङ्ग्रिनी यदास्यैव प्राग्ग्रीवी भागमिश्रिनी ।
चतुरस्रकमे रैतिकस्तु वृत्ताभ्यां तुङ्ग उच्यते ॥ १६९ ॥

यथा सीमापरिमितिर्निर्गाक्षिकपक्षोमिता ।
वृत्तप्राग्ग्रीव पक्षोऽन्ये      तथा चाऽकपाङ्गनः ॥ १७० ॥

सीमामध्ये शिवालयौ प्राग्ग्रीवौ भागविस्तृतौ ।
चिरनारत्नसायामौ वक्षिणेति      शिवु भवः ॥ १७१ ॥

कार्याः प्राग्ग्रीवकास्ते च गर्भकोष्ठेन सम्मिताः ।
भूमिरिल्पेव (र्स)प्रोक्तः प्रासादः शुभलक्षणः ॥ १७२ ॥

सुखाप्तन( स्यात्तुरो भागान्यस्तिर्येणायनात्      ।
सेन्नरुद्धं नागः कुर्यात् तन्मध्ये गर्भवेश्म च ॥ १७३ ॥

चतुर्भागायतं तत् स्यात् अर्धाङ्ग्रिनयविस्तृतम् ।
कलिन्दो भागमानस्तस्य द्वारव्यालकमसंयुतः ॥ १७४ ॥

भागाङ्ग्रिनयविस्तारः प्राग्ग्रीवकोऽपानिर्मितः ।
शिवेष इति चि( चक्र इति ) कथ्यन्तः प्रासादोऽयं पुरातनैः ॥१७५॥

यथा      शिवेषः स्यात्तस्य पुरः प्राग्ग्रीवको यदि ।
चतुरश्रपरिक्षिप्तोऽलिन्देनावृतेन वा ॥ १७६ ॥

अपमेवांशकेन स्यात् पञ्चाङ्गिन्येन वेष्टितः ।
मुखमानाधं युक्त्या मित्या च परिवेष्टितः ॥ १७७ ॥

यदा च कर्णप्राग्ग्रीवी प्राग्ग्रीवमानतो भवेत् ।
सिंहोदरधरा या च द्वारैर्वेदासिपराम्बितौ      ॥ १७८ ॥

गवाक्षैः शोभनैर्युक्तस्तदा सिंहः प्रकीर्तितः ।
द्वारवातायने क्षेत्रे तथा चतुर्भागविस्तृते ॥ १७९ ॥

पञ्चांशेनाद्भुते स्यात्तस्य द्विभागायामविस्तृता ।
षट्कोष्ठो विधातव्यस्तत्पुरस्तात् भागानुविस्तृतम् ॥ १८० ॥
सीमान्ते भान्तरा श्रेयांशविस्तृता चतुरायता ।
भद्रस्तम्भोऽस्य गर्भो वै षोडशस्तम्भको बहिः ॥ १८१ ॥
अलिन्दकस्य पुरतो मुखप्राग्ग्रीवकोऽपि च ।
सीमाप्राग्ग्रीवकालिन्दकोष्ठान् वृत्तान् प्रकल्पयेत् ॥ १८२ ॥
प्राग्ग्रीवौ पार्श्वयोः सीमान्तर्गौ भागविनिर्गतौ ।
द्वाभ्यां द्वाभ्यां युतौ दैर्घ्ये स्तम्भाभ्यां चतुरस्रकौ ॥ १८३ ॥
एतत्सर्वं विधातव्यमलिन्दैर्भागविस्तृतम् ।
चतुर्भिर्दण्डतोऽस्य च भागिकोऽस्य प्रकाश्यते ॥ १८४ ॥
द्विस्तम्भयुक्तान् प्राग्ग्रीवान् कुर्याद् गर्भस्य दिक्त्रये ।
एवमेव समाख्यातः प्रासादः सुप्रभः शुभः ॥ १८५ ॥
भागद्विगुणविस्तारः प्राग्ग्रीवा येऽस्य कीर्तिताः ।
चतुरस्राश्च ते स्युर्हि द्विस्तम्भयुता यदि ॥ १८६ ॥
शेषा भवन्ति स्थितिश्च गर्भकोष्ठकयोरपि ।
प्रासादोऽयं तथा ज्ञेयो वत्सलो लोचनोत्सवः ॥ १८७ ॥
षड्भागाश्च चत्वारः प्रासादांशकभैः सह ।
चतुर्भागान्विते क्षेत्रे गर्भाद्वारीकृते पुनः ॥ १८८ ॥
द्वौ भागौ गर्भकोष्ठः स्यादलिन्दो भागिकस्तथा ।
स्तम्भाष्टकमलिन्दे स्यात् प्राग्ग्रीवकस्य चायतः ॥ १८९ ॥
द्विस्तम्भयुक्तं स्यात् त्रिदिशः श्रीवत्सः प्रासादो नन्दको भवेत् ।
षड्भागांशे यदा सीमा चतुरस्रा चतुर्दिशा ॥ १९० ॥
स्याच्च पूर्वोक्तविन्यासमलिन्दो भागिकोऽपरः ।
नन्दोऽयं समाख्यातः सर्वतः प्राग्ग्रीवैस्त्रिभिः ॥ १९१ ॥

तस्य भित्तिर्विधातव्या क्षेत्रेऽष्टांशविपुले बुधैः ।
चापनद्ध(स्त)पुनर्द्वौ(ष्टौ) गवाक्षौ विकृतये मतौ ॥ १९२ ॥
अस्यैवाग्रे यथा सीमाभागाद् भागकल्पना ।
द्विभागं विस्तृता श्रेणी चतुष्केणाथ निर्गतैः ॥ १९३ ॥
अलिन्दावेष्टिता युक्ता प्राग्ग्रीवैकमला ईनया ।
भित्तिभेदेन एकस्यैव प्राग्ग्रीवाः परिवेष्टिताः ॥ १९४ ॥
अलिन्देन परैः षड्भिः चतुर्भिर्मुखशालका तथा ।
अष्टभागाङ्किते क्षेत्रे कृतेऽष्टाविंशति सर्वतः ॥ १९५ ॥
भद्रमुखमितं कुर्याद् देवकोष्ठं मनोरमम् ।
चतुर्भिः शोभितं द्वारैर्नालिका(लिन्दवेष्टितम्) ॥ १९६ ॥
अलिन्दस्य विधातव्याः स्तम्भाष्टाष्टौ ततोऽपरः ।
स्याच्चतुर्भिस्तालिकमणो भागिकोऽलिन्दकः पुनः ॥ १९७ ॥
तथाविधस्तृतीयोऽपि प्राग्ग्रीवाश्च चतुर्दिशम् ।
प्रासादोऽयं महापद्मो अक्षणः शङ्करस्य च ॥ १९८ ॥
द्वितीयो(ये)ऽलिन्दके(के)ऽस्यैव प्राग्ग्रीवाः स्युश्चतुर्दिशम् ।
अलिन्देन परिक्षिप्तो हंस एव प्रकीर्तितः ॥ १९९ ॥
प्राग्ग्रीवो ऽस्य महापद्मस्यालिन्देनावृतो यथा ।
कर्णप्राग्ग्रीवको द्वौ द्वौ व्योमसंज्ञस्तदा भवेत् ॥ २०० ॥
हंसस्यैव चत्वारः स्युः प्राग्ग्रीवाणां पदे यथा ।
चतुरस्तम्भाः परिक्षिप्ता अलिन्देन चतुर्दिशम् ॥ २०१ ॥
तदा चन्द्रोदयो नाम प्रासादो जायते शुभः ।
एवमेषां चतुष्पष्टिः प्रासादानामुदाहृता ॥ २०२ ॥
इति सुरभवनानां सप्तविंशतिकाना-
मिह रुचकचतुष्केणाभिहितेयं प्रक्रिया ।

[illegible]
भवन्ति सुविभक्तिका शिल्पिनां कामधेनुः ॥ १०३ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
रुचकादिचतुष्षष्टिप्रासादलक्षणं नामैकोनपञ्चाशोऽध्यायः ।

## अथ प्रासादशुभाशुभलक्षणं नाम पञ्चाशोऽध्यायः ।

प्रासादानामथ ब्रूमो लक्षणानि भवन्ति ये ।
प्रशस्ताश्चाप्रशस्ताश्च तस्मिन्नवनिमण्डले ॥ १ ॥
ये समाः समकर्णाश्च समसूत्रकृताः समभक्तयः ।
मैवोत्था जातिशुद्धाश्च कर्णायामादविच्युताः ॥ २ ॥
कार्यतृप्ता विभागेन प्रमाणेन सुसंस्थिताः ।
कर्णाधैः कर्णपालीभिरक्षोभाः सलिलान्तरैः ॥ ३ ॥
अक्षहीनोर्ध्वपीठाद्यैः स्वमानपरिकल्पितैः ।
सुविभक्ताः सुसंस्थानाः स्तम्भैरभिषकैः युताः ॥ ४ ॥
समभागोपविन्यस्ता शुकनासाविभक्तैः समैः ।
स्वजातिनिपरिवेषाढ्या सत्यजातिसुभूषिताः ॥ ५ ॥
अक्षहीनाः प्रतीक्षेण संस्थानेन सुसंस्थिताः ।
केवला जातिशुद्धाश्च प्रासादाः शुभदा नृणाम् ॥ ६ ॥
सुरूपैर्भूषणैश्चैव रूपकाद्यैरलङ्कृतम् ।
कापोतोद्गमशुक्राश्च सुविभक्ताल्पसन्धिभिः ॥ ७ ॥
देव( ता )जातिप्रसिद्धैश्च भूषणैः सुविभूषिताः ।
प्रासादाः शुभदा नित्यं पूजासंस्कारवर्धनाः ॥ ८ ॥
कर्ता कारयिता येषां परां वृद्धिमवाप्नुयात् ।
अधमानपि वक्ष्यामः प्रासादानपलक्षणैः ॥ ९ ॥

विरूपाः कर्णहीनाश्च क्षेत्रमन्यमपाश्रिताः ।
स्कन्धैः कर्णैश्च विषमैः स्वामिनो मृत्युदैन्यदाः ॥ १० ॥

अत्युच्चैः स्याद् भयं राज्ञो नीचैः क्षेमं न लभ्यते ।
कर्णायामेन विकलाः प्रासादाः स्युर्भयङ्कराः ॥ ११ ॥

विभागेन विहीनास्तु दारिद्र्यभयदाः स्मृताः ।
महाभिः कर्णपालीभिरुद्वेगजनका नृणाम् ॥ १२ ॥

छाद्यैः संकीर्णविस्तीर्णैः कुलक्षयकराः स्मृताः ।
दुर्भिक्षदाः कुसंस्थाश्च शृङ्गैर्विकलसंयुतैः ॥ १३ ॥

रोगं क्लेशं च मृत्युं च कुरुतो विकलाश्च ते ।
विषमैर्भागहीनैश्चाप्यलिन्दैर्व्याधितो भयम् ॥ १४ ॥

पराजयं परिक्षीणैरन्यजातिप्रदूषितैः ।
ये परानुगतो ये ऽन्यसङ्कीर्णा येऽन्यविमर्दकाः ॥ १५ ॥

कर्तुः कारयितुर्नैते नन्दका वापि चात्मनः ।
दुर्बला मूलपादेन विश्लिष्टैः पीठसन्धिभिः ॥ १६ ॥

अल्पायुषस्ते प्रासादा भवन्ति च भयावहाः ।
अधरोत्तरकैः क्लिष्टैर्विज्ञेया व्याधिकारिणः ॥ १७ ॥

आवेधैर्मूर्च्छितैर्युक्ताः प्रासादा न सुखावहाः ।

ये कीर्तिमिच्छन्ति यशश्च भूतान् कर्तुं सुखैर्भोग्यमिहान्वितास्ते ।
प्रासादमुख्यानिह ते तु कर्तुं संशोधयन्त्विति चिन्तयाधिकार्यैः ॥१८॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
प्रासादशुभाशुभलक्षणं नाम पञ्चाशोऽध्यायः ॥

# अथायतननिवेशो नामैकपञ्चाशोऽध्यायः ।

एवं च पञ्च प्रासादे कुर्ये चतुरस्रेऽथवा भुवि ।
तस्यानुजीविनः कुर्युः प्रासादान् परितो यदि ॥ १ ॥
तदा द्विजनृपविट्शूद्रस्थानमानानुक्रमात् ।
तेषामिष्टाभिवृद्ध्यर्थं सर्वेषां वृद्धिहेतवे ॥ २ ॥
यथाद्यौ यद् च चतुर्णां वर्णानां हस्तानां क्रमात् ।
सामान्यायतनस्योक्तं तथा श्रेष्ठादिभेदतः ॥ ३ ॥
ज्येष्ठमायतनस्यैवं चतुरश्रं समन्ततः ।
तत्र मध्ये प्रकुर्वीत शिवं स्वे स्वामिनस्ततः ॥ ४ ॥
ये चान्ये तत्समाः केचित् कुले जाता द्विजोत्तमाः ।
हस्तपादेन हीनानि क्रमात् तान्यर्धमानतः ॥ ५ ॥
तस्यैव वामतः कुर्यात्कुलेशस्य द्विगुणान्तरे ।
कुर्यात् पञ्चांशहीनानि नैर्ऋत्यां दिशि भूपतेः ॥ ६ ॥
प्रासादान्नृपपत्नीनां सर्वासामपि शास्त्रवित् ।
अष्टभागेन हीनानि प्रतीच्यां दिशि कारयेत् ॥ ७ ॥
देवपितृव्याणां तद्वत् स्यात् श्वशुराणां विधानतः ।
वायव्यां मातृणां पाचकस्यापि नित्यशः क्रमात् ॥ ८ ॥
प्रासादाः सचिवसेनानीप्रतीहारपुरोधसाम् ।
कर्तव्याः पूर्वभागस्थं राजमातुर्निवेशनम् ॥ ९ ॥
हीनमेकाष्टभागेन तत् कार्यं राजकारिणा ।
देवीनामपि नित्यं देवानां तुल्यमेवाग्रपश्चिमे ॥ १० ॥
स्वसृणां मातुलानां च कुमाराणां तथा क्रमात् ।
आग्नेय्यां द्विजमुख्यानां विधातव्यं निवेशनम् ॥ ११ ॥
कार्याः पुरोधःप्रासादाः तुल्यमानसमेन वा ।
बाह्यतश्च कुर्युरन्त्याद्योनिनाम्पुरीतानमन्दिरात् ॥ १२ ॥

सामन्तकुञ्जरारोहभटपौरजनाः क्रमात् ।
एतान्यायतनान्येषां यथास्थानं प्रकल्पयेत् ॥ १३ ॥

मर्मवेधप्रदेशस्थान् द्वारवेधगतानपि ।
स्वस्थानान्तरितांस्तान् न कुर्याद्भिन्नकल्पया ॥ १४ ॥

अलिन्दैर्मत्तकोष्ठैश्च सौम्यास्तम्भगवाक्षकैः ।
द्वारप्रस्थलोपकार्यैः प्राग्ग्रीवैः सिंहकर्णकैः ॥ १५ ॥

न कुर्याद् भूषणैस्तुल्यं सर्वं पार्श्वद्वयस्थलः ।
समरूपं भवेद्रूपं नियुक्तं च न शस्यते ॥ १६ ॥

राजपीडा भवेत् तस्मिन्नाधिक्ये च कुलक्षयः ।
प्रासादाद् भूमिपालस्य निवेशं परितो स्थितम् ॥ १७ ॥

मुख्येषु कर्मस्वपि मोत्कृष्टं कारयेद् बुधः ।
शेषाण्यन्यानन्यपि विस्तारेणोच्छ्रयेण वा ॥ १८ ॥

पूर्वोक्तेभ्यो विभागोऽयः किञ्चिद्धीनतमः शुभः ।
अन्योन्यं द्विगुणव्यायैरेकैकत्वान्तरं शुभम् ॥ १९ ॥

शुभोऽन्यं नं च कुर्वीत बहुभिर्भवनान्तरैः ।
कोष्ठिकाभोजनागारैर्भाण्डोपस्करधामभिः ॥ २० ॥

शिलाकूपान्     शालाभिः शेषं तु परिपूरयेत् ।
प्रकाशमान् कारयेत् सर्वान् शुभकुपान् मनोरमान् ॥ २१ ॥

प्रायशः स्याल्पांशान्यान् सर्वस्थान्यगृहाणि च ।
नरेन्द्रायतनस्यैव निवेशान् परिकल्पयेत् ॥ २२ ॥

अन्यथास्ये महादोषा वैपरीत्ये कुलक्षयः ।

इति कथितविभागविधियोगैः
 सुरभवनानि भवन्ति यस्य राज्ञः ।

अविरलशुचिनोद्गितमयलाक्ताः
स्वाङ्गुणविमानं स चिरं महालसि कुर्वीत ॥ ९३ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
आयतनविधानो नामैकपञ्चाशोऽध्यायः ॥

## अथ प्रासादजातिर्नाम द्विपञ्चाशोऽध्यायः ।

अथ नागरो निवेशानां विभागं वास्तुनो यतः ।
कार्त्स्न्येन गमनो भूयः सम्यक्त्व प्रसयोत्तमः ॥ १ ॥
कुलजातिक्रमस्तो च कर्म दीर्घाल्पजीवितम् ।
संस्थानमभिधानानि लक्ष्मलक्षणमेव च ॥ २ ॥
शुभाशुभानां वैराज्यादीनां तेषां प्रचक्षते ।
पूर्वोक्तस्य विमानस्य नस्यानो लक्ष्म कल्प्यते ॥ ३ ॥
वैराजस्य यथाकारस्यचरस्यानमहोदयः ।
चतुरस्रं समं क्षेत्रमष्टाविंशतिभिर्विभाजयेत् ॥ ४ ॥
संयुक्तमष्टभिर्भागैः कुर्याद् गर्भगृहं शुभम् ।
द्विपञ्चाशद्भिः सीमा गर्भकोष्ठसमन्विताः ॥ ५ ॥
कर्णिकाना देवकोष्ठैः सर्वैरेकान्तरैश्च तैः ।
भद्रस्थाने ततः स्थानाद् कुर्यात्सको भवेद्वैः ॥ ६ ॥
हेमरत्नमयैः स्तम्भैः शुद्धपक्षैश्च भूषितैः ।
छत्राकारलम्बितैर्विताननैश्च विभूषितैः ॥ ७ ॥
स्फाटिकैर्विविधैर्जालैः सद्वृत्तैर्मणिवेदिकैः ।
हंसकर्णकपोतालीभिर्युक्तैश्चालम्बकर्णिकैः ॥ ८ ॥
पर्यन्तवेदिकायुक्तया गर्भस्योपरि घण्टया ।
लोकमानेन तत् सृष्टमाद्यं वैराजसंज्ञितम् ॥ ९ ॥

तस्मात् स्वस्तिकसंज्ञः प्राग् पुष्पकन्दो विधीयते ।
चतुरश्रायतविमानस्य हिरण्यादिकल्पोऽपि च ॥ १० ॥

सिद्धार्थको द्विशालः स्यादेकशालस्तु कुम्भकः ।
सूक्ष्ममन्यद् विधाने च वरं वीरं चतुर्मुखम् ॥ ११ ॥

गणानां देवतानां च स्कन्दस्य च यथाक्रमम् ।
प्रासादा शुभदाश्चैतेऽन्ये अधिष्ठे शुभलक्षणाः ॥ १२ ॥

स्वस्तिकः श्रीवत्सश्चैव तृतीयः क्षितिभूषणः ।
नन्दनो विजयो भद्रः श्रीकूटोष्णीषसंज्ञितौ ॥ १३ ॥

नन्द्यावर्तो विमानश्च सर्वतोभद्र एव च ।
विपुलकोणप्रासाद इति वैराजसंभवाः ॥ १४ ॥

एकैकस्मात् कर्मभेदैर्भेदकः समजायत ।
स्वस्तिकाद् वर्धको ज्ञेयः श्रीतरोः सिंहपञ्जरः ॥ १५ ॥

क्षमाभूषणात् तु शाला स्याद् नन्दनाद् नन्दभूषणः ।
विजयाद्वर्धमानस्य भद्राकन्दी विनिर्गमः ॥ १६ ॥

श्रीकूटाच्चित्रकूटाख्य उष्णीषात् भूमराधिपः ।
स्यान्मिश्रो नन्दिकावर्ताद् विमानाद्धस्तिजाव( ति )कः ॥ १७ ॥

कुबेरः सर्वतोभद्राच्चतुष्कोणाद् धराधरः ।
एतेभ्योऽपि च संभूताः कनीयांसोऽभिधानतः ॥ १८ ॥

तद्वशात्ते तथाकारैर्लक्ष्याः स्वैः स्वैः पृथग्विधैः ।
ज्येष्ठैस्तूत्तमैः पूर्वान् मध्यमान् मध्यमैस्तथा ॥ १९ ॥

कनीयसः कनीयोभिः प्रासादानुपकल्पयेत् ।
विकारैरपरैः क्लिष्टाः प्रासादाः कथिते ततः ॥ २० ॥

प्रथमो रुचकस्तेषु द्वितीयो वर्धमानकः ।
अवतंसस्तृतीयस्तु चतुर्थो भद्र उच्यते ॥ २१ ॥

पद्मकः सर्वतोभद्रः वज्रः स्वस्तिककोष्ठकः ।
मेरुर्मन्दर इत्यष्टौ विज्ञेयाः शिखरोत्तमाः ॥ २२ ॥
चतुरस्राः समाख्याता वैराजान्वयजाः शुभाः ।
एते ते कथिताः सर्वे निवेद्या प्रासादालयः ॥ २३ ॥
वैराजकुलसंभूता प्रासादाः परमोत्तमाः ।
एतेभ्योऽन्येऽपि संभूताः पुत्रपौत्रप्रपौत्रक(जाः) ॥ २४ ॥
स्वर्वासाः सुपर्वाणः सर्वेशाभिनन्दिताः ।
कर्तव्या भूतिकामेन तेजसा शुभलक्षणाः ॥ २५ ॥
मन्दिरा वर्णमात्रेण सर्वकामफलप्रदाः ।
छत्रपुष्पवनाकीर्णाः पूजासंस्कारवर्धनाः ॥ २६ ॥
यदि हीना भवन्त्येते वर्णदोषेण दूषिताः ।
तद्रुद्वेर्नां वर्णा नित्यमर्थनाशं कुलक्षयम् ॥ २७ ॥
पीडां च स्वामिनः कुर्युर्वंशस्यापि गर्हितम् ।
तस्मादेते विधानज्ञैः पूजिता भाग्यजन्मिभिः ॥ २८ ॥
इति वैराजप्रासादानामुत्पत्तिः परिकीर्तिता ।
वैराजजन्मचतुरस्रमनेकरूप-
मुक्तैकमत्र शुभलक्षणवती समासात् ।
आनन्दकीर्तिधनधान्यकरी कृता स्या-
दन्यादृशी पुनरनर्थकरैव कर्तुः ॥ २९ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे
प्रासादजातिर्नाम द्विपञ्चाशोऽध्यायः ।

## अथ जघन्यवास्तुद्वारं नाम त्रिपञ्चाशोऽध्यायः ।

ब्रूमो जघन्यवास्तूनां द्वारमानमतः परम् ।
विस्तारं सम्प्रोच्छ्रायं मुख्यवास्तुविधिं तथा ॥ १ ॥

कथिता ये मिश्रकाराः प्रासादास्तिर्यगायताः ।
तेषां भागचतुष्केण गर्भवासं विभाजयेत् ॥ २ ॥
द्वारं सार्धेन भागेन कुर्वीत स्यार्धविस्तृतम् ।
द्वारविस्तारपादेन पेद्याया विस्तृतिर्भवेत् ॥ ३ ॥
विस्तारार्धेन पिण्डः स्यात् तत्समः स्यादुदुम्बरः ।
सार्धमुदुम्बरकः   शाखा व्यासयुता भवेत् ॥ ४ ॥
चतुर्विंशश्च कर्तव्यः पेद्यापिण्डः प्रमाणतः ।
शाखा तु पेद्यापिण्डस्य(स्य) विस्तारेण विधीयते ॥ ५ ॥
शाखाविस्तारतो रूपशाखा स्यात् सार्धविस्तृतिः ।
अर्धेन पेद्यापिण्डस्य खल्वशाखा विधीयते ॥ ६ ॥
रूपशाखासमाः कार्या विस्तारात् गुल्फशाखिकाः ।
गुल्फाद्या शाखाः शाखाः क्रियन्ते यास्तु काश्चन ॥ ७ ॥
मध्यांशाभ्यधिकाः सर्वाः कर्तव्या विस्तरेण ताः ।
द्वारस्याग्रविस्तारयोगात् सङ्ख्या भवेत् तु या ॥ ८ ॥
तलोदयस्य तन्मानं गर्भमण्डपयोः समम् ।
यदि विस्तारं कर्तुं मण्डपः क्वापि दृश्यते   ॥ ९ ॥
द्वारोच्छ्रिते तद्गुणानां मण्डपे स्यात् तलोच्छ्रितिः ।
प्रासादेषु कनीयस्सु तलमानमुदाहृतम् ॥ १० ॥
यद् भागाभ्यधिकं ज्येष्ठे मध्येऽर्धांशाधिकं तलम् ।
तलविधिः   समयतः प्रासादस्य विधीयते ॥ ११ ॥
भावस्यात् स प्रयोक्तव्यो मौर्ध्वमानादुदुम्बरात् ।
कुक्षिमञ्चकाश्वरणपट्टजङ्घावसौर्षिकादयस्तम्भेषु तुला(मानम्) ।
उच्च(मान)मिह यत् प्रथमं तलाधिकं प्रविधयीत न हीनम् ॥ १२ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारापरनाम्नि वास्तुशास्त्रे
गर्भन्यासद्वारं नाम त्रिपञ्चाशोऽध्यायः ॥

## अथ प्रासादद्वारमानादि नाम चतुष्षष्टितमोऽध्यायः ।

इदानीमभिधास्यामः प्रासादानां यथाक्रमम् ।
द्वारेषूदयविस्तारं बाहुल्यं परिधिं तथा ॥ १ ॥

प्रासादभागिकोत्सेधं प्रासादद्वारमिष्यते ।
सप्तांशं षोडशांशे वापि सार्धांशोच्छ्रयमेव वा ॥ २ ॥

स्वीयस्वीयोदयादर्धविस्तारं च तदिष्यते ।
विस्तृतिर्भागतुर्यांशात् पेद्यायाः स्थौल्यमर्धतः ॥ ३ ॥

पेद्याबाहुल्यविस्तीर्णा शाखा भवति मानतः ।
उत्तराङ्गाणि कुर्वीत पेद्याशाखासमानि तु ॥ ४ ॥

सपादपेद्याविस्तारः रूपशाखा विधीयते ।
रूपशाखान्विताः कार्याः पीठबन्धस्तथोपरि ॥ ५ ॥

वृत्तं कार्यमथोत्कृते पत्रकैश्च निरन्तरम् ।
स्तम्भाश्च द्विगुणव्यासं भरणं भूषणान्वितम् ॥ ६ ॥

रूपशाखासमं चैव कर्तव्यमतिसुन्दरम् ।
ऊर्ध्वं समस्तशाखाग्रभागे च चतुरस्रकम् ॥ ७ ॥

तदूर्ध्वं भरणोच्छ्रायः स्यात् पादोनस्तम्भविस्तृतिः ।
कपोतमाल्यवल्लीकर्मैः स च विधीयते ॥ ८ ॥

सरथालयपङ्क्तौ वा स्तोभपार्श्वविनिर्गमः ।
तस्योपरिष्टात् कर्तव्यं स्यादुद्गमत्रपत्रकम् ॥ ९ ॥

रथिका (तु) विधातव्या द्वयोरप्युच्छ्रितिस्तयोः ।
सार्धप्रमाणभरणाद् भूषा स्यात् पुष्पकादिभिः ॥ १० ॥

रूपकैर्वा यथाशोभं सुविभक्तविधिस्तु सर्वतः ।
कण्ठकोपविन्यासेन कुम्भकारं भवेत् ततः ॥ ११ ॥

भित्तिभूमिं सिंहकर्णैस्तिलकैरथवापि वा ।
कपोतालिं विधातव्यमन्ते कलशान्तयोः ॥ १२ ॥
कार्यं बिम्बसंस्पर्शं च सर्वेषाम् विमानकैः ।
नवकात् बहिर्विभागस्था सर्वतः परिमण्डली ॥ १३ ॥
जगत्या भागसंख्या स्यात् च प्रमाणेन विधीयते ।
तस्यां सहस्रशालायां (भा)गाः पञ्चाधिकाः ॥ १४ ॥
कार्याया भाग(या द्वार)शालायामग्रिलिखरसंयुक्ताः ।
भवेदधस्तात्स्वेन पीठाया रसना तथा ॥ १५ ॥
पीठस्य सार्धया तुल्यमन्तरं पञ्चकादपरः ।
भागाष्टकं प्रकुर्वीत जङ्घा स्थंभात ततोऽध्वयः ॥ १६ ॥
वेद्याधिष्ठमानेन चाद्यमाता विधीयते ।
वेद्याधिष्ठसमो वरण्डागोऽथ्यासः प्रकीर्तितः ॥ १७ ॥
क्रमेणानेन कर्तव्याः शालाः स्वल्पा यथाक्रमम् ।
न मध्यमः परं कार्यो द्वारशाखाः कृष्णकम् ॥ १८ ॥
निर्गमो वा प्रवेशो वा विस्तारेण समन्वितः ।
वेद्यायां यदि कार्येण शालानां स विधीयते ॥ १९ ॥
सार्धवेद्याधिष्ठसमः विष्कम्भोदुम्बरो भवेत् ।
गलत्यासमनर्घेण भूमिरङ्गा च(त्वारः) नारकाः ॥ २० ॥
उदुम्बरार्धविस्तारं मानात् सिंहमुखानि च ।
उदुम्बरात् पादहीनस्तुल्यो वा पञ्चिकोऽथवा ॥ २१ ॥
चतुरस्र विमर्शविधो विस्तारात् सप्तमांशोऽधिकः ।
भागपादसमस्तम्भो द्वारशाखो प्रकीर्तितः ॥ २२ ॥
भागाष्टके च कर्तव्यो रूपलक्षणसंयुतः ।
चतुर्विंशतिप्रकारोऽयं नानारूपप्रपञ्चनः ॥ २३ ॥

स्तम्भविस्तारविस्तीर्णं पिण्डे तत्पादवर्जितम् ।
विस्तारात् त्रिगुणं दैर्घ्याद्धीनमथ्यणमिष्यते ॥ २४ ॥
प्रविष्टौ स्तम्भमाने स्तः कुक्षिमध्योत्कालकौ सदा ।
तलपट्टसमं पट्टमुत्तरं परिकल्पयेत् ॥ २५ ॥
तौ(ती)र्थं तस्य त्रिभागेन समुत्सेधाद् विधीयते ।
त्रिभिश्च त्रिभिर्नीतं पट्टम् यथायोगं प्रकल्पयेत् ॥ २६ ॥
तत्र कार्यं यथायोगं कुम्भकेनासनेन च ।
एकैकं विकल्पयेत् कूटागारैः सतोरणैः ॥ २७ ॥
अलिन्दे मण्डपे वापि चतुष्के वलभीषु वा ।
वितानानि विचित्राणि समुत्क्षिप्ततलानि च ॥ २८ ॥
समसेन च कुम्भानि त्रिवर्णेन यथोचितम् ।
कुम्भाः फलकवर्णाभिः कूर्माः समभिधास्यहे ॥ २९ ॥
उत्क्षिप्ततलानां च ये येषां व्यापकस्ते सर्वकेषु ।
गुम्फिनी लम्बिनी हेला वामना कोला मनोरमा ॥ ३० ॥
वाम्मलता चेति ललिता नामतः कथिता कुमाः ।
चतुरश्रीकृते क्षेत्रे कान्ते भूमितले शुभे ॥ ३१ ॥
सूत्रं क्षेत्रसमं कृत्वा कर्णात् कर्णं विभाजयेत् ।
विन्यस्येद् गर्भसूत्राणि तयोर्मध्यगतानि च ॥ ३२ ॥
षट्स्थान्यानि मध्येषु सूत्राणि विनिवेशयेत् ।
मध्ये वृत्तं समालिख्य गुम्फितं कमलोपमम् ॥ ३३ ॥
कार्यां भागीकृतं तत्र वृत्ते क्षेत्रे प्रवर्तयेत् ।
सूत्रे सूत्रे तु विन्यस्तां कुम्भां सूत्रेण चालिखेत् ॥ ३४ ॥

क्षुमान्तरेषु सर्वेषु वैकल्पेन सुधीकृतम् ।
नयोरभ्यन्तरयोर्मध्ये क्षुमाग्रे विन्यसेत्तम् ॥ ३५ ॥
द्विगुणं त्रिगुणं वा स्यात् नालक वलिमी लिखेत् ।
स्थानार्धेनोदयश्चैव कर्णान्यत्तत्र मण्डके ॥ ३६ ॥
तस्यानात् तलसूत्राणां शुभिका चोर्ध्वसूचिता ।
उदयस्तलसूत्रस्य शुभिकाग्रायतान्तरम् ॥ ३७ ॥
पूर्वसूत्रे क्षुमाग्रेषु कण्टकान् कल्पयेत् क्रमात् ।
वलिकालेषु भागेषु लग्नं कुर्यात् सुनिश्चितम् ॥ ३८ ॥
लग्नं गृहीत्वाधःसूत्र ऊर्ध्वसूत्राणि लक्षयेत् ।
उदये कण्टकस्यान्ते मङ्क्षेत्रानुसन्ततम् ॥ ३९ ॥
पातयेदुत्तरं सूत्रं क्षुमाणां लक्ष्मकाणि च ।
चिन्हयेद्वासं कर्णानां पार्श्वेषु श्रोत्रकर्णविस्तृती ॥ ४० ॥
क्षुमा कर्णगता या स्यात्वान्तरा सा प्रकीर्तिता ।
केवे सवलितान्या स्यात् किङ्किणी मनोरमा ॥ ४१ ॥
कोला तृतीया चान्येति चतुर्थी परिकीर्तिता ।
हैलाख्या पञ्चमी षष्ठी लक्ष्मणी सप्तमी क्षुमा ॥ ४२ ॥
सप्तमी शुभिकेत्येता मार्गेऽपि निर्दिष्टाः ।
एताभिः कारयेत् कोलं विमानं नयनोत्सवम् ॥ ४३ ॥
कोलादिकं हस्तिनासु वाहसमं चावापकम् ।
नागवीथीविमानं च पुष्पकं भ्रमरावली ॥ ४४ ॥
हंसपक्षं कराले च विकटं वाङ्कुलिकम् ।
चाहुनाभिः सपुच्छं च धूमिकृ(ई)तकमेव च ॥ ४५ ॥

मन्दारं कुसुमं पद्मं विकासं गवाक्षकम् ।
पुरोहितं पुरातोर्ह विशुद्धमन्दारकं तथा ॥ ४६ ॥
एतान्येवं विधानानि सङ्ख्यया पञ्चविंशतिः ।
एतेषां रूपनिर्माणममुना संप्रचक्ष्महे ॥ ४७ ॥
समस्तानाञ्चतुरश्रे च चतुरश्रायतेऽथवा ।
क्षेत्रे वृत्तीकृते चाप्येकधा तत् क्षेत्रमुच्यते ॥ ४८ ॥
चतुरश्रे यथा क्षेत्रे कर्णस्थानेषु कुम्भकाः ।
चतुरश्रनिबन्धेन चतुरश्रविनिर्मिते ॥ ४९ ॥
वेदिकां त्रिकटाकारां पूर्वं वृत्तान्त्यपङ्क्तया ।
ग्रन्थवृत्तं च मध्यस्थे पदं तथापरा क्रमाः ॥ ५० ॥
विन्यस्ते कुम्भिकाः पञ्च पञ्च वृत्ताः सुवृत्तकाः ।
मार्गे     स्तम्भेऽधःसूत्रस्य तद् भवेदमृतोत्सवम् ॥ ५१
कोष्ठाविलं   समे क्षेत्रे   भागाष्टकविभाजिते ।
मध्ये द्विभागे विलिखेद् वृत्तं कुम्भिकयान्विते ॥ ५२ ।
तत्र भ्रमान्ते च सूत्रे भ्रमात् वीक्षया कारयेत् ।
कर्णानि यानि सूत्राणि कुम्भास्ताः परिकल्पयेत् ॥ ५३
यानि शेषाणि सूत्राणि वल्लिभिस्ताः प्रकल्पयेत् ।
कुम्भिकायां कारयेद् वृत्तं गवाक्षाकृतमुच्यते ॥ ५४ ॥
कक्षपक्षे चतुष्पद्विभागं क्षेत्रं प्रकल्पयेत् ।
कुम्भस्थानेषु पद्मानि चार्धिकान्यन्तरेषु तथा ॥ ५५ ॥
कक्षपातेषु समस्तेषु कुम्भिकाः सन्निवेशयेत् ।
वृत्ताकारं चारवं स्याद् विन्यासे च यथैव तत् ॥ ५६
चतुरश्रेऽथवा वृत्ते भागाष्टकविभाजिते ।
त्रिभेदापेक्षागमन्यं ऽ कक्षपाते वक्षिसूत्रयोः ॥ ५७ ॥

चित्राभमेतत् कथितं पत्रिकोर्मिति मानवाः ।
ऊर्मिभिर्वर्तनैर्नाभिः क्रियते परितस्तरम् ॥ ५८ ॥

पुष्पमालाकुलं मीनत् पुष्पकं मधुपाकुलम् ।
मयूरपङ्क्तिकीर्णैस्तुमाश्रमनिकम्पनम् ॥ ५९ ॥

चतुरश्रक्रियायुक्तं सा प्रोक्ता भ्रमरावली ।
आश्मभाना कर्णमायाना तुरिम्भकास्यानसंस्थया ॥ ६० ॥

तुरिम्भी यत्र मध्ये तु हंसपक्षं तदुच्यते ।
अस्यैव पाते तु यदा सम्भवेत मनोरमा ॥ ६१ ॥

तुरिम्भी च विषमेषु कराले मधुपाकुलम् ।
कोला कुम्भा स्याद् विकटे वाङ्कं कान्ता प्रकीर्तिता ॥ ६२ ॥

पद्मनाभिसमे तूर्णं तुरिम्भकायाः प्रवर्तते ।
सर्वेष्वपि कुमारस्थानेष्वेकरेखान्वितं भवेत् ॥ ६३ ॥

पद्मनाभिरिति प्रोक्तं चित्रामविषमुत्तमम् ।
एतस्यैव कुमारस्थाने तुरिम्भका पद्मकाकृताः ॥ ६४ ॥

कलशैर्भूषिता यत् स्यात् सम्पुष्पमिति तद् विदुः ।
क्षेत्रे वृत्तायताकारे कार्येष्वङ्घ्रिसंहकम् ॥ ६५ ॥

वृत्ताकारे भवेत् क्षेत्रे वृत्तं कलधकर्मणा ।
चतुरश्रे समे क्षेत्रे यस्तु कुमार्गेत्तुमर्थते( नः ) ॥ ६६ ॥

वृत्तकोणमङ्गानि तन्मन्दारकमुच्यते ।
कुमुदं कुमुदस्यैव कुम्भाक्षेपविवर्जितः ॥ ६७ ॥

पद्मके स्यादधःक्षिप्ता त्रिकाले मध्यमा कुम्भा ।
गरुडे गरुडे मध्ये गरुडाभरणशोभितः ॥ ६८ ॥

पुरोगमं तद् यथधो गत्वा स्यादूर्ध्वे पुनः ।
अधो गत्वा पुरारोहमूर्ध्वमूर्ध्वं ततोऽन्यथः ॥ ६९ ॥

विभिन्नक्षोभणाकीर्णमन्ते पूर्णं गुहग्रहः ।
कङ्कभिक्षाभिभिर्मध्ये विष्णुमन्दारकं भवेत् ॥ ७० ॥

भागोन्मानमथ ब्रूमः प्रासादच्छाद्यसंभवम् ।
अर्धेनच्छाद्यविस्तारस्योर्ध्वं मध्ये प्रकल्पयेत् ॥ ७१ ॥

अयमर्धोदयः प्रोक्तश्छाद्यस्योन्मानतः परः ।
त्र्यंशेनच्छाद्यविस्तारस्योदयो वामनो भवेत् ॥ ७२ ॥

वामनार्धान्तयोर्मध्ये नवधा प्रविभाजयेत् ।
भागोत्तरोदयात् तेऽष्टौ वामनाद्युदयाः स्मृताः ॥ ७३ ॥

वा( आ )नयद्योऽप कौबेरः स( श )शाङ्कस्तथापरः ।
हंसध्वजो महाभोगी भारवः शम्भुकस्तथा ॥ ७४ ॥

वामनः प्रथमस्तेषामार्धान्त्योते( न्त्येन ) षष्ठोदयमी ।
छाद्यानामथ कूटानामुदयः प्रोच्यतेऽमुना ॥ ७५ ॥

गलसूत्रसमं कृत्वा कुर्यात् छाद्यशोषणम् ।
घण्टाद्यारभ्य भागात् स्युः सप्त भागोत्तरोदयाः ॥ ७६ ॥

कुबेरस्तोत्तरी वज्री नागनाथु( थ ) गणाधिपः ।
पुष्पभान्याः सुभद्रश्च पूर्वे सप्तोदयाः स्मृताः ॥ ७७ ॥

कृत्वा त्रिकर्णरेखं तु भागार्धं क्षिपेत् ततः ।
भागार्धमधिकं क्षेप्यं भवेच्छाद्यकवर्तना ॥ ७८ ॥

भागस्यैवाधिके क्षेपे गलसूत्रकमान्विते ।
तुभागाभ्यां क्षिपेद् भूयः षड् भवेयान्युदयान्तरम् ॥ ७९ ॥

विस्तारः यथाविस्ताय कुमार्याः स्यादनन्तरम् ।
कुमार्या त्रिभागहीनेन परिवृत्ताङ्कुलेन वा ॥ ८० ॥

तस्याश्चानन्तरा लक्ष्म्या सार्धं पुरःशुल्कपाम्
त्र्यंशोनैः पञ्चभिरपरा त्र्यंशोनैर्वेदाग्निभिः परा ॥ ८१ ॥

चतुर्थैकाभिरन्या स्यात् सार्धैर्द्वाभ्यां मनोऽङ्गुलैः ।
त्रिंशाद्यङ्गुलवृद्ध्या तु सप्तमी कोणसंस्थिता ॥ ८२ ॥

क्रमेणानेन मानानि कुम्भानां वृद्धिह्रासयोः ।
अनुपातेन कार्याणि यथायोग्यानुसारतः ॥ ८३ ॥

† कुबेरपश्चिमाम्भीपकणा गजनायकः ।
§ कुम्भा मुख्यश्रेष्ठेलाः स्युर्कुम्भाक्रमतोऽधमाश्रिताः ॥ ८४ ॥

एतासां गण्डिकाखेयाश्चत्वारः परिकीर्तिताः ।
ऊर्ध्वोर्ध्वस्थितया( रग )स्तिर्यग्यांशस्याधिर्मध्यंशा एव च ॥ ८५ ॥

कायकोष्ठविस्तारं तत्त्रिंशंशसमायति ।
कृत्वा चोक्ता भजेत् क्षेत्रं विस्तारायामतः समम् ॥ ८६ ॥

ततोर्ध्वमुखसमानैर्मध्येस्थितात् प्रागेव गण्डिकाम् ।
तस्यां रेखानुसारेण स्थापयेद्वेदलग्नकम् ॥ ८७ ॥

अथवा गण्डिकायाश्च कण्ठकानि प्रकल्पयेत् ।
मध्यमोच्छ्रयौ ज्ञात्वा त्रीणि स्थानानि चिह्नयेत् ॥ ८८ ॥

गर्भे तथोर्ध्वे प्रान्ते च तृतीयं मध्यतलयोः ।
यत्र स्थाने स्थितं सूत्रं स्पृशति स्थानकत्रये ॥ ८९ ॥

तस्मात् प्रसार्य तत्सूत्रं भ्रमयेत् कर्कटं ततः ।
कुम्भार्धस्थितमुपरि संस्थानमुपजायते ॥ ९० ॥

उपरि स्थितेन सूत्रेण तत्तुल्येनैव कर्कटम् ।
प्रान्तावलम्बकस्थाने भ्रमयेत् तस्यसिद्धये ॥ ९१ ॥

प्रागाह्ने भागयुगलावच्छिन्नं फलके पुनः ।
कल्पयेत् समसंबेधा कुम्भापार्श्वधर्मिंगच्छते ॥ ९२ ॥

शेषां तुर्यां तु शालांशैश्चतुर्भिः प्रविभाजयेत् ।
चतुर्थांशः परं तस्याः कर्तव्यं कुक्षिवर्तनम् ॥ ९३ ॥
अर्धांश्ये कुम्भोच्छ्रायो विस्तारोंऽशाङ्घ्रियोन्वितः ।
मूलेऽग्रतश्च भागार्धमुपधोऽन्या विधीयते ॥ ९४ ॥
अधःक्षेपे स विस्तारात् तुल्यमालम्ब्य नमयेत् ।
विस्तारात् सप्तमे क्षेपे सार्धमङ्गुलमात्रितः ॥ ९५ ॥
कुक्ष्यग्रभागमध्यांशे च तयोर्मध्ये च यत् स्थितम् ।
सूत्रं तद्योगात् तत्र कृत्वा कर्कटं भ्रमयेत् बुधः ॥ ९६ ॥
भागभागोत्तरक्षेत्रापेक्षया चतसृष्वपि ।
गणिकासु विधातव्यं विधिवत् कुक्षिवर्तनम् ॥ ९७ ॥
मूलात् कुम्भायाः क्षेत्रस्य पञ्चांशात् त्र्यंशेऽथवा ।
पृथुत्वार्धे कुम्भाग्रलेखानुरूपं यथा ॥ ९८ ॥
संपतन्त्येवमालिख्य शेषं पूर्ववदाचरेत् ।
कुम्भाया मूलतः क्षेत्रसप्तमांशाच्चतुष्टये ॥ ९९ ॥
पृथुत्वार्धे कुम्भाग्रलेखानुलग्नं यथा ।
संपतन्त्येवमालिख्य षड्भागैः शेषमाचरेत् ॥ १०० ॥
कर्णांशमध्ये पञ्च क्षेत्रस्यैव कुम्भादितः ।
पृथुत्वार्धे कुम्भाग्रद्वयलेखां निवेशयेत् ॥ १०१ ॥
शेषैः षड्भिस्ततो भागैरन्यत् तु प्राग्वदाचरेत् ।
भागार्धं निर्गमः कार्यः प्रासादानां कनीयसाम् ॥ १०२ ॥
ज्यायसस्यैव भागैस्तु ज्यायसां निर्गमो मतः ।
तदन्तरे ये प्रासादास्तेषां क्षेत्रानुसारतः ॥ १०३ ॥
ज्यायस्य निर्गमः कार्यो विद्वद्भिरनुपाततः ।
निर्गमस्य त्रिभागेन कनीयान् ज्यायकोदयः ॥ १०४ ॥

अर्धभागेन परतो भागयं पक्षभित्तिमन्तरम् ।
अन्ये भागोत्तराः पञ्च शतैव सुधया मताः ॥ १०५ ॥

इदानीमभिधास्यामः सिंहकर्णस्य लक्षणम् ।
भागोदयोदयः स स्यात् दशाभित्ति विभाजयेत् ॥ १०६ ॥

तैः स्यात् षोडशाभिर्भित्तिस्तथैव तलभित्तिः ।
ऊर्ध्वानिचतुरो भागांस्त्यक्त्वा वाह्यं निवेशयेत् ॥ १०७ ॥

चतुरस्रीकृते क्षेत्रे कर्णमारभ्य वाह्यतः ।
ततो वृत्तं लिखेत् पश्चात्तत्तु समभित्तिरोपयेत् ॥ १०८ ॥

ऊर्ध्वविशालं तु भागेन स स्यात् भागचतुष्टये ।
लिखेद् वृत्तं त्रिभागोनमोक्षकर्कटकोनमृत्यम् ॥ १०९ ॥

तस्योपरिष्टात् तत्तु ग्रीवा कार्यैकभागिनी ।
गर्भे सूक्ष्मायोर्मध्ये तिर्यग् भागद्वयं भवेत् ॥ ११० ॥

मध्ये कर्णाग्रयोस्तिर्यक् कार्यं भागत्रयं बुधैः ।
ग्रीवाया उपरिष्टाच्च भागमेकं शिखा भवेत् ॥ १११ ॥

शिखायामुपरिष्टाच्च कर्णमध्ये गर्भसूत्रकम् ।
शिखाग्रमूर्ध्वतलादूर्ध्वं भागावलम्बितम् ॥ ११२ ॥

भागावलम्बि कर्णाग्रं स्कन्धाग्रं तावदेव तु ।
स्यात् कर्णाग्रयोर्मूले स्कन्धदेशस्य लक्षणम् ॥ ११३ ॥

स्वस्तिको द्व्यंशविस्तारायामः प्राग्वृत्तसंयुतः ।
एवं शङ्खमध्यसूत्रादूर्ध्वं भागो(गे) निवेशयेत् ॥ ११४ ॥

भागे निवेशितं कुर्यात् पूर्ववृत्तापरोपलः ।
स्वस्तिकाग्रं च पूर्वोक्तं पूर्ववत् सर्वमाचरेत् ॥ ११५ ॥

ततस्त्वातुपर्यन्तमष्टभिर्विभक्तः समम्( समम् )
द्वारम्यां हस्तमानमयनो भागाभ्यां तिर्यगेव च ॥ ११६ ॥

भागेन तत्रैवापादभुजाभूषवि पञ्चभिः ।
चतुर्भिश्च चतुर्भिश्च भागैकसमयतः समम् ॥ ११७ ॥

मुखार्धानि विनिर्वेशकर्णयुक्तानि सर्वतः ।
एकस्तम्भानि च पीठावलिकार्धयुतानि च ॥ ११८ ॥

ततस्तम्भद्विर्वैराज् भाजकूटसमुन्नतः ।
पञ्चाण्डकनिवेशः स्यात् पार्श्वयोश्च परिस्फुटः ॥ ११९ ॥

त्रिचन्द्रीकलिनो नाम सिंहकर्णोऽयमीरितः ।
तथा भागोच्छ्रिते नाम्नि चतुर्भागे ततस्ततः ॥ १२० ॥

चतुर्दशांशविस्तीर्णे कर्णे द्वार्ये च निर्गमेत् ।
तथा मण्डोच्छ्रिते मागचत् स्यात् अधोभागविस्तृतः ॥ १२१ ॥

हेम एकभक्तिर्मीन सिंहकर्णोऽलगावरः ।
एते शोभाभिन्नाता कार्याः स्यचसंचरक्रमात्ययः ॥ १२२ ॥

प्रासादानामिति निर्गमे द्वारमाने विशेषतः
स्तम्भानां च सङ्क्रमित् विताननि तेषां शुभावहः ।

सुरभ्यायोच्छ्रितविविहिता कायदक्षा शुभाय
प्रोक्ताः सम्न प्रविततवरं सिंहकर्णप्रमाणम् ॥ १२३ ॥

इति महाराजाधिराजश्रीभोजदेवविरचिते समराङ्गणसूत्रधारनाम्नि वास्तुशास्त्रे

चाद्यद्वारलक्षणसिंहावलिकावितानक्रमादयवजुलगवाक्षमतिसिंहकर्णप्रमाणं नाम

चतुष्पञ्चाशोऽध्यायः ॥